CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri



समये ऽनंतानुबंधिनां स्थिति सत्वं सागरोपमलक्ष पृथक्त्वं जातं । अपूर्वकरण कृत स्थिति खंड बाहुल्येन अं-
तः कोटीकोटि सागरोपम सत्वस्य संख्यात गुणहान्या तदा तत्प्रमाण संभवात् । शेष कर्मणां स्थिति सत्वमंतः
कोटीकोटि सागरोपम प्रमाणमेव इदमनंतानुबंधिनां प्रथमं स्थिति सत्वस्य पर्व पुनः स्थिति खंड सहस्रेषु प-
ल्य संख्यातैक भागमात्रायामेषु गतेषु अनिवृत्तिकरण कालस्य संख्यातैक भागे ऽवशिष्टे ऽनंतानुबंधिनां स्थि
तिसत्वमसंज्ञिस्थिति बंध समं सागरोपम सहस्र प्रमितं भवति । पुनः पल्य संख्यातैक भागमात्रायामेषु स्थि-
तिखंड सहस्रेषु गतेषु चतुरिंद्रिय स्थितिबंध समं सागरोपम शत मात्रं भवति । [redacted] पुनस्तावदायामेषु स्थि
तिखंड सहस्रेषु गतेषु त्रींद्रिय स्थिति बंध समं पंचाशत्सागरोपम प्रमितं । तेषां स्थिति सत्वं भवति पुनस्तावदा-
यामेषु स्थिति खंड सहस्रेषु गतेषु एकेंद्रिय स्थिति बंध सम मेक सागरोपम प्रमितं तेषां स्थिति सत्वं भवति पुनस्ता
वदायामेषु स्थिति खंड सहस्रेषु गतेषु पल्य मात्रमनंतानुबंधिनां स्थिति सत्वं भवति (पुनस्तावदाया) इदं द्वितीयं-
पर्व पुनः पल्य संख्यात बहुभाग मात्रायामेषु स्थिति खंड सहस्रेषु गतेषु दूरापकृष्टि संज्ञं तेषां स्थिति सत्वं भवति
तत्व पल्य संख्यातैक भाग मात्रं | प ५५५५ | इदं तृतीयं पूर्व, पुनः पल्या संख्यात बहुभाग मात्रायामेषु स्थिति खंड स-
हस्रेषु गतेषु अनंतानुबंधिनां स्थिति सत्व मावलिमात्र मवशिष्यते तदुच्छिष्टावलि संज्ञं इदं चतुर्थं पर्व
एवमनंतानुबंधिनां स्थिति सत्वे सागरोपमलक्ष पृथक्त्वं पल्यं दूरापकृष्टि रुच्छिष्टावलिरिति चत्वारि पर्वाणि
भवंति ॥ छ ॥ पल्लस्स संखभागो संखाभागा असंखगा भागा, ठिदि खंडा होंति कमे अणस्स पव्वादु पव्वोति ॥२७॥
अनंतानुबंधिनां स्थिति सत्वस्य । प्रथम पर्वणः आरभ्य द्वितीय पर्व पर्यंतं पल्य संख्यातैक भागः स्थिति खंडाया
मो भवति । द्वितीय पर्वणः आरभ्य तृतीय पर्व पर्यंतं पल्य संख्यात बहुभाग मात्रः स्थिति खंडायामः । तृतीय पर्व
णः आरभ्य चतुर्थ पर्व पर्यंतं पल्या संख्यात बहु भाग मात्रः स्थिति खंडायामः ॥ छ । अणियट्टी संखेज्जाभागेसुग



Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

मोहक्षपणप्रारंभभवेविमानेषुसौधर्मादिकल्पेषुकल्पातीतेषुच।भोगभूमितिर्यग्मनुष्येषुचधर्मायांनारकपृ
थिव्यांचभवतिकुतः।यस्मात्कारणात्कृतकृत्यवेदकःपूर्वबद्धायुष्कश्चतस्यचतसृष्वपिगतिषूत्पद्यते।तस्मात्कारणा
तत्रोत्पन्नोदर्शनमोहक्षपणांनिष्ठापयतीत्यर्थः॥छ॥अथपूर्वमनंतानुबंधिविसंयोजनांप्ररूपयति।पुव्वंतिय
रणविहिणाअणंबुअणियट्टिकरणचरिमम्हि।उदयावलिबाहिरगंठिदिंविसंजोजदेणियमा।१२७।पूर्वंमा
दौत्रिकरणविधिनाअनंतानुबंधिनःक्रोधमानमायालोभान्।उदयावलिंमुक्त्वातद्बाह्योपरितनस्थितिस्थिता
न्सर्वान्विसंयोजयन्।अनिवृत्तिकरणचरमसमयेनिरवशेषंविसंयोजयति।द्वादशकषायनोकषायस्वरू
पेणसंक्रामयति।तथाहि।असंयतसम्यग्दृष्टिर्देशसंयतःप्रमत्तसंयतःअप्रमत्तसंयतोवावेदकसम्यक्त्वःअ
धः।प्रवृत्तकरणकालंप्रथमोपशमसम्यक्त्वग्रहणकालोक्तविधिना।प्रतिसमयमनंतगुणविशुद्ध्यावर्द्धमानः
परिसमाप्यतदनंतरसमयेगुणश्रेणिगुणसंक्रमस्थितिकांडकानुभागकांडकघातानपूर्वकरणपरिणामैः
प्रवर्त्तयतितत्रप्रथमसम्यक्त्वोत्पत्तौगुणश्रेणिद्रव्याद्देशसंयतगुणश्रेणिद्रव्यमसंख्येयगुणं।तस्मात्सकल
संयतगुणश्रेणिद्रव्यमसंख्येयगुणंतस्मादसंख्येयगुणद्रव्यमपकृष्यायमनंतानुबंधिविसंयोजकोगुणश्रेणिं
करोतिगुणश्रेण्यायामःपूर्वचदेचापूर्वानिवृत्तिकरणकालद्वयात्साधिकोपिसंयतगुणश्रेण्यायामात्संख्ये
यगुणहीनःसमयंप्रतिगलितावशेषश्चअनुभागकांडकायामः।पूर्वस्मादनंतगुणःस्थितिकांडकायामश्च
पूर्वस्मात्संख्येयगुणः।गुणसंक्रमद्रव्यंचपूर्वस्मादसंख्येयगुणं गुणसंक्रमस्तुअनंतानुबंधिनामेवनान्ये
षांकर्मणांएवंसंख्यातसहस्रैःस्थितिखंडैःस्थितिबंधैरनुभागखंडैश्चापूर्वकरणकालंपरिसमाप्यतदनंत
रसमयेअनिवृत्तिकरणंप्रविशति॥छ।अथानिवृत्तिकरणकालेक्रियमाणंकार्यविशेषमाह।अणियट्टीअ
द्धाएअणस्सचत्तारिहोंतिपव्वाणि।सायरलक्खपुधत्तंपल्लंदूरावकिट्टिउच्छिट्ठं।१२८।अनिवृत्तिकरणप्रथम

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

देसु अणागठिदिसत्तो। उदधिसहस्सं तत्तो वियलेय समं तु पल्लादी ।२२५। अनिवृत्तिकरणकालस्य प्रथमस-
मयादारभ्य संख्यात बहुभागेषु गतेषु अनंतानुबंधिनां स्थितिसत्वं क्वचित्सागरोपमसहस्रं। ततो विकलत्रये-
केंद्रिय स्थितिबंधसमं ततः पल्यादि भवति। आदिशब्दाद्दूरापकृष्टि रुच्छिष्टावलिश्च गृह्यते। प्रति पर्व संख्यात-
सहस्रस्थितिखंड वशात् तत्स्थितिहानि संभवात् ॥छ॥ उवहिसहस्सं तु सयं पण्णं पणुवीसमेक्कयं चेव।
वियलचउक्के एगे मिच्छुक्कस्सट्ठिदी होदी।२२६। असंज्ञिपंचेंद्रियश्चतुरिंद्रियस्त्रींद्रियो द्वींद्रियश्च विकलचतु-
ष्कं। तस्मिन्नेकेंद्रिये च यथाक्रमं सहस्रशत पंचाशत्पंचविंशत्येकसागरोपमप्रमितो मिथ्यात्वोत्कृष्टस्थिति-
बंधो भवति। एवमनंतानुबंधिनां द्रव्यं | स ७ २२ / ७ ख २७ | गुणश्रेण्या अपकृष्टमधो निक्षिप्य स्थितिकांडकद्रव्यं गुणसं-
क्रमभागहारेण भक्त्वा लब्धफालीः प्रति समयमसंख्येयगुणाः द्वादशकषायनोकषायेषु संक्रमय्य
अनिवृत्तिकरणचरमसमये चरमकांडकफालिद्रव्यमुच्छिष्टावलिमात्रनिषेकवर्जितं विसंयोजयति। उच्छिष्टाव-
लिद्रव्यं च प्रतिसमयमेकैकनिषेकरूपेणावलिकाले विसंयोज्यते ॥छ॥ अथ विसंयोजितानंतानुबंधिकषायच-
तुष्टयस्योत्तरकालकर्त्तव्यमाह। अंतोमुहुत्तकालं विसमिय पुणो वि तिकरणं करिय। अणियट्टीये मिच्छं मिस्सं स-
म्मं कमेण णासेइ।२२७। पूर्वोक्तक्रमेण विसंयोजितानंतानुबंधिक्रोधमानमायालोभकषायो जीवोंतर्मुहूर्त्तकालं वि-
श्रम्य क्रियांतरमकृत्वा स्वस्थानस्थितो भूत्वेत्यर्थः पुनरपि त्रिकरणान् कृत्वा अनिवृत्तिकरणकाले मिथ्यात्वप्र-
कृतिं सम्यक्त्वप्रकृतिं च क्रमेण नाशयति। वक्ष्यमाणप्रकारेण क्षपयतीत्यर्थः। तथाहि अनंतानुबंधिविसंयोज-
नानंतरमंतर्मुहूर्त्तकालं पर्यंतं विशुद्ध्यतिशयाभावाद संयतसम्यग्दृष्टिर्वा देशसंयतो वा अप्रमत्तसंयतो वा-
स्वस्थानस्थितो भूत्वा पुनर्दर्शनमोहक्षपणाभिमुखस्सन् प्रतिसमयमनंतगुणवृद्ध्या विशुद्धिमापूर्य दर्शन-
मोहोपशमनोक्तप्रकारेणाधःप्रवृत्तकरणं कृत्वा अपूर्वकरणप्रथमसमये गुणश्रेणिनिर्जरां कर्तुं प्रारभते अ-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

नंतानुबंधि विसंयोजकस्य गुणश्रेणिकरणार्थमपकृष्टद्रव्यादसंख्येयगुणं द्रव्यमपकृष्यतद्गुणश्रेण्यायामा
त्संख्येयगुणहीनश्रेण्यायामे तात्कालिकापूर्वानिवृत्तिकरणकालद्वयात्साधिके निक्षिपति। सम्यक्त्वोत्पत्यादि
करणत्रयकालादुत्तरोत्तरकरणत्रयकालस्य संख्यातगुणहीनत्वात्। तदा अन्यदेवस्थितिखंडमन्यदेवानु
भागखंडमन्यदेवस्थितिबंधनं पल्यसंख्यातैकभागहीनं। प्रारभते, मिथ्यात्वमिश्रद्रव्ययोर्गुणसंक्रमंच करोति॥
अपूर्वकरण प्रथमसमये जघन्यस्थितिसत्वमंतःकोटीकोटिसागरोपमप्रमितं पूर्वस्मात्संख्येयगुणहीनं
तत्रैवोत्कृष्टंस्थितिसत्वं जघन्यात्संख्येयगुणं, तथाहि। एको जीवः पूर्वमुपशमश्रेणिमारुह्य तत्र कर्मणांस्थिति-
सत्वं बहुशः खंडयित्वा ततोवतीर्या विलंबितमेव दर्शनमोहक्षपणायां प्रवृत्तस्तस्य कर्मस्थितिसत्वं जघ-
न्यं भवति। यस्तूपशमश्रेणिमनारुह्य दर्शनमोहक्षपणायां प्रवृत्तस्तस्य कर्मस्थितिसत्वं तस्मात्संख्येयगुणं
× भाग ५ भवति। तत्र जघन्यस्थितिसत्वस्य स्थितिकांडकायामः पल्यसंख्यातमात्रः। उत्कृष्टस्थितिसत्वस्य स्थितिकांडका
यामः सागरोपमपृथक्त्वमात्रः स्थितिकांडकानां स्थित्यनुसारित्वेन प्रवृत्तेः एवंविधैः संख्यातसहस्रस्थितिकां
डकघातैः ततः संख्येयगुणानुभागकांडकघातैः। प्रतिसमयमसंख्येयगुणद्रव्यगुणश्रेणिनिर्जरया गुणसं
क्रमविधानेन चापूर्वकरणचरमसमयं प्राप्तः। तत्र कर्मणां स्थितिसत्वं तत्प्रथमसमयस्थितिसत्वात्संख्येय-
गुणहीनं भवति दर्शनमोहोपशमने प्रतिपादितो विशेषः। सर्वोप्यत्रानुक्तोपि द्रष्टव्यः॥ ७॥ अथानिवृत्तिकरणं
प्रविष्टस्य कार्यविशेषमाह। अणियट्टिकरणपढमे दंसणमोहस्स सेसगाणठिदी, सायरलक्खपुधत्तं कोडील
क्खगपुधत्तं च॥ ११८। अनिवृत्तिकरणप्रथमसमये दर्शनमोहस्यास्थितिसत्वं सागरोपमलक्षपृथक्त्वं इदं प्र-
थमं पर्वपृथक्त्व शब्दोत्र बहुत्ववाची अंतःकोटी(कोटी)कोटीत्यर्थः। शेषाणां कर्मणां स्थितिसत्वं कोटीलक्षपृथक्त्वं अंतःकोटी
कोटीत्यर्थः। अपूर्वकरणकृतसंख्यातसहस्रस्थितिकांडकघातवशादेवंविधस्थितिसत्वसंभवात्। अत्र सर्वेषां २२

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

जीवानां विशुद्धि परिणाम सादृश्येन जघन्योत्कृष्ट विकल्पं विना स्थिति सत्व मेकादृशमेव भवति अतः परं द
र्शन मोहस्य पल्य स्थिति पर्यंतं पल्य संख्यातैक भागमात्रं स्थिति कांडकं भवति ॥ ७ ॥ अथानिवृत्ति करण काले
क्रियमाणं कालं विशेषमाह । अमणाद्विदि सत्तादो पुधत्तमेत्ते पुधत्तमेत्तेय । ठिदि खंडेय हवंति हु चउ ति वि एयक्ख
पल्लठिदी ॥ १९ ॥ सागरोपम लक्ष पृथक्त्व मात्राद्दर्शन मोहस्य अनिवृत्ति करण प्रथम समय भाविनः स्थिति सत्वा
त्संख्यात सहस्र स्थिति कांडक घात वशेनासंज्ञि स्थिति बंध समं सागरोपम सहस्र मात्रं स्थिति सत्वं भवति त
तो बहुषु स्थिति कांडकेषु गतेषु चउरिंद्रिय स्थिति बंध समं सागरोपम शत मात्रं स्थिति सत्वं भवति । ततो बहुषु स्थि
ति खंडेषु पतितेषु त्रींद्रिय स्थिति बंध समं पंचाशत्सागरोपम । प्रमितं स्थिति सत्वं भवति । ततो बहुषु स्थिति खंडेषु
गतेषु द्वींद्रिय स्थिति बंध समं पंचविंशति सागरोपम मात्रं स्थिति सत्वं भवति । ततो बहुषु स्थिति खंडेषु पतितेष्वेकें
द्रिय स्थिति बंध समं एक सागरोपम प्रमितं स्थिति सत्व भवति ततो बहुषु स्थिति खंडेषु पतितेषु पल्य मात्रं स्थि-
ति सत्वं भवति ॥ इदं द्वितीयं पर्व ॥ ७ ॥ पल्लठिदि दोउवरि संखेज्ज सहस्समेत्त ठिदि [redacted] खंडे । दूरावकिट्टि स-
१७ ण्णिद ठिदि सत्तं होदि णियमेण ॥ २० ॥ तस्मात्पल्य मात्र स्थिति सत्वादुपर्युपरि पल्य संख्यात बहु भाग मात्रा यामेषु
स्थिति कांडकेषु निपतितेषु दूरापकृष्टि संज्ञं स्थिति सत्वं नियमेन भवति । का दूरापकृष्टि र्नामेति चेत् अत्रोच्यते
पल्ये उत्कृष्ट संख्यातेन भक्ते यल्लब्धं तस्मादेकैक हान्या जघन्य परिमिता संख्यातेन भक्ते पल्ये यल्लब्धं । तस्मादेको
नतर वृद्ध्या यावंतो विकल्पास्तावंतो दूरापकृष्टि भेदाः तेषु कश्चिदेव विकल्पो जिन दृष्ट भावोस्मिन्नवसरे दूराप-
कृष्टि संज्ञितो वेदितव्यः । इदं तृतीयं पर्व ॥ ७ ॥ पल्लस्स संखभागं तस्सपमाणं तदो असंखेज्जा । भागपमाणे खं-
डे संखेज्ज सहस्सगे सुतीदेसु ॥ २१ सम्मस्स असंखाणं समय बद्धाणुदीरणा होदि ततो उवरिं तु पुणो बहुखं
डे मिच्छ उच्छिट्ठं ॥ २२ । तस्य दूरापकृष्टि स्थिति सत्वस्य प्रमाणं पल्य संख्यातैक भाग मात्रं भवति [प / ५५५५] ततो दूरा

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri



प्रकृष्टिस्थितिसत्वात्। पल्यासंख्यातबहुभागमात्रायामेषु स्थितिकांडेषु। संख्यातसहस्रेष्वतीतेषु सम्यक्त्वप्रकृ-
तेरपकृष्टद्रव्यस्य असंख्यातसमयप्रबद्धमात्रमुदीरणाद्रव्यमुदयावल्यां निक्षिप्यते तथाहि सम्यक्त्वप्रकृति
द्रव्यमिदं स ७ १२- / ७ ख १७ गु अस्मादपकृष्टं पल्यासंख्यातभागेन खंडयित्वा तद्बहुभागद्रव्यमुपरितनस्थितौ देयं ॥
शेषैकभागं पुनः पल्यासंख्यातभागेन खंडयित्वा तद्बहुभागद्रव्यं गुणश्रेण्यां देयं स ७ १२ प / ७ ख १७ गु उ पु ७ पु
शेषैकभागद्रव्यमुदयावल्यां देयं स ७ १२- / ७ ख १७ गु उ पु पु ७ पल्यभागहारभूतासंख्यातस्य बाहुल्येन
पल्यद्वये अपकर्षणभागहारे चा- प्रवर्तितेपि असंख्यातगुणाकारसंभवात्। इतः परं सर्वत्र पल्या-
संख्यातभागखंडितमेव उदयावल्यां दीयते। ततो मिथ्यात्वप्रकृतेः पल्यासंख्यातबहुभागमात्रायामेषु स्थितिकां-
डकेषु बहुषु गतेषु चरमकांडकचरमफालिपतनसमये मिथ्यात्वस्य उच्छिष्टावलिमात्रा निषेका अवशिष्यंते अन्य
कांडकद्रव्यं सर्वं सम्यग्मिथ्यात्वसम्यक्त्वप्रकृतिरूपेण परिणतमित्यर्थः। आवलिमात्रनिषेकाश्च समयं गलं-
ति प्रतिहि समयो नाः ॥ छ ॥ जत्थ असंखेज्जाणं समयपबद्धाणमुदीरणा तत्तो। पल्लासंखेज्जादिमो हारेण असंखलो-
गमिदो ॥२२३। यस्मिन्नवसरे असंख्येयानां समयप्रबद्धानां उदीरणा उपरितनस्थितिस्थितानामुदयावलिप्र-
वेशो भवति। तत्समयादारभ्य उत्तरकाले पल्यासंख्यातभागमात्र एव उदयावलिनिक्षेपार्थः। भागहारो नासं-
ख्यातलोकप्रमितः ॥ छ ॥ मिच्छुच्छिट्ठादुवरिं पल्लासंखेज्जभागिगे खंडे संखेज्जसमतीदे मिस्सुच्छिट्ठं हवे णियमा
।२२४। यस्मिन्समये मिथ्यात्वप्रकृतेरुच्छिष्टावलिमात्रमवशिष्यते। शेषा सर्वापि स्थितिर्बहुभिः स्थितिकांडकैः खंडि-
ता भवति। तस्मात्समयादारभ्य सम्यग्मिथ्यात्वसम्यक्त्वप्रकृत्योः स्थितौ पल्यासंख्यातभागबहुभागमात्रायामेषु
संख्यातसहस्रस्थितिकांडकेषु। गतेषु चरमकांडकचरमफालिपतनसमये मिश्रप्रकृतेरुच्छिष्टावलिमात्रमव-
शिष्यते ॥ छ। मिस्सुच्छिट्ठे समये पल्लासंखेज्जभागिगे खंडे। चरिमे पडिदे चिट्ठदि सम्मस्स ऽडुवस्सठिदिसत्तो ॥२५॥ २३

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

यस्मिन्समये मिश्र प्रकृतेश्चरमकांडक चरम फालि पतने आवलि मात्र स्थिति रवशिष्यते। तस्मिन्नेव समये स-
म्यक्त्व प्रकृति स्थितौ पल्या संख्यात भाग बहु भाग मात्रायामेषु संख्यात सहस्र स्थिति कांडकेषु गतेषु चरम कां-
डक चरम फालि पतने अष्ट वर्ष मात्र स्थिति सत्व मवशिष्यातिष्ठति। मिछस्स चरिम फालिं मिस्से मिस्सस्स चरि
म फालिं तु। संछुहदि हु सम्मत्ते ताहे तेसिं च वर दव्वं ॥२२६॥ मिथ्यात्व प्रकृति स्थितौ पल्या संख्यात भाग बहु भाग मा
त्रायामेषु संख्यात सहस्र स्थिति कांडकेषु गतेषु चरम कांडक चरम फालिं सम्यक्त्व मिथ्यात्व प्रकृतौ निक्षिपति।
सम्यग्मिथ्यात्व प्रकृति स्थितौ पल्या संख्यात भाग बहु भाग मात्रायामेषु संख्यात सहस्र स्थिति कांडकेषु गतेषु च-
रम कांडक चरम फालिं सम्यक्त्व प्रकृतौ निक्षिपति। तस्मिन् चरम फालि पतन समये तयोर्मिश्र सम्यक्त्व प्रकृत्यो-
र्द्रव्य मुत्कृष्टं भवति ॥छ। जदि होदि गुणिद कम्मो दव्व मणुक्कस्स मण्णहा तेसिं। अवर ट्ठिदि मिछदुगे उछिट्ठे सम
यदुगसेसे ॥२२७॥ अयं दर्शन मोह क्षपक आत्मा यदि गुणित कर्मांश: उत्कृष्ट योगादि सामग्री वशेन उत्कृष्ट कर्म
संचयवान् भवति। तदा तयोर्द्रव्य मुत्कृष्टं भवतीति सम्बंध:। अन्यथा यद्युत्कृष्ट संचय वान्न भवति। तदा तयोर्द्रव्य
मनुत्कृष्टं भवति। मिथ्यात्व सम्यग्मिथ्यात्व प्रकृत्यारुछिष्टावल्यां समय द्विके शेषे सति जघन्य स्थिति र्भवति उदया
वलि चरम निषेको भवतीत्यर्थ: ॥छ॥ मिस्सदुग चरिम फाली किंचूणादि वड्ढ समय बद्धपमा। गुणसेढिं करिय त
दो असंखभागेण पुव्वं च ॥२२८। मिश्र सम्यक्त्व प्रकृत्योश्चरम फालि द्वय द्रव्यं किंचिन्न्यून द्व्यर्द्ध गुण हानि मात्र
समय प्रबद्ध प्रमाणं। तथाहि। सम्यग्मिथ्यात्व द्रव्यमिदं [स ७ १२-७ / ७ ख १७ गु] अस्मिन्मिथ्यात्व द्रव्ये [स ७ १२ गु / ७ ख १७ गु ७] संख्यात-
सहस्र स्थिति कांडक गुण संक्रम विधानेनोछिष्टावलि- मात्र निषेकान्वर्जयि- त्वा निक्षि
प्ते सम्यग्मिथ्यात्व द्रव्यमियद्भवति ॥छ। [स ७ १२= / ७ ख १७] अत्रापि संख्यात सहस्र स्थिति कांडक गुण संक्रम विधानेन च
रम कांडक चरम फालिं विहाय इतर कां- डक द्रव्यं सर्वं सर्व द्रव्या संख्यातैक भाग मात्रं [स ७ १२-८ / ७ ख १७७] सम्य

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri



क्त्व प्रकृति द्रव्ये स ७१२- ७ ख २७ गु स्वस्याष्ट वर्षस्थितेरुपरिचरमकांडकचरमफालि द्रव्यं मुक्त्वाऽन्तरसर्वकांडकद्रव्य
मपि गुण संक्रम कालद्विचरमसमयपर्यंतं निक्षिप्य तच्चरमसमये मिश्रचरमफालि द्रव्यं स ७१२ ७ ७ ख २७ ७
सम्यक्त्व चरमफालि द्रव्यं स १७१२-७ ७ ख २७ गु ७ एतद्द्रव्य द्वये मिलिते एवं स १७१२= ७ ख २७ इदं सर्वं मनस्यवधार्य
चार्यैः मिस्स दुग चरिमफा लीकिं चूणादि चट्ट समय वद्धपमा इत्युक्तं। अस्माच्चरम-
फालिद्वय द्रव्यात्पल्यासंख्यातैकभागं स ७१२- ७ ख २७ गु गृहीत्वा सम्यक्त्व प्रकृतेरवशिष्टाष्ट वर्षमात्र स्थितौ उदयावलि
प्रथम समयादारभ्य। प्रागारब्ध गलिता वशेष गुणश्रेणि शीर्ष पर्यंतं। प्रतिनिषेकमसंख्यात गुणित-
क्रमेण निक्षिप्य तदनंतरोपरितनैक समयेप्य संख्यात गुणं। इतः प्रभृत्य वस्थित गुणश्रेणि प्रतिज्ञानात्पुनस्त-
द्बहु भाग द्रव्यमिदं। स ७१२-प ७ ख २७ पु ७ सेसं विसेस हीनं अड वस्सुवरिमठिदीए संछुहदि। चरमाउलिंग सरिसीरयणा
संजायदे एत्तो॥ २२९॥ सेसं विसेस हीण कममित्यादि गुणश्रेण्यायामांतर्मुहूर्त्तकालन्यूनाष्ट वर्षमात्रो
परितनस्थितौ अद्धाणेण सव्वधणे खंडिदेत्यादि। विधानेनानीतं प्रथमनिषेकद्रव्यं स ७१२-१६ ७ ख २७ व ८-१६-व् ८ इद
मुपरितनस्थिति प्रथम समये निक्षिपेत्। पुनर्द्वितीयादि समयेष्वष्ट वर्ष चरमसम यप-
र्यंतं एकादशावशेष हीनक्रमेण निक्षिपेत्। एवं निक्षिप्ते गुणश्रेणिचरमसमय द्रव्यात्तदनंतरोपरितनस्थिति प्रथ
मसमय द्रव्यमसंख्यात गुणितं भवति। पल्यासंख्यात बहुभाग द्रव्यस्य तत्र निक्षेपात्॥ छ॥ अडवस्सादो उवरिं उ-
दयादि अवट्ठिदं च गुणसेढी। अंतोमुहुत्तियं ट्ठिदिखंडं च य होदि सम्मस्स॥ २३०॥ सम्यक्त्व प्रकृतेरष्टवर्षमात्रस्थि
तिकरणसमयादूर्ध्वमपि न केवलमष्ट वर्षमात्रस्थितिकरणसमय एवोदयाद्यवस्थित गुणश्रेणिरित्यर्थः। सम्य-
क्त्व प्रकृतेरंतर्मुहूर्त्तायामस्थिति खंडं भवति। छ। बिदियावलिस्स पढमे पढमस्संते च आदिमणिसेये। तिद्वाणाणं
तगुणेण णूणकमो वट्टणं चरमे॥ २३१॥ यस्मिन्समये सम्यक्त्व प्रकृतेरष्ट वर्षमात्रस्थितिमवशेषयन् चरमकांडक- २४

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

चरमफालिद्वयं पातयति। तस्मिन्नेव समये सम्यक्त्व प्रकृतिनुभाग सत्वमतीतानंतर समय निषेकानुभाग स-
त्वादनंत गुणहीन मवशिष्यते। तद्यथा। सम्यक्त्व प्रकृतेश्चरम कांडक द्विचरम फालिद्वयपतन पर्यंतं लतादारु-
समद्विस्थानानुभाग सत्वं कांडक घात वशेनानंत गुणहीन मायातं पुनश्चरम फालि द्वयपतन समये अनंतगुण
हान्यापकृष्य लता समानैकस्थानं सम्यक्त्व प्रकृत्यनुभाग सत्वमजनिष्ट इतः प्रभृत्यंतर्मुहूर्त्त कालसाध्यो ऽनुभाग-
कांडक घातो नास्ति। किंतु प्रतिसमय मनंत गुणहान्यानुभागापवर्त्तनं प्रवर्त्तते। अतीतानंतर समय निषेकानुभा
ग सत्वा | ९ना | दिदानी मष्टवर्षावशेषकरण प्रथम समये उदयावल्युपरितनावलि प्रथम निषेकानुभाग सत्व
मनंत गुणहीनं | ९ना ख | इदमवशिष्टं शेष बहुभागाः | ९नाख ख | अपवर्त्तिताः खंडिताः तदानीं तन विशुद्धि विशेष-
माहात्म्याद्विना | | शिता इत्यर्थः। तथा तस्मिन्नेव | | समये द्वितीयावलि प्रथमनिषेकानुभाग सत्वादु
दयावलि चरम निषेकानुभाग सत्वादुदयावलि चरमनिषेकानुभागसत्वमनंत गुणहीनमवशिष्यते [redacted]
| ९ना खख | शेषास्तद्बहुभागा अपवर्त्तिता | ९नाखख खख | तथा तस्मिन्नेव समये उदयावलिचरमनिषेकानुभागसत्वा
त्तत्प्रथम निषेकानुभाग सत्व | | मनंत गुणहीनमवशिष्यते | ९ना खखख | शेषास्तद्बहुभागा अप
वर्त्तिताः | ९नाखखखख खखखख | एवमनंत गुणहीन मनुभागापवर्त्तन मष्टवर्ष द्वितीया | | दि समयेष्वपि प्रतिस-
मयम- | | नंत गुणहीनक्रमेणाष्टवर्षस्थितौ चरमे समयाधिकावलिं यावन्न प्राप्नोति तावत् ज्ञात
व्यं उच्छिष्टचरमावल्यां तु अतीतानंतर समय निषेकानुभाग सत्वादुदयावलि प्रथमनिषेकानुभागसत्व मनंत
गुणहीनं तस्मात्तदनंतर समये उदय निषेकानुभाग सत्वमनंत गुणहीनं। एवं प्रतिसमय मनंत गुणहीनक्र
मेणोच्छिष्टावलि चरमसमय पर्यंतमनुभागापवर्त्तनं ज्ञातव्यं ॥छ॥ अडवस्से उवरिंपि विदु चरिमखंडस्स चरि
मफालित्ति। संखातीदगुणक्कम विसेसहीणक्कमं देदि ॥१३२। यथा मिश्र द्विक चरम फालि द्रव्यं सम्यक्त्व प्रकृति

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri



स्थितेरष्टवर्षमात्रावशेषकरणसमये उदयसमयाद्यवस्थितगुणश्रेण्यायामे प्रतिसमयमसंख्यातगुणितक्रमे
णांतर्मुहूर्त्तोनाष्टवर्षमात्रोपरितनस्थितौ चविशेषहीनक्रमेण निक्षिप्तं। तथोपर्यपि प्रथमकांडकप्रथमफालिपत
नसमयात्प्रभृति द्विचरमकांडकचरमफालिपतनसमयपर्यंतं उदयाद्यवस्थितगुणश्रेण्यायामे। प्रतिनिषेक-
मसंख्यातगुणितक्रमेणांतर्मुहूर्त्तोनाष्टवर्षमात्रोपरितनस्थितौ च विशेषहीनक्रमेणापकृष्टद्रव्यं फालिद्रव्यं च
निक्षेप्तव्यं। छ। अडवस्सेसं पडियं पुव्विल्लादो असंखसंगुणियं। उवरिं पुणसंपहियं असंखसंखं च भागं तु। १३३
सम्यक्त्वप्रकृतिस्थितेरष्टवर्षावशेषकरणसमयात्प्राक्तनानंतरसमये मिश्रसम्यक्त्वप्रकृतिद्विचरमफा-
लिपतनयोग्ये सम्यक्त्वप्रकृतिसत्वद्रव्यमिदं स ७२२- ७ ख २७ गु। यद्यपि गुणसंक्रमकालप्रथमसमयादारभ्य तत्का
लचरमसमयपर्यंतं। प्रतिसमयमसंख्यातगुणितक्रमेण गुणसंक्रमद्रव्यमायाति। स ७२२-[illegible]७ ७ ख २७ गु
तथापि गुणसंक्रमसामान्यविवक्षया सम्यक्त्वप्रकृतिसत्वद्रव्यं लिखितं। स ७२२- ७ ख २७ गु इदं दिवड्ढ
गुणहानिभाजिदे पढमा इत्यनेन विधानेन उदयप्रथमनिषेकादारभ्य विशेषहीनक्रमेण नानागु
णहानिषु विद्यत इति तथान्यासी कुर्यात्। अस्मिन् सत्वद्रव्ये तत्कालापकृष्टद्रव्यमिदं स ७२२- ७ ख २७ गु उ ७ पल्यासंख्या
तभागेन खंडयित्वा तद्बहुभागं स ७२२-प ७ ख २७ गु उ ५७ ७७ उपरितनस्थितौ दिवड्ढगुणहानिभा- जीत्यादिवि
धानेनापकृष्टस्याधःप्रतिष्ठाप [स्था] नावलीं मुक्त्वा विशेषहीनक्रमेण दद्यात्। पुनस्तदेकभागं —
स ७२२- ७ ख २७ गु उ ७ पुपु पल्यासंख्यातभागेन खंडयित्वा बहुभागं स ७२२-पु ७ ख २७ गु उ ७ पुपु गुणश्रेण्यां दद्यात्। अ
वशिष्टैकभागं उदयावल्यां दद्यात्। तन्निक्षेपन्यासोयं- अनेन गुणश्रेणिद्रव्ये
णसहितं सम्यक्त्वप्रकृतिसत्वद्रव्यं दृश्यमित्युच्यते- सर्वत्र कालापकृष्टद्र
व्यमुदयप्रथमसमयात्प्रभृति निक्षिप्यमाणं दीयमानं तेन सहितं सर्वसत्वद्रव्यं दृश्यमानमिति राद्धांतवचना २५

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

चरमफालि




तु। एवं निक्षिप्तद्रव्यमानन्या सोयं। तद्यथा उ-
दयावल्यां दत्तद्रव्यं प्राक्तनसत्वद्रव्यस्यासंख्या
तैकभागमात्रमितितेन सत्वद्रव्यं साधिकं भ-
वति। इदानीं गुणश्रेण्यां दत्तद्रव्यं प्राक्तनसत्व-
द्रव्याद संख्यातगुणं। गुणश्रेणि द्रव्यस्यापक-
र्षणभागहार सद्भावात्। सत्वद्रव्यस्यासंख्या
तैकभागमात्रत्वदर्शनात्कथं ततोऽसंख्यात-
गुणितं गुणश्रेणि द्रव्यमिति चेत्। पल्यप्रवि-
ष्टासंख्यातभागहार बाहुल्य सामर्थ्यादिति-
ब्रूमः अतःकारणात् गुणश्रेण्यायाममात्रस
त्वनिषेकानिदानीं गुणश्रेण्यां निक्षिप्यमाण
निषेके ष्वधिकं कुर्यात्। पुनरुपरितन स्थितौ गुणश्रेणिकरणेन निक्षिप्तं द्रव्यं तत्स्थितौ प्राक्तन सत्वद्रव्यस्या
संख्यातैकभागमिति सत्वद्रव्ये इदानीं निक्षिप्त द्रव्यमधिकं कुर्यात्सत्वद्रव्यमपेक्ष्यापकृष्ट द्रव्यस्यापकर्षणभा
गहार सद्भावात्। इदानीं निक्षिप्त द्रव्यं तद संख्यातभागमात्रं सिद्धं। अत्र ऋणधनयोर्विवरणमुच्यते। उपरित-
नस्थितौ प्राक्तन सत्व प्रथमनिषेके ऋणमिदं | स७१२-२७ ७ख१७गु१२१२६ | तदा निक्षेप्य द्रव्य मात्रं धनमिदं | स७१२-२६ ७ख१७गुउ१२१२६ |
तत्कालापकर्षणभागहारेण ऋणद्रव्यं समच्छे- दीकृत्य द्व्यर्द्ध गुणहानिमात्र-
समय प्रबद्धस्य गुणकार भूतासंख्यात रूपाणि धन द्रव्यस्य गुणकार भूत द्विगुणगुणहान्यामपनयेत्। अव-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri



शिष्टधनमिदं स्थितिद्रव्य प्र (स७२२-२६।७ / ७ख२७गुउं२२।२६ / ७) थमनिषेकई द्रव्य भवति (स७२२-।२६ / ७ख२७गु२२।२६) प्राक्तनोपरितनस्थितिसत्व प्रथमनिषेके ऽधिकं कुर्यात्। एवं कृते उपरितन-
एवमुपरितनस्थितौ द्वितीयादिस-
त्वनिषेकेषु तत्कालापकृष्ट निक्षेप द्वितीयादिनिषेकानुक्रमेण धन विवरणचयविशेषान् प्रक्षिपेत्।
एवं प्रक्षिप्ते द्वितीयादिद्रव्यनिषेकाः प्रथमादिद्रव्यनिषेकेभ्य एकैकचयहीना अवतिष्ठंते। एवं कृते मिश्रद्विक-
द्विचरमफालिपतनयोग्यगुणसंक्रमकालद्विचरमसमये सम्यक्त्व-
प्रकृतिसर्वद्रव्य द्रव्यन्यासोयं। तदनंतरसमये मिश्रसम्यक्त्व प्रकृतिचर-
मफालिद्रव्य द्रव्यमष्टसमयावस्थित निषेक प्रमाणेन प्रागुक्तसम्यक्त्व-
प्रकृतिसत्वेन द्व प्रमाणं मि- (स७२२- / ७ख२७गु) एतावता न्यूनद्व्यर्द्ध गुणहानिमात्र समय प्रब-
स्सद्दुग इत्यादि गाथाव्याख्यानोक्त विधानेन-
उदयाद्यवस्थित गुणश्रेण्यामुपरितनस्थितौ चांतर्मुहूर्तो नाष्टवर्ष प्रमि-
तायां निक्षिपेत्। पुनस्तदनंतरसमये सर्वस्मात्सम्यक्त्वप्रकृतिद्रव्यादं द-
स्मादपकृष्टैकभागं भाग मुदय प्रथमस (स७२२-।१ / ७ख२७उं) पल्यासंख्यातभागेन खंडयित्वा तदेक-
मयादारभ्यातीतानंतरचरमफालिगु-

| | |
|---|---|
| स७२२-।२६।व८- <br> ७ख२७गु२२।२६ <br> स७।२२ : २६ <br> ७ख२७गु२२।२६ | उपरितन |
| स७२२।६४ <br> ७ख२७गुउं पु८५ <br> : <br> स७२२-।१ <br> ७ख२७गुउं पु८५ | गुणश्रेणि |
| स७२२-२६-४ <br> ७ख२७गु२२।२६ <br> : <br> स७२२।२६ <br> ७ख२७गु२२।२६ | उदयावलि |

णश्रेणि शीर्ष पर्यंतं प्रतिनिषेक प्रतिज्ञानात्। शेषबहुभागं खंडिदे इत्यादि विधानेन विशेषहीनक्रमेण निक्षिपेत्। त- (स७२२प / ७ख२७उं७पु) उपरितनस्थितौ अद्धाणेण सव्वधणे
स्मिन्नेव समये प्रथमकांडक प्रथम-
फालिद्रव्यं कांडकद्रव्यस्याधाप्रवृत्तभागहारभक्तस्यैकभागमात्रं इदमपकृष्टद्रव्यस्या- (स७२२- / ७ख२७छे / ७७१) संख्यातेक-
भागमात्रमिति मत्वा ऽपकृष्टद्रव्ये ऽधिकं कृत्वा निक्षिप्तमिति न पृथग् लिखितं। एवं सम्य- स्वष्टवर्ष- २६

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

मात्रावशेष तृतीयादिसमयेष्वपि। प्रथम कांडकद्विचरम फालिपतन समयपर्यंतं प्रति समय मसंख्यातगु-
णितक्रमेणापकृष्ट द्रव्यं। फालि द्रव्यं च तत्कालोदय समयादारभ्य प्राक्तनानंतरोपरितनस्थिति प्रथमनि-
षेक पर्यंत मवस्थित गुणश्रेणि विधानेन तदुपरितनस्थितौ चविशेष हीनक्रमेण निक्षिपेत्। पुनः प्रथम कां-
डकचरम फालि द्रव्यमिदं। स ७१२१ / ७ ख २७।१७ अस्योत्पत्तिक्रमेक्षय मंतर्मुहूर्तमात्रायामेनयद्येकं स्थिति कांडकमा
कार्यते लांछते तदाष्टवर्ष- मात्रायामे कियंति स्थिति कांडकानि लांछ्यंते। इति प्र २१। फ १। इ व ८।
त्रैराशिकेन स्थिति कांडकानि १ एतावद्भिः कांडकैः यद्येतावद्द्रव्यं निक्षिप्यते इति प्र २ / कां | फ स ७१२१ / ७ ख २७ | इ कां १ | लब्धैककांड-
कद्रव्यं स ७१२२- / ७ ख २७।१ अस्मात्प्रथमादि द्विचरम फालिपर्यंत मथा प्रवृत्तहारेण प्र- तिसमयम-
संख्या- तगुणितक्रमेणगृहीत्वा निक्षिप्त द्रव्यं कांडक द्रव्यस्यासं- ख्यातैक भाग
मात्रं स ७१२२- / ७ ख २७।२७ अस्मिन् कांडकद्रव्यादपनीते ऽवशिष्ट बहुभाग मात्रं चरम फालिद्रव्य मुत्पद्यते। एवं सर्वकां-
डके ष्वु चरम फालिद्रव्यानयनं ज्ञातव्यं। तच्च प्रथम कांडक चरम फालि द्रव्यं पल्यासंख्यातभा-
गेन खंडयित्वा तदेकभाग मुदय प्रथम समयादारभ्य द्विचरम फालि पतन समयनिक्षिप्त द्रव्योपरितन स्थि-
ति प्रथम निषेक पर्यंत मसंख्यात गुणित क्रमेण निक्षिप्य शेष बहुभाग द्रव्यं तदुपरितन स्थिति निषेकेषु विशे-
षहीन क्रमेण निक्षिपेत्। एवं भवति अडवस्से संपहियमित्यादि सम्यक्त्व प्रकृति स्थितेरष्ट वर्षावशेष करणस-
मये पतित मिश्र द्विक चरम फालिद्रव्यं स ७१२२- / ७ ख २७ इदं पुव्विल्लादो ऽसंखसंगुणियं प्राक्तनानंतर समये द्विचरम
फालिपर्यंत मागत गुणसंक्रम द्रव्येण स ७१२२- / ७ ख २७ गु / ७ सहितात्सम्यक्त्व प्रकृतिसत्व द्रव्यात् स ७१२२ / ७ ख २७ गु / ७
असंख्यात गुणितं यथायोग्य गुणसंक्रम भागहा- रभक्तात्तद्भागहार रहितस्यासंख्यात
गुणितत्वसंभवात् उवरिं पुणसंपहियं। अष्टवर्ष द्वितीय समयादारभ्य प्रथम कांडकद्विचरम फा-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri



लिपतन पर्यंतमपकृष्ट द्रव्यमष्टवर्ष प्रथम समय द्रव्यादसंख्यात गुणहीनं। तत्रापकर्षण भागहार संभवात् च
रम फालि द्रव्यं तु अष्टवर्ष प्रथम समय द्रव्यात्संख्यातैक भाग मात्रं कांडक संख्यया संख्यात प्रमितया सर्व द्रव्य
स्य विभक्तत्वात्। छ। ठिदिखंडाणुक्कीरणदुचरिम समयोत्ति चरिम समये च उक्कट्टिद फालीगद दव्वाणि-
णिसिंच देज्जा ॥ १३४ ॥ अष्टवर्ष प्रथम समय द्रव्यात् द्वितीयादि समयेषु स्थिति कांडकोत्करण काल द्विचर-
म समय पर्यंतेषु अपकृष्ट द्रव्यस्यासंख्यात गुणहीनत्वे। प्रथम कांडक चरम फालि द्रव्यस्य संख्यात गुणहीन-
त्वे च कारणोपन्यासार्थमिदं सूत्रमागतं। तथाहि। सम्यक्त्व प्रकृतेरष्टवर्षमात्रास्थितेरंतर्मुहूर्त्त मात्रायामस्थितिकां
डकानि अष्टवर्षकरणाद्द्वितीय समये प्रारब्धानि तेषां प्रथमादि द्विचरम कांडक पर्यंतानां स्थिति कांडकानां प्रत्ये
कमुत्करण कालः यथायोग्यांतर्मुहूर्त्त मात्रः। तत्प्रथम समयादारभ्य तद्द्विचरम समय पर्यंतं फालि द्रव्य सहि
तमपकृष्ट द्रव्यं निक्षिप्यते। तच्च सम्यक्त्व प्रकृति सत्व द्रव्यादपकर्षण भागहार वशात् असंख्यात गुणहीनं -
जातं स्थिति कांडकोत्करण काल चरम समये चरम फालि द्रव्यं। सर्व द्रव्यस्य संख्यातैक भाग मात्रं दीयते। इति
हेतोरुवरिं पुण संपहियं। असंखं संखं च भागं तु। इत्यनंतरातीत गाथा पश्चार्द्ध कथितोर्थः सिद्धः॥ छ॥ अडव-
स्से संपहियं गुणसेढी सीसयं असंखगुणं। पुव्विल्लादो णिय माउवरिं विसेसाहियं दिस्सं ॥ १३५ ॥ अष्टवर्षकरण-
प्रथम समये निक्षिप्तमिश्र द्विक चरम फालि द्रव्यस्योपरितन स्थिति प्रथम निषेक द्रव्यं दृश्यं | स ७१२।१६ ७ ख१७ च८-१६ ख ५ २ |
इदमस्मिन्प्रस्तावे गुण श्रेणि शीर्षमित्युच्यते। तस्याधस्तनाद्गुणश्रेणि चरम निषेकात् रूपो
नपल्यासंख्यात गुणकारेण गुणितत्वात् गुणस्य गुणकारस्य श्रेणिः पंक्तिः गुणश्रेणिस्तस्याः शीर्षमग्रमवसान
मिति व्युत्पत्त्या अग्रेणोपरितन स्थिति प्रथम निषेकस्य गुणश्रेणि शीर्षत्व सिद्धेः। इदं पूर्वस्मान्मिश्र द्वय द्विचरम-
फालिपतन समय गुणश्रेणि शीर्ष दृश्य द्रव्यात् | स ७१२।१६ ७ ख१७ पु८५ | असंख्यात गुणमेव नान्यथा। उपर्यष्ट वर्ष द्वितीय २७

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

समय गुणश्रेणि शीर्षदृश्य द्रव्यात् विशेषाधिकमेव नासंख्यात गुणं। तद्यथा। अष्टवर्ष प्रथम समय गुणश्रे-
णिशीर्षदृश्य द्रव्यमिदं (स७१२२।१६ / ७ ख१७व८-१६-च८- / २) अस्य द्वितीय समये आगतं धनमिदं (स७१२२।१६४ / ७ ख१७उपु८२) अष्टवर्षो-
परितनास्थिति द्वितीय- निषेक दृश्य द्रव्यमिदं (स७१२२।१६।१ / ७ ख१७व८-१६।व८- / २) तस्यैक-
णमेकविशेषमात्रमिदं (स७१२२।१ / ७ ख१७व८-१६-च८- / २) द्वितीय समये गुणश्रेणि शीर्षद्रव्य धनमिदं
(स७१२२।१६ / ७ ख१७उच८-१६-च८- / २) अस्मात्साक्तन चयमात्रऋणमसंख्यात गुणहीनं द्विगुण गुणहा-
निमात्र गुणकाराभावात्। द्वितीय समय गुणश्रेणि चरम निषेक द्रव्यं (स७१२२।१६४ / ७ ख१७उपु८२)
नि इदं चासंख्यात गुणहीनं रूपोनपल्यासंख्यात मात्र गुणकाराभावात्। एतदेक चय मात्रऋण-
द्रव्यं द्वितीय समय गुणश्रेणि चरम निषेक द्रव्यं च तद्गुणश्रेणि शीर्ष द्रव्ये किंचिन्न्यूनं कृत्वा द्विगुणगुणहान्यात्र
पकर्षण भागहारमपवर्त्य अवशिष्टासंख्यात रूपाणि (स७१२-७ / ७ ख१७व८-१६व८- / २) अष्ट वर्ष प्रथम समय गुणश्रेणिशी-
र्षसमाने तदनंतरोपरितन निषेके निक्षिपेत्। एवं कृते अष्टवर्ष प्रथम समय गुणश्रेणिशी-
र्षदृश्य द्रव्यात्। तद्द्वितीय समय गुणश्रेणि शीर्षदृश्य द्रव्यं साधिकमेव भवति। (स७१२२।१६ / ७ ख१७व८-१६।व८ / २) एवं तृतीया-
दि समयेषु गुणश्रेणिशीर्षदृश्य द्रव्यं पूर्व पूर्व गुणश्रेणि शीर्षदृश्य द्रव्यात्साधिकमेव नान्यथा
॥ छ॥ अडवस्सेय ठिदीदो चरिमेदर फालि पडिद दव्वं खु। संखासंख गुणूणं तेणुवरिमादिस्समाण महियं सी-
से ॥२३६। पूर्व पूर्व गुणश्रेणिशीर्षदृश्य द्रव्यादुत्तरोत्तर समय गुणश्रेणि शीर्षदृश्य द्रव्यं विशेषाधिकमित्यत्रोप-
पत्ति प्रदर्शनार्थमिदमाह। तद्यथा। अष्टवर्ष प्रथम समये उदयादि चरम स्थिति पर्यंतं ये निषेकाः संति तेष्वेकैकनि-
षेकं प्रेक्ष्य प्रथम कांडक चरम फालि द्रव्यस्योदयादि चरमस्थिति पर्यंतं निक्षेप्य निषेकाः प्रत्येकं संख्यात गुण-
हीनां दीयंते। अष्टवर्षद्वितीय समयादि प्रथम कांडक द्विचरम फालि पतन समय पर्यंतमपकृष्ट द्रव्यस्य ये निषे-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

कास्ते पुनः प्रत्येकमसंख्यातगुणहीनानि निक्षिप्यंते। ततः कारणात्तत्र विवक्षितसमये ऽपकृष्टद्रव्यस्य गुणश्रेणि
शीर्षद्रव्यं। तदधस्तननिषेकद्रव्यादसंख्येयगुणं धनमागच्छतीति गुणश्रेणिशीर्षनिषेके दृश्यं विशेषाधिकमि
ति भावः॥छ॥ जदि गोउछविसेसं रिणं हवे तो विधणपमाणादो। जासि असंखगुणूणं णागणिज्जदि तं तदो ए-
त्थ।२३७। अनंतरोक्तविधानेन विवक्षितगुणश्रेणिशीर्षनिषेके दृश्यद्रव्यं तदधस्तनगुणश्रेणिशीर्षदृश्यद्रव्या
त् विशेषाधिकमित्यत्र एकचयमात्रऋणमस्तीत्याशंक्य तत्परिहारार्थमिदं सूत्रमाह। यद्यप्यष्टवर्षगुणश्रेणि
शीर्षस्यानंतरनिषेके गोपुछचयमात्रऋणमस्ति तथाप्यष्टवर्षद्वितीयसमये ऽपकृष्टद्रव्यस्य गुणश्रेणिशी-
र्षनिक्षिप्तनिषेकद्रव्यादष्टवर्षप्रथमसमयगुणश्रेणिशीर्षस्योपरितनानंतरनिषेकगतऋणमसंख्येयगु
णहीनं यस्मात्कारणात्तेन कारणेनोपरितनगुणश्रेणिशीर्षदृश्यमानं साधिकमेवेति निर्णेतव्यं। धनादृणस्या
संख्यातगुणहीनत्वेनागणनात् यावच्चय एकादेशो वर्त्तते तावद्गोपुछविशेष इत्युच्यते। क्रमहान्यपेक्षया गो-
पुछ एव गोपुछ इति गौणशब्दाश्रयणात्॥छ। तत्तकाले दिस्सं वज्जिय गुणसेढीसीसयं एक्कं। उवरिमठिदी-
सु वट्टदि विसेसहीणक्कमेणेव॥३८। एवमुक्तप्रकारेण सम्यक्त्वप्रकृति द्रव्यं यदा यदाऽपकृष्य उदयादिस्व
स्थितिचरमसमयपर्यंतनिषेकेषु निक्षिप्यंते। तस्मिन् तस्मिन् समये गुणश्रेणिशीर्षद्रव्यं दृश्यमेकैकं वर्जयि-
त्वा तदुपरितनसर्वनिषेकेषु तत्कालभावि दृश्यं विशेषहीनक्रमेणैव वर्त्तते। तत्र प्रकारांतरासंभवात्। एवमष्ट
वर्षमात्रसम्यक्त्वप्रकृतिस्थितेः प्रथमकांडकविधानेनैव द्विचरमकांडकचरमफालिपर्यंतं अपकृष्टफालि-
द्रव्ययोर्निक्षेपक्रमः दृश्यक्रमश्च व्यामोहेन ज्ञातव्यः॥छ॥ गुणसेढि संखभागा तत्तो संखगुण उवरिमठि-
दीऊ सम्मत्तचरिमखंडो दुचरिमखंडादु संखगुणो॥२३९। अष्टवर्षप्रथमसमयादारभ्य सम्यक्त्वप्रकृते
र्द्विचरमकांडकचरमफालिपतनसमयपर्यंतं क्षपणविधानमभिधाय। इदानीं तच्चरमकांडकप्रमाणम २८

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

ल्पबहुत्वपुरस्सरं प्रतिपादयितुमिदमाह। अष्टवर्षप्रथमसमयादारभ्योदयाद्यवस्थितायामाग्रद्यया-
वद्गुणश्रेणी कृता तस्याः संख्यातबहुभागेन | २२७।३/४ | पूर्वकरणप्रथमसमयादारभ्याष्टवर्षातीतानंतर-
समयपर्यंतं या गलितावशेषायामा गुणश्रेणी कृता तस्याः अपूर्वानिवृत्तिकरणकालद्वयादधिकशीर्ष-
स्य | २२/४ | संख्यातैकभागेन | २१/४४ | अवस्थितगुणश्रेणिशीर्षस्योपरितनस्थितौ द्विचरमकांडकस्याधः यावंतो
नि-षेका अवशिष्टास्ते म्यावस्थितगुणश्रेणिबहुभागैः संख्यातगुणैः। २२७४४। परिमितं सम्यक्त्व-
प्रकृतिचरमकांडकमिदानीं लांछितं पुरातनगलितावशेषगुणश्रेण्यधिकशीर्षसंख्यातैकभागादारभ्यो-
परितनस्थित्यवशिष्टचरमनिषेकपर्यंतं चरमकांडकप्रमाणमित्यर्थः। इदं द्विचरमकांडकायामप्रमाणा-
त्। २२७४४। संख्यातगुणितं सदपि तद्योग्यांतर्मुहूर्त्तप्रमाणमेवेति ग्राह्यं। तथा सति तच्चरमकांडकप्रमाणमिय-
द्भवति। २२७४४४। चरमकांडकस्याधः अवशिष्टप्रमाणं च | २२७/४ | इदमवस्थितगुणश्रेण्यायामसंख्यातैकभाग-
मात्रं भवदपि गलितावशेषगुणश्रेण्यधिकशीर्षसंख्यातबहुभागमात्रेण कृतकृत्यवेदककालेन कांडको-
त्करणकालप्रमितेनानिवृत्तिकरणकालगलितावशेषेण च | २१/४ | निष्पन्नप्रमाणं | २१।४४ | अपवर्तितमेवं।२२।
।ह्। सम्मत्तचरिमखंडे दुचरिमफालित्ति तिणि पव्वाउ। संप-
हियपुव्वगुणसेढीणं सीसेय चरिमे-
य।२२७४। सम्यक्त्वप्रकृतिचरमखंडप्रथमफालिपातनसमयादारभ्य तद्द्विचरमफालिपातनसमयपर्यंतं
तत्कांडकोत्करणकाले फालिद्रव्यस्यापकृष्टद्रव्यस्य च निक्षेपविशेषविधानार्थमिदं सूत्रमाह। नेमिचंद्रसिद्धां-
तचक्रवर्ती। तद्यथा। तत्र सम्यक्त्वप्रकृतिचरमकांडकप्रथमफालिपातनसमये या उदयाद्यवशिष्टस्थितिचर-
मनिषेकपर्यंतायामा गलितावशेषमात्री गुणश्रेण्याः ख्यातच्छीर्षपर्यंतमेकं पर्व ततः परं पूर्वावस्थितगुणश्रेणि-
शीर्षपर्यंतमेकं पर्व ततः परमुपरितनस्थितिचरमनिषेकपर्यंतमेकं पर्व इति द्रव्यनिक्षेपपर्वत्रयं रचयितव्यं

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri



अत्रायं विशेषः फालिद्रव्यनिक्षेपे तु त्रीण्यपि पर्वाणि भवंतीति ज्ञातव्यं। तत्थासंखेज्जगुणं असंखगुणहीणयं विसेसूणं। संखातीदगुणूणं विसेसहीणं च दत्तिकमो॥२५२॥ प्रागुचितपर्वत्रये द्रव्यनिक्षेपक्रमविशेषप्रतिपादनार्थं गाथाद्वयमाह। तत्र सांप्रतिकगुणश्रेणिशीर्षपर्यंते प्रथमे पर्वणि द्रव्यमसंख्येयगुणं दीयते। तथाहि। सम्यक्त्वप्रकृतिचरमकांडकद्रव्यं किंचिन्न्यूनद्व्यर्द्धगुणहानिगुणितसमयप्रबद्धमात्रं स७१२ ७ख२७ प्राग्गलितनिषेकैस्सर्वद्रव्यासंख्यातैकभागमात्रन्यूनत्वात् स७१२ ७ख२७ तत्कालोचितापकर्षणभागहारेण विभक्तादेकभागं स७१२ ७ख२७उ ७ पल्यासंख्यातभागेन खंडयित्वा तद्बहुभागं स७१२प ७ख२७उ७पु ७ प्रथमे पर्वणि उदयनिषेकादारभ्य गुणश्रेणिशीर्षपर्यंतमसंख्यातगुणितक्रमेण प्रक्षेपकरणविधिना निक्षिपेत्। पुनरपकृष्टद्रव्यासंख्यातैकभागं पुनरपि पल्यासंख्यातभागेन खंडयित्वा तद्बहुभागं द्वितीये पर्वणि प्रथमपर्वायामात् संख्यातगुणितायामे अद्धाणेण सव्वधणेत्यादिविधानेन स्वचरमनिषेकपर्यंतं विशेषहीनक्रमेण निक्षिपेत्। पुनरपि शिष्टैकभागं तृतीयस्मिन् पर्वणि उपरितनस्थितिप्रथमसमयादारभ्य तच्चरमनिषेकपर्यंतं द्वितीयपर्वायामसंख्यातगुणाद्विचरमकांडकायामात् २२४४ संख्यातगुणितायामे २२४४४ अद्धाणेण सव्वधणेत्यादिविधानेन विशेषहीनक्रमेण तत्तदपकृष्टनिषेकस्याधस्तादतिस्थापनावलिं मुक्त्वा निक्षिपेत्। अत्र सांप्रतगुणश्रेणिशीर्षनिक्षिप्तद्रव्यात् कांडकप्रथमनिषेके निक्षिप्तद्रव्यमसंख्यातगुणहीनं तदपकृष्टद्रव्यासंख्यातबहुभागस्य प्रथमपर्वणि निक्षेपात्तदेकभागस्य च द्वितीयपर्वणि निक्षेपात्। तथा द्वितीयपर्वचरमनिषेके निक्षिप्तद्रव्यात् तृतीयपर्वप्रथमनिषेके निक्षिप्तद्रव्यमसंख्यातगुणहीनं एकभागासंख्यातबहुभागस्य द्वितीयपर्वणि निक्षेपात् शेषैकभागस्य च तृतीयपर्वणि निक्षेपात्। एवं चरमकांडकप्रथमफालिपातनसमयादारभ्य तद्विचरमफालिपातनसमयपर्यंतं द्रव्यनिक्षेपक्रमो। २८

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri


विशेषेण ज्ञातव्यः ॥ छ ॥ उदयादि गलिदसेसा चरिमे खंडे हवेज्ज गुणसेढी। पाडेदि चरिम फालिं अणियट्टी
करण चरिमम्हि । २४२ । सांप्रत गुणश्रेणि स्वरूप निर्देशपूर्वकं चरम फालि पातन काल निर्देशार्थमिदं सूत्रमाह।
सम्यक्त्व प्रकृति चरम कांडक प्रथम फालि पातन समयादारभ्य विधीयमाना गुणश्रेणी तच्चरम फालि पात-
न पर्यंतं उदय समयादि गलितावशेषायामा वेदितव्या पूर्वोक्त विधानेन द्विचरम फालि पातने एक समयावशे-
षः कांडकोत्करण कालः। अनिवृत्ति करण कालश्च परिसमाप्तः। पुनरवशिष्टे निवृत्ति करण काल चरम समये
सम्यक्त्व प्रकृति चरम कांडक चरम फालिं पातयति ॥ छ ॥ चरिम फालिं देदि हु पढमे पव्वे असंख गुणियकमे
अंतिम समयम्हि पुणो पल्ल असंखेज्ज मूलाणि । २४३ । सम्यक्त्व प्रकृति चरम कांडक चरिम फालि निक्षेप क्रम प्र-
दर्शनार्थमाह। गलितावशिष्ट कृतकृत्य वेदक काल प्रमिते सांप्रत गुणश्रेण्यायामे अनिवृत्तिकरण काल चर-
म समये सम्यक्त्व प्रकृति चरम कांडक चरम फालि द्रव्य मुत्कीर्य निक्षिपति। तद्यथा। तच्चरम फालि द्रव्यं किंचिन्मू-
न द्व्यर्द्ध गुणहानि गुणित समय प्रबद्ध मात्रं [स ७ १२ - / ७ ख ८७] सर्व द्रव्यस्याधो गलित निषेकैः कृतकृत्य कालांतर्मुहूर्त-
मात्र निषेकैश्च न्यूनत्वात् तच्चरम फालि द्र-व्य मसंख्यात गुणित पल्य प्रथम वर्गमूल मात्र भागहा-
रेण [मू ७] अनेन खंडयित्वा तदेक भागं [स ७ १२ - / ७ ख ८७ मू ७] उदय समयात्प्रभृति सांप्रत गुणश्रेणि द्विचरम समय पर्यं-
तं प्रक्षेपक विधिना प्रति निषेक मसंख्या-त गुणित क्रमेण निक्षिपेत्। अत्रायं विशेषः द्वितीय निषे-
के निक्षेप गुणकारात् तृतीय निक्षेपे गुणकारः असंख्यात गुणित गुणकार गुणितः। एवं द्विचरम निषेक-
पर्यंतं गुणकार क्रमो ज्ञातव्यः। अवशिष्ट बहुभाग द्रव्यं [स ७ १२ मू ७ / ७ ख ८७ मू ७] इदं सांप्रत गुणश्रेणी चरम निषेके नि-
क्षिपेत्। इदं सर्वं मनसि कृत्य सांप्रत गुणश्रेण्याः उदय निषेकात्प्रभृति द्विचरम निषेक पर्यंतं-
प्रथम पर्वेत्युक्तं। चरम निषेको द्वितीयं पर्वेत्युक्तं। छ। चरिमे फालिं दिण्णे कदकरणिज्जोत्ति वेदगो होदि सो वा

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri



मरणं पावइ चउगइगमणं च तट्ठाणे। २४४। कृतकृत्यवेदकसम्यक्त्वप्रारंभसमयनिर्देशपूर्वकं तदवस्थावि
शेषप्ररूपणार्थमिदं सूत्रद्वयमाह। प्रागुक्तविधानेन अनिवृत्तिकरणचरमसमये सम्यक्त्वप्रकृतिचरम-
कांडकचरमफालिद्रव्ये अधो निक्षिप्ते सति तदनंतरोपरितनसमयात्प्रभृति पुरातनगलितावशेषगुण
श्रेण्यधिकशीर्षसंख्यातबहुभागमात्रेंऽतर्मुहूर्तकाले २२३/४४४ कृतकृत्यवेदकसम्यग्दृष्टिरिति जीवः संज्ञाय
ते। दर्शनमोहक्षपणयोग्यस्थितिकांडकादिकरणीय स्यानिवृत्तिकरणकालचरमसमये एव निष्ठि
तत्वात् कृतं निष्ठितं कृत्यं करणीयं यस्य सः कृतकृत्य इति निरुक्तिसंभवात्। स एव कृतकृत्यवेदकसम्यग्दृ
ष्टिर्भुज्यमानायुषः क्षयवशाद्यदि मरणं प्राप्नोति तदा सम्यक्त्वग्रहणात्पूर्वं बद्धनारकाद्यायुर्वशवर्त्तित्वेन-
चतसृषु गतिषु गच्छति तथाहि तस्मिन्नेव कृतकृत्यवेदकसम्यक्त्वकाले चतुर्भागीकृते प्रथमसमयादारभ्यां
तर्मुहूर्तमात्रे प्रथमभागे २२३/४४४ मृतो देवेष्वेवोत्पद्यते नान्यगतिजेषु तत्काले इतरगतित्रयगमनकारणसं
क्लेशपरिणामाभावात्। तदनंतरद्वितीये चतुर्थभागे अंतर्मुहूर्तमाने २२३/४४४ मृतो देवमनुष्यगत्योरे
वोत्पद्यते नान्यगतिद्वये तत्काले तद्गतिद्वयगमननिबंधनसंक्लेशपरिणामा नुपपत्तेः तदनंतरतृती
यचतुर्थभागें ऽतर्मुहूर्तमात्रे २२३/४४४ मृतो देवमनुष्यतिर्यग्गतिष्वेवोत्पद्यते न नारकगतौ तत्काले नारकगति
गमनहेतुसंक्लेशपरिणामा संभवात्। तदनंतरचरमचतुर्थभागे मृतः कृतकृत्यवेदकसम्यग्दृष्टिश्च
तसृष्वपि देवमनुष्यतिर्यग्नारकगतिषूत्पद्यते तत्काले तद्गतिगमननिबंधनसंक्लेशपरिणामोपलंभात्। छ
करणपढमादु जावय किद किच्चुवरिं मुहुत्त अंतो त्ति। सुहाण परावत्ती साविक उदावरं चुवरिं। २४५। अधः
प्रवृत्तकरणप्रथमसमयादारभ्य कृतकृत्यवेदककालचरमसमयपर्यंतं लेश्यापरावृत्तिसंभवासंभवप्ररूप
णार्थमिदं सूत्रमाह। अधःप्रवृत्तकरणप्रथमसमये दर्शनमोहक्षपणप्रारंभको तेजोलेश्यो ऽभकस्य तेजः पद्मशुक्ल 

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

लेश्यानां शुभानांमध्ये यया लेश्यया तत् क्षपणा प्रारब्धा तल्लेश्यो कृष्टांशः प्रतिसमयमनंतगुणविशुद्धिक्रमे
णानिवृत्तिकरणचरमसमये परिपूर्णो भवति। पुनस्तदनंतरं कृतकृत्यवेदककालस्याभ्यंतरे प्रथमभागे य
दि म्रियते तदा तत्रापि तल्लेश्यापरावृत्तिर्नास्ति तस्य देवेष्वेवोत्पादात् यदि द्वितीयभागे म्रियते तदा तस्य भो-
गभूमिजमनुष्यगतावुत्पत्तिसंभवात्। प्रागारब्ध शुभलेश्याया उत्कृष्टमध्यमजघन्यांशानां संक्रमक्रमेण हान्या
मरणकाले कपोतलेश्याजघन्यांशो भवति। अथ पुनस्तृतीयभागे यदि म्रियते। तदा तस्यापि भोगभूमिमनुष्यतिर्य
ग्गत्योरेव जन्मसंभवात्। प्रागुक्तप्रकारेण कपोतलेश्याजघन्यांशो भवति। अथ पुनश्चतुर्थभागे यदि म्रियते। तदा
तस्यापि बद्धनारकायुषः प्रथमपृथिव्यामेवोत्पत्तिघटनात्पूर्ववत्कपोतलेश्याजघन्यांशो भवति। तद्भागमृतमनु-
ष्यतिरश्चोः पूर्ववद्द्वेचगत्योमुत्पद्यमानस्य सर्वेषु भागेषु मृतस्य लेश्यापरावृत्तिर्नास्ति। इदं कृतकृत्यवेदककाले-
मरणापेक्षया भणितं। तत्काले मरणरहितस्य पुनः प्रादुर्भूतक्षायिकसम्यक्त्वस्य पूर्वं चतुर्गतिषु बद्धायुषः-
मरणकाले गत्यनुसारेण लेश्यापरावृत्तिरुक्तप्रकारेण ज्ञातव्या। छ। अणुसमओवट्टणयं कदकिज्जंतोत्तिपु-
व्वकिरियादो वट्टदि उदीरणं वा असंखसमयप्पबद्धाणं। १४६ कृतकृत्यवेदकाले संभवत्क्रियाविशेषप्रति-
पादनार्थमाह दर्शनमोहनीयानुभागस्यानिवृत्तिकरणकालसंख्यातैकभागे यदा कांडकघातं संहृत्यानं
तगुणहान्या प्रतिसमयमपवर्त्तनं प्रारब्धं। तदत्रापि कृतकृत्यवेदककालचरमसमयपर्यंतमप्रतिघातं व-
र्त्तत एव। पूर्वस्य करणपरिणामविशुद्धिविशेषस्य संस्कारशेषसंभवात् तथा तत्रैव कृतकृत्यवेदककाले असंख्या
तसमयप्रबद्धानामुदीरणापि तत्कालेयावत्समयाधिका। उच्छिष्टावलिरवशिष्यते तावत्प्रतिसमयमसंख्यात-
गुणितक्रमेण वर्त्तते। छ। उदयबहिं उक्कट्टिय असंखगुणमुदयआवलिम्हि खिवे उवरिं विसेसहीणं कदकिज्जो
जावउच्छवणं। १४७। उदीरणाद्रव्यस्य प्रमाणं तन्निक्षेपविधानंच प्रदर्शयितुं सूत्रत्रयमाह। अत्र कृतकृत्यवेदक-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri



हा

कालमात्रास्थितिषु प्रविष्टस्य किंचिन्न्यूनद्व्यर्द्धगुणहानि गुणितसमयप्रबद्धमात्रस्यापकर्षणभागहारेण खं
डितस्यैकभागमुदयावलिवाह्यनिषेकेभ्यो गृहीत्वा पुनः पल्यासंख्यातभागेन खंडयित्वा तदेकभागमुदयावल्या
मुदयप्रथमसमयादारभ्य तच्चरमसमयपर्यंतं। प्रतिनिषेकमसंख्यातगुणितक्रमेण प्रक्षेपयोगेत्यादिनावि
धिना निक्षिपेत्। पुनस्तद्बहुभागद्रव्यमुदयावलिन्यूनोपरितनस्थितावंतर्मुहूर्त्तप्रमाणायामुपरि समयाधिका
मतिस्थापनावलिं वर्जयित्वा अद्धाणेण सव्वधणेत्यादि विधिना विशेषहीनक्रमेणानिक्षिपेत्। एवं द्वितीयादिस
मयेष्वपि यद्यपि विशुद्धिसंक्लेशपरावृत्तिवशेन कृतकृत्यवेदकस्य शुभाशुभलेश्यापरिणामसंक्रमो भवति
तथापि प्राक्तनकरणत्रयविशुद्धिसंस्कारवशात्। प्रतिसमयमसंख्यातगुणितक्रमेणद्रव्यमपकृष्य उदीर-
णां कुरुते कृतकृत्यवेदकसम्यग्दृष्टिः गुणश्रेण्यायामं विना केवलमुदयावल्यामेव किंचिद्द्रव्यं। प्रवेश्यावशि
ष्टस्यापरितनस्थितौ निक्षेपणमुदीरणा इदमेव मनस्यवधार्याचार्यैः णत्थि गुणसेढी इत्युदीरणालक्षणमु
दीरितं। एवं प्रतिसमयमसंख्यातगुणितक्रमेणद्रव्यमपकृष्य निक्षेपे समयाधिकावल्युपरितननिषेकाद-
पकृष्टद्रव्यस्य बहुवारमसंख्यातगुणितस्य तदानीं तनोदयनिषेकाद्धीनाधिकभावाशंकायां परिहार उच्यते
यद्यप्यसंख्येयसमयप्रबद्धानामुदीरणा चरमपूर्वपूर्वोदीरणाद्रव्यादसंख्यातगुणितद्रव्या। तथापि। चरम-
फालिगुणश्रेण्यायातोदयनिषेकद्रव्यादसंख्यातैकभागमात्रमेवोदीरणाद्रव्यमुदयनिषेके दीयमानम-
पकर्षणभागहारेण खंडितसर्वद्रव्यस्य पल्यासंख्यातभागेन भक्तस्यैकभागमात्रत्वादुदयनिषेकस्य च सर्व
द्रव्यस्यासंख्यातपल्यप्रथममूलभक्तस्यैकभागमात्रत्वात्। किं पुनः कृतकृत्यवेदकप्रथमादिसमयेषु उदीर-
णाद्रव्यं तत्र तत्रोदयावलिनिषेकेषुदीयमानं तत्तदुदयावलिनिषेकसत्वद्रव्यादसंख्यातगुणहीनमित्युच्यते।
कृतकृत्यवेदककालस्य समयाधिकावलिमात्रेऽवशिष्टे सर्वाग्रनिषेकात्पूर्वपूर्वापकृष्टद्रव्यादसंख्यातगुणित ३१

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

द्रव्यमपकृष्य समयोनावल्या द्वित्रिभागमात्रमतिस्थाप्य तदधस्तनेतत्त्रिभागे रूपाधिके उदयसमयात्प्रभृति
इदानीमपकृष्ट द्रव्यस्य पल्यासंख्यातभागभक्तस्यैकभागं तद्योग्यासंख्यातसमयपर्यंतमसंख्यातगुणित-
क्रमेण दत्वावशिष्ट बहुभागद्रव्यं। तथावलि त्रिभाग समयेषु अतिस्थापनाधस्तनसमयं मुक्त्वा सर्वत्र विशेष
हीनक्रमेण निक्षिपेत्। एषैवोत्कृष्टोदीरणा एवमनुभागस्यानुसमयमनंतगुणितापवर्त्तनेन कर्मप्रदेशानां-
प्रतिसमयमसंख्यातगुणितोदीरणायाश्च कृतकृत्य वेदक सम्यग्दृष्टि सम्यक्त्व प्रकृति स्थितिमंतर्मुहूर्त्ताया
मामुच्छिष्टावलिं मुक्त्वा सर्वां प्रकृति स्थित्यनुभाग प्रदेशाविनाशपूर्वकं उदयमुखेन गालयित्वा तदनंतर सम-
ये उदीरणा रहितं। केवलमनुभागानुसमयापवर्त्तनेनैव प्राक्तनापवर्त्तनक्रमविलक्षणेनोदय प्रथमसमया
त्प्रभृति प्रतिसमयमनंतगुणितक्रमेण प्रवर्त्तमानेन प्रकृतिस्थित्यनुभाग प्रदेश विनाशपूर्वकं। प्रतिसमय-
मेकैकनिषेकं गालयित्वा तदनंतर समये क्षायिक सम्यग्दृष्टिर्जायते जीवः॥छ॥ बिदियकरणादिमादो कदक
रणिज्जस्स पढमसमयोत्ति। वोत्थं रसखंडुकीरणकालादीणमप्पवहुं।१४८। अपूर्वकरण प्रथमसमयादा
रभ्य कृतकृत्यवेदक प्रथमसमय पर्यंतमनुभागखंडोत्करणकालादीनां उत्कृष्ट स्थितिसत्व पर्यंतानां त्रय-
स्त्रिंशतमल्प बहुत्व पदानि वक्ष्यामीति प्रतिज्ञा सूत्रमिदं।छ। रसठिदिखंडुक्कीरणअद्धा अवरं वरं च अव-
रवरं सव्वत्थोवं अहियं संखेज्जगुणं विसेसहियं।१४९। एकादश गाथा सूत्रैः तान्यल्प बहुत्व पदानि प्रति
पाद्यन्ते। तद्यथा। दर्शनमोहस्य जघन्यानुभागखंडोत्करणकालः सम्यक्त्वप्रकृत्यष्टवर्षस्थितिकरणसमया
त्प्राक्तनानंतरावस्थायां संभवन् वक्ष्यमाण द्वात्रिंशत्पदेभ्यः स्तोकमल्पमित्यर्थः। ज्ञानावरणाद्यायुर्वर्जितशे-
षकर्मणां जघन्यानुभागखंडोत्करणकालो ऽनिवृत्ति करणचरमभागे संभवन् सर्वतः स्तोकमिति सामान्येन
जघन्यानुभागखंडोत्करणकालः संख्यातावलिमात्रोपि उत्तरपदापेक्षयाल्प इत्युच्यते एकं पदं।१। तस्मादप्र-

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri



वकरण प्रथमसमये प्रारभ्यमाणोत्कृष्टानुभागखंडोत्करणकालो विशेषाधिकः। २१५ ४ । विशेषप्रमाणं जघन्या
नुभागखंडोत्करणकालसंख्यातैकभागमात्रं द्वितीयं पदं।२। तस्मादनिवृत्तिकर णचरमभागे संभवन्
जघन्यस्थितिकांडकोत्करणकालः संख्यातगुणः। २१५४ ४ तृतीयं पदं।३। तस्मादपूर्वकरण प्रथमसमये घ-
टमानः उत्कृष्टस्थितिखंडोत्करणकालो विशेषा धिकः २१।५।४।५। चतुर्थं पदं।४। तस्मात्कृतकृत्यवे
दककालः संख्यातगुणः। २१।५।४।५।४ ४।४ इदमपवर्त्य लिखिते एवं २१४ पंचमं पदं।५। अस्मात्सम्यक्त्वप्रकृ
तिक्षपणाकालः अष्टवर्ष करणप्रथमसमयादारभ्य कृतकृत्यवेदकचरमसमयपर्यंतमुपपद्य
मानः संख्यातगुणः। २१४४ षष्ठं पदं ॥६॥ अस्मादनिवृत्तिकरणकालसंख्यातगुणः। २१४४।४। सप्तमं पदं।७।
तस्मादपूर्वकरणकालः संख्यातगुणः। २१४४।४।४ अष्टमं पदं ॥८॥ अमुष्मादपूर्वकरणप्रथमसमये प्रारब्ध-
गुणश्रेण्यायामो विशेषाधिकः। २१४४४४। विशेषप्रमाणमनिवृत्तिकरणकालस्तत्संख्यातभागश्च नवमं पदं।
।९। तस्मात्सम्यक्त्वप्रकृतेर्द्विचरमस्थितिकांडकायामः संख्यातगुणः। २१४४४४४ गुणिते एवं २१ दशमं पदं।
।१०। अस्मात्सम्यक्त्वप्रकृतिचरमस्थितिकांडकायामः संख्यातगुणः। २१४। एकादशं पदं।११। एतस्मादष्टव
र्षप्रथमसमये सम्यक्त्वप्रकृतिस्थितिकांडकायामः संख्यातगुणः। २१४।४। द्वादशं पदं।१२। तस्मात्कृतकृ-
त्यवेदकप्रथमसमये संभवज्ज्ञानावरणादिकर्मस्थितिबंधस्य जघन्याबाधाकालः संख्यातगुणः। २१४४४ त्रयो
दशं पदं।१३। अस्मादपूर्वकरणप्रथमसमय संभवज्ज्ञानावरणादिकर्मस्थितिबंधस्योत्कृष्टाबाधाकालः संख्या
तगुणः। २१४४४४४ एतावत्पर्यंतं प्रागुक्तसर्वायामाः प्रत्येकमंतर्मुहूर्त्तमात्रा एव। चतुर्दशं पदं।१४। अमुष्मात्
सम्यक्त्वप्रकृतेः खंडितस्थित्यवशेषोऽष्टवर्षायामः संख्यातगुणः। व ८। अंतर्मुहूर्त्ताद्दिनमासवर्षप्रमितसंख्या
तगुणकारस्य दर्शनात् पंचदशं पदं।१५। अमुष्मात्सम्यक्त्वप्रकृतेरष्टवर्षावशेषकरणनिमित्तपल्यासंख्याते ३२

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

कभागमात्रचरमस्थितिकांडकायामोऽसंख्यातगुणः प ८८/७७७ षोडशं पदं ॥१६॥ तस्मात्सम्यग्मिथ्यात्वप्रकृते-
श्चरमकांडकायामो विशेषाधिकः प/७७७ विशेषप्रमाणं चोच्छिष्टावल्यो नाष्टवर्षमात्रं सप्तदशं पदं ।१७॥
तस्मात्मिथ्यात्वे चरमस्थितिकांड कचरमफालिद्रव्यं मिश्रप्रकृतौ संक्रम्य क्षपिते तदनंतरसमये प्रार-
ब्धमिश्रसम्यक्त्वप्रकृत्योः प्रथमस्थितिकांडकायामोऽसंख्यातगुणः प ७/७७७ अष्टादशं पदं ॥१८॥ तस्मान्मिथ्यात्व
द्रव्यसत्वे चरमकांडकावशेषमात्रे सति तत्काललांछितमिश्रसम्यक्त्वप्र कृतिचरमकांडकायामो संख्यातगु-
णः प ७/७७ एकान्नविंशं पदं ।१९। तस्मात्मिथ्यात्वद्रव्यस्य चरमकांडकायामो विशेषाधिकः प/७ विशेषप्रमाणं च मि-
थ्या त्वसत्वकाले मिश्रसम्यक्त्वप्रकृत्योश्चरमकांडकावशिष्टाधस्तनस्थितिमात्रं विंशं पदं ॥२०। तस्माद्दर्शन-
मोहत्रयस्य दूरापकृष्टिमात्रावशेषस्थितौ प्रविष्टपल्यासंख्यातबहुभागमात्र प्रथमस्थितिकांडकायामोऽसंख्या
तगुणः प ७/५५५५७ एकविंशं पदं ।२१। अमुष्मा दूरापकृष्टिस्थित्यवशेषहेतुभूतपल्यसंख्यातबहुभागमात्रस्थितिकां
डकाया मःसंख्यातगुणः प ४/५५५५ द्वाविंशं पदं ।२२। तस्मात्पल्यमात्रावशिष्टस्थितौ प्रविष्टद्वितीयस्थिति
कांडकायामःसंख्यातगुणः प ४/५५ त्रयोविंशं पदं ॥२३। तस्मात्पल्यमात्रावशेषकरणनिमित्तपल्य-
संख्यातैकभागमात्रस्थि- तिकांडकायामःसंख्यातगुणः प/५ पल्यप्रविष्टकांडकभागहारात्पल्य-
हेतुकांडकभागहारस्य संख्यातगुणहीनत्वात् चतुर्विंशं पदं ।२४। एतस्मादपूर्वकरणप्रथमसमये प्रा-
रब्धजघन्यस्थितिकांडकायामःसंख्यातगुणः प/५ पंचविंशं पदं ।२५। अस्मात्पल्यमात्रावशेषस्थितौ प्र
विष्टपल्यसंख्यातबहुभागमात्रप्रथमकांडकाया मःसंख्यातगुणः प ४/५ षड्विंशं पदं ।२६। अमुष्मात्प-
ल्यमात्रावशेषस्थितिसत्वं विशेषाधिकं प विशेषप्रमाणं च पल्यसं- ख्यातैकभागमात्रं सप्तविंशं प-
दं ।२७॥ तस्मादपूर्वकरणप्रथमसमये जघन्योत्कृष्टकांडकयोर्विशेषः पल्यसंख्यातभागन्यूनसागरो-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

पमपृथक्त्वमात्रः संख्यातगुणः | सा ७-प / ८२ | अष्टाविंशं पदं ॥२८। एतस्मादनिवृत्तिकरण प्रथमसमये दर्श
नमोहस्य स्थितिसत्वं संख्यात- गुणं | सा ७ ल / ८ | एकोनत्रिंशं पदं।२९ तस्माद्दर्शनमोह वर्जितानां
ज्ञानावरणादिशेषकर्मणां जघन्यास्थितिबंधः- कृतकृत्य वेदक प्रथमसमय संभवीसंख्यातगुणः
| सा अंको २ / ४४४ | त्रिंशं पदं ॥३०॥ तस्मादपूर्वकरण प्रथमसमये तेषामेव कर्मणामुत्कृष्टास्थितिबंधः संख्यातगु-
णः | सा अंको २ / ४४ | एकत्रिंशं पदं ॥३१॥ तस्मात्तेषामेव कर्मणामनिवृत्तिकरण चरमभागे संभवि-
जघन्यस्थितिस त्वं संख्यातगुणं | सा अंको २ / ४ | द्वाविंशं पदं॥३२। तस्मात्तेषामेव कर्मणामपूर्वक
रण प्रथमसमये संभवदुत्कृष्टस्थितिसत्वं संख्येयगु णं | सा अंको २ | त्रयस्त्रिंशं पदं ॥३३। एवं दर्शनमो
हक्षपणावसारे संभवदल्पबहुत्वपदानि प्रवचनानुसारेण व्याख्यातानि ॥छ॥ कदकरण सम्मखवणाणि
यट्टि अपुव्वछ्छ संखगुणिदकमा। तत्तोगुणसेढिस्सयणिक्खेवयो साहियो होइ॥२५०॥ सम्मदुचरिमे अडव-
स्ससादिमे चठिदिखंडा। अवरवरा बाहाविय अडवस्सं संखगुणियकमा।२५१। सम्मे असंखवस्सियच-
रिमट्ठिदिखंडउ असंखगुणो। मिस्से चरिमं खंडय महियं अडवस्समेत्तेण ॥२५२॥ मिछ्छे खविदे सम्मादुगाणं
ताणं च मिछ्छसत्तम्हि। पढमंतिमठिदिखंडा असंखगुणिदा हु दुट्ठाणे॥२५३। मिछ्छंतिमट्ठिदिखंडो पल्लासंख-
ज्जभागमेत्तेण। हेठिमठिदिप्पमाणेणब्भहियो होदि णियमेण॥२५४॥ दूरावकिट्टि पढमं ठिदिखंडमसंख-
संगुणं तेणहं दूरावकिट्टि हेट्ठुं ठिदिखंडं संखसंगुणियं ॥२५५॥ पलिदोवमसत्तादो बिदियो पल्लस्स हेट्ठुगो
जो दु अवरो अपुव्वपढमे ठिदिखंडो संखगणिदकमा।२५६। पलिदोवमसत्तादो पढमो ठिदिखंडउ दु संख-
गुणो। पलिदोवमठिदिसत्तं होदि विसेसाहियं तत्तो ॥२५७॥ बिदियकरणस्स पढमे ठिदिखंड विसेसयं तु त-
दियस्स करणस्स पढमसमये दंसणमोहस्स ठिदिसत्तं ॥२५८। दंसणमोहूणाणं बंधो सत्ताय अवरवरगो ३३

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

य संखेज्जगुणियकमा तेत्तीसा एत्थ पद संखा [redacted] ॥२५७॥ सत्तण्हं पयडीणं खयादु खयियं तु होदि
सम्मत्तं मेरुव्व णिप्पकंपं सुणिम्मलं अक्खयमणंतं ॥२६०॥ दंसणमोहे खविदे सिज्झदि एक्केव तदियतुरि
यभवे णादिक्कदि तुरियभवं णविणस्सदि सेससम्मं व ॥२६१॥ सत्तण्हं [redacted] पयडीणं खयादु अवरं तु
खइयलद्धी दु उक्कस्स खइयलद्धी घाइचउक्क खयेण हवे ॥२६२। उवणोउ मंगलं वो भवियजणा जिणवरस्स क
मकमलजुय। झसकुलिसकलससत्थियससंकसंखंकुसादिलक्खणभरियं ।२६३। सत्तण्हमित्यादिगाथा-
त्रयस्यार्थः। सुगमः किंतु निःप्रकंपं निश्चलं सुनिर्मलं अतिशयेन शंकादिमलरहितं। अक्षयगाढं अहीनशक्ति
कत्वेन शिथिलत्वाभावात्। अनंतं अपर्यवसानं तुर्यभवं भोगभूमिभवापेक्षया जघन्यक्षायिकलब्धिरसंयतसम्य
ग्दृष्टौ उत्कृष्टक्षायिकलब्धिः परमात्मनि संभवति ॥छ॥ एवं दर्शनमोहक्षपणाविधानप्ररूपणाटिप्पणं। भद्रमस्तु
जिनशासनाय ॥छ॥ नमः क्षायिकसम्यग्दृष्टये ॥छ॥ अथ दर्शनमोहक्षपणाविधानप्ररूपणानंतरं देशसकल-
संयमलब्धिप्ररूपणार्थमिदं सूत्रमाह ॥छ॥ दुविहा चरित्तलद्धी देससयलेय देसचरित्तं मिच्छो अयदो सयलं ते-
वियदेसोय अल्लियइ ॥२६४ चरित्रस्य लब्धिः प्राप्तिः। चारित्रमेव वा लब्धिः सा द्विविधा देशेन साकल्येन च। तत्र दे-
शचारित्रं मिथ्यादृष्टिरसंयतसम्यग्दृष्टिश्च लभते। सकलचारित्रं तौ च देशसंयतश्च लभंते। तत्र मिथ्यादृष्टेर्देश
संयमलब्धौ सामग्रीमाह ॥छ॥ अंतोमुहुत्तकाले देसवदी होहिदित्ति मिच्छो हु सोसरणे सुज्झंतो करणं पि करे
दि सगजोग्गं ॥२६५॥ यस्मात्परमंतर्मुहूर्त्तकालं नीत्वा मिथ्यादृष्टिर्देशव्रती भविष्यति। तस्मिन्काले सविशुद्धमि
थ्यादृष्टिः। प्रतिसमयमनंतगुणविशुद्ध्या वर्द्धमानः आयुर्वर्जितकर्मणां बंधसत्वयोरंतःकोटीकोटिमात्रावशेष-
करणेन स्थित्यपसरणमशुभकर्मणामनंतैकभागमात्रावशेषकरणेनानुभागापसरणं च कुर्वन् स्वयोग्यं क
रणपरिणामं कुरुते। तत्र मिथ्यादृष्टेर्देशसंयमलब्धौ सम्यक्त्वविभागेन करणपरिणामविभागप्रदर्शनार्थमि

क्षपणासार
३४
दमाह ॥ छ ॥ मिछोदेसचरित्तं उवसमसम्मेण गेण्हमाणो हु। सम्मत्तुपत्तिं वा तिकरणचरिमम्हि गेण्हदि हु ।१६८।
यदाऽनादिमिथ्यादृष्टिर्वा सादिमिथ्यादृष्टिर्वा जीवः उपशामिकसम्यक्त्वेन सह देशचारित्रं गृह्णानः दर्शनमोहो
पशमविधानेन प्रागुक्तप्रकारेण सम्यक्त्वोत्पत्तौ त्रिकरणचरमसमये देशचारित्रं गृह्णाति। यथा दर्शनमोहो
पशमने प्रकृतिबंधापसरणं स्थितिबंधापसरणं प्रतिसमयमनंतगुणविशुद्धिवृद्धिः। अप्रशस्तप्रकृतीनां प्र
तिसमयमनंतगुणहान्यानुभागबंधः। अधःप्रवृत्तादिकरणपरिणामाः स्थितिकांडकघातादयश्चान्ये कार्यविशे
षाः ते सर्वेपि औपशामिकसम्यक्त्वदेशचारित्रयोर्युगपद्ग्रहणेन नूनं वक्तव्याः विशेषाभावादित्यभिप्रायः ॥ छ ॥
अथ सादिमिथ्यादृष्टेर्वेदकसम्यक्त्वेन सह देशचारित्रग्रहणे संभवद्विशेषप्रतिपादनार्थमिदं गाथाद्वयमा
ह ॥ छ ॥ मिछो देसचरित्तं वेदगसम्मेण गेण्हमाणो हु दुकरणचरिमे गेण्हदि गुणसेढी णत्थि तक्करणे ॥६९
सम्मत्तुप्पत्तिं वा थोवबहुत्तं च होदि करणाणं। ठिदिखंडसहस्सगदे अपुव्वकरणं समप्पदिहु ।।१७०। वेदक-
सम्यक्त्वयोग्यः सादिमिथ्यादृष्टिर्जीवो वेदकसम्यक्त्वेन सह देशचारित्रं गृह्णानः अधःप्रवृत्तापूर्वकरणप-
रिणामद्वयं प्रतिपद्यमानो गुणश्रेणिवर्जितानि स्थितिखंडादीनि सर्वाण्यपि कार्याणि कुर्वन्। अपूर्वकरणच-
रमसमये वेदकसम्यक्त्वं देशचारित्रं च युगपद्गृह्णाति। तत्रानिवृत्तिकरणपरिणामं विनापि वेदकसम्यक्त्व
देशचारित्रप्राप्तिसंभवात्। अधःप्रवृत्तकरणकालात्संख्यातगुणहीनोऽपूर्वकरणकाल इत्यनयोः करणप-
रिणामयोः कालस्तोकबहुत्वमन्यान्यपि कार्याणि सम्यक्त्वोत्पत्तौ प्रतिपादितानि तथात्रापि वेदितव्यानीत्यर्थः
एवमपूर्वकरणकालाभ्यंतरे संख्यातसहस्रेषु स्थितिखंडेषु गतेषु अपूर्वकरणकालः परिसमाप्यते एवमसं
यतसम्यग्दृष्टिरप्यधः। प्रवृत्तापूर्वकरणद्वयकालचरमसमये देशचारित्रं प्रतिपद्यते तस्य गुणश्रेणिं विनाऽ
वशिष्टसर्वकार्याणि अपूर्वकरणचरमसमयपर्यंतमविशेषेण ज्ञातव्यानि मिथ्यादृष्टिग्रहणमुपलक्षणं ते ३४

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

नव्याख्यानतो विशेषप्रतिपत्तिरिति न्यायमवलंब्यासंयतवेदकसम्यग्दृष्टेरपि देशचारित्रग्रहणक्रमो दर्शि-
तः। सिद्धांतेपि तथैव व्याख्यानात्। अत्रापूर्वकरणकाले कुतो गुणश्रेण्यभावः इति चेत्। उपशमसम्यक्त्वाभा-
वात्तन्निबंधनगुणश्रेण्यभावः। देशसंयमस्याद्याप्यग्रहणात्तन्निमित्तकगुणश्रेणेरप्यभावः। वेदकसम्यक्त्व-
स्य च गुणश्रेणिहेतुत्वाभावादिति ब्रूमहे। अनिवृत्तिकरणपरिणामं विना कथं देशचारित्रप्राप्तिरित्यपि नाशं-
कनीयं कर्मणां सर्वोपशमनविधाने निर्मूलक्षयविधाने चानिवृत्तिकरणपरिणामस्य व्यापारो न क्षयोपशमवि-
धाने इति प्रवचने प्रतिपादितत्वात्॥छ॥ अथ देशसंयमकालप्राप्ति तदानींतनगुणश्रेणिकरणप्रतिपाद-
नार्थमिदमाह॥छ॥ सेकाले देसवदी असंखसमयप्पबद्धमाहरिय। उदयावलिस्स बाहिं गुणसेढिमवट्ठिदं
कुणदि॥२६९॥ अपूर्वकरणचरमसमयादनंतरसमये जीवो देशव्रती भूत्वा आयुर्वर्जितकर्मणां सत्वद्रव्यात्
[स ७।२२-७] असंख्यातैकभागमपकृष्य [स ७२३-७३] इदं पल्यासंख्यातभागेन खंडयित्वा बहुभागद्रव्यमुपरितन-
स्थितौ निक्षिपेत् पुनस्तदेक- भागमसंख्यातलोकेन भक्त्वा तदेकभागमुदयावल्यां दत्वा तद्ब-
हुभागमसंख्यातसमयप्रबद्धमात्रं गुणश्रेण्यायामे निक्षिपेत्। अयं च गुणश्रेण्यायामः। देशसंयमप्रथमसम-
यादारभ्य द्वितीयादिसमयेष्वप्यवस्थित एव गलितावशेषमात्रः। एतद्गुणश्रेण्यायामप्रमाणं। प्रथमोपशमस-
म्यक्त्वोत्पत्तिगुणश्रेण्यायामात्संख्यातगुणहीनं [२२१४] अथ देशसंयमस्यावस्थाविशेषतत्कार्यविभागप्रद-
र्शनार्थमिदमाह॥छ॥ दव्वं असंखगुणियक्कमेण एयंतवट्टिकालोत्ति बहुठिदिखंडेतीदे अधापवत्तो हवे दे-
सो॥२७०। अयं देशसंयतः प्रतिसमयमनन्तगुणविशुद्धिवृद्ध्या वर्द्धमानोन्तर्मुहूर्त्तपर्यंतं द्रव्यमसंख्यातगुणित-
क्रमेणापकृष्यावस्थितगुणश्रेण्यायामे निक्षिपन् स्थितिकांडकादिकार्यं कुर्वन् एकांतवृद्धिदेशसंयत इत्युच्यते
एकांतवृद्धिकालादन्तर्मुहूर्त्तमात्रात्परं वृद्धिं विना ऽवस्थितया विशुद्ध्या परिणतः स्वस्थानदेशसंयतः अथाप्रव-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri



त्तदेशसंयत इत्युच्यते। तस्याधःप्रवृत्तदेशसंयतस्य कालो जघन्येनांतर्मुहूर्त्तः उत्कर्षेणादेशोन पूर्वकोटिवर्षाणि तस्मिन्नधःप्रवृत्त देशसंयत काले संभवत्कार्यविशेष प्रतिपादनार्थमिदमाह॥ सू। ठिदिरसघादो णत्थिहु अधापवत्ताभिधाणदेसस्स पडिउट्ठिदे मुहुत्तस्संतेणहि तस्स करणदुगा।२७१। अधःप्रवृत्तदेशसंयत काले स्थितिखंडनमनुभागखंडनं वा नास्ति एकांतवृद्धि देशसंयतचरमसमये खंडिताचशेषया चन्मात्रास्थित्यनुभागानिकर्मणि तावन्मात्राण्येवाधः। प्रवृत्त देशसंयत काले अवतिष्ठंत इत्यर्थः। यः पुनस्तीव्र संक्लेशकारणबहिरंग द्रव्यादि निरपेक्षः केवलांतरंग कर्मोदय जनित संक्लेश परिणाम वशेन देशसंयमात्प्रच्युत्वा संयत सम्यग्दृष्टि गुणस्थानं प्राप्यात्यल्पान्तर्मुहूर्त्त तत्र स्थित्वा शीघ्रमेव देशसंयमं गृह्णाति तस्यापि स्थित्यनुभाग कांडकघातोनास्ति करणद्वय परिणामं विनैव देशसंयम ग्रहणात्। यः पुनस्तीव्र विराधनाकारण बहिरंग द्रव्यादि सन्निधाने देशसंयमं सम्यक्त्वं च विराध्य मिथ्यात्वं गत्वा दीर्घमंतर्मुहूर्त्तं संख्याता संख्यात वर्षाणि वा वेदकयोग्य कालप्रमितानि स्थित्वा पुनरपि लब्धि वशेन वेदक सम्यक्त्वं संयमासंयमं च युगपत्प्रतिपद्यते तस्याधःप्रवृत्ता पूर्वकरणद्वय परिणाम संभवात् स्थित्यनुभागकांडकघातोस्ति। अथाप्रवृत्त देशसंयतस्य गुणश्रेणि द्रव्य प्रमाणार्थमिदमाह॥ सू॥ देसो समये समये सुज्झंतो संकिलिस्समाणोय चउवड्ढि हाणि दव्वादवट्ठिदं कुणादि गुणसेढिं।२७२। अधःप्रवृत्त देशसंयतः संयमं संयमं प्रति विशुध्यन्वा संक्लिश्यमानो वा चतुर्वृद्धि हानि द्रव्यादवस्थित गुणश्रेणिं करोत्येव। तथाहि विवक्षितस्य यस्य कस्यापि कर्मणः सत्वद्रव्यं। स ७१२- / ७ अस्मादयमधःप्रवृत्तदेशसंयतो यदा संक्लेश परिणामं गत्वा पुनर्विशुद्धिमापूरयति तदा तत्तद्विशुद्धि परिणामानुसारेण कदाचिद संख्यात भागाधिकं स ७१२७ / ७ उ ७ कदाचित्संख्यात भागाधिकं स ७१२ १ / ७ उ १ कदाचित्संख्यात गुणितं स ७१२२४ / ७ उ कदाचित्संख्यात गुणंवा स ७१२७ / ७ उ द्रव्यमपकृष्य गुणश्रेणि निक्षेपं करोति यदा ३५

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0. In Public Domain. Digitized by Sarayu Trust/eGangotri

तु विशुद्धिहान्या संक्लेशपरिणामं गच्छति तदा संक्लेशपरिणामानुसारेण कदाचिदसंख्यातभागहीनं [स ७ २२७ / ७ उ ७]
कदाचित्संख्यातभागहीनं [स ७ १ २२ / ७ उ २] कदाचित्संख्यातगुणहीनं [स ७ २२ / ७ उ २] कदाचिदसंख्यातगुणहीनं
[स ७ २२ / ७ उ ७] वा द्रव्यमपकृष्य गुणश्रेणिनिक्षेपं करोतीति वि शुद्धिसंक्लेशपरिणामपरावृत्तिवशे
नैवंविधद्रव्यापकर्षणसंभवात् एवं स्वस्थानदेशसंयतो जघन्येनांतर्मुहूर्त्तपर्यंतमुत्कर्षेण देशोन
पूर्वकोटिपर्यंतं च गुणश्रेण्यायामे द्रव्यं निक्षिपतीत्यर्थः। देशसंयतस्यानुभागखंडोत्करणकालादीनामल्पबहु-
त्वप्रतिपादनप्रतिज्ञाप्रदर्शनार्थमिदमाह ॥छ॥ बिदियकरणादुजावय देसस्सेसयं तवट्टि चरिमोत्ति अप्पाब-
हुगं बोच्छं रसखंडद्धाणपहुदीणं ।१७३। अपूर्वकरणप्रथमसमयादारभ्य एकांतवृद्धिदेशसंयतपर्यंतं सं-
भवतां जघन्यानुभागखंडोत्करणकालादीनामष्टादशपदानामल्पबहुत्वं प्रवक्ष्यामीति प्रतिज्ञार्थः। अथता-
न्येवाल्पबहुत्वपदानि प्ररूपयितुं गाथाषट्कमाह। अंतिमरसखंडुक्कीरणकालादो हु पढमअउ आहियो चरिमट्ठि
दिखंडक्कीरणकालो संखगुणिदो हु ।१७४। पढमट्ठिदिखंडुक्कीरणकालो साहियो हवे तत्तो एयं तवट्टिकालो
अपुव्वकालोय संखगुणियकमा ॥१७५। अवरामिच्छतियद्धा अविरदतह देस संजदद्धाय। छप्पि समा संख-
गुणा तत्तो देसस्स गुणसेढी ॥१७६। चरिमाबाहा तत्तो पढमाबाहाय संखगुणियकमा। तत्तो असंखगुणिदो
चरिमट्ठिदिखंडउ णियमा ॥१७७। पल्लस्स संखभागं चरिमट्ठिदिखंडयं हवे जम्हा। तम्हा असंखगुणियं चरि
मट्ठिदिखंडयं होदि ।१७८। पढमे अवरो पल्लो पढमुक्कस्सं चवरिमट्ठिदि बंधो। पढमोय चरिम पढमं ठिदि-
सत्तं संखगुणियकमा ।१७९। सर्वतः स्तोकः देशसंयतस्य एकांतवृद्धिचरमसमये संभव जघन्यानुभागखं-
डोत्करणकालः [२८।१] तस्मादपूर्वकरणप्रथमसमये संभव्युत्कृष्टानुभागखंडोत्करणकालो विशेषाधिकः [२८ / ४]
।२। तस्माद्देशसंयतस्यैकांतवृद्धिचरमसमयसंभविजघन्यस्थितिखंडोत्करणकालः संख्येयगुणः [२८।४ / ५]

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

।३। तस्मादपूर्वकरणप्रथमसमयसंभवदुत्कृष्टस्थितिखंडोत्करणकालो विशेषाधिकः ।२२५।४।५ ४४। ।४। तस्मा-
द्देशसंयमग्रहणप्रथमसमयादारभ्य तद्विशुद्धेरेकांतवृद्धिकालः संख्येयगुणः ।२२४४। ।५। अस्मान्मिथ्या-
[redacted]सम्यग्मिथ्यात्वस्य सम्यक्त्वप्रकृति परिणामस्य[redacted]) एतस्माद्देशसंयतस्यापूर्वकरणकालः संख्येयगु-
णः ।२२४४। ।६। अस्मान्मिथ्यात्वस्य सम्यग्मिथ्यात्वस्य सम्यक्त्वप्रकृति परिणामसंयमस्य देशसंयमस्य सकल-
संयमस्य च जघन्यकालः संख्येयगुणः परस्परं तु समानः ।२२२४।४। ।७। अस्मादपूर्वकरणप्रथमसमये प्रार-
ब्धो देशसंयतस्य गुणश्रेण्यायामः संख्यातगुणः ।२२२४।४४। ८ एतस्मादेकांतवृद्धिचरमसमयसंभविजघन्य-
स्थितिबंधाबाधाकालः संख्येयगुणः ।२११४। ।९। एतस्मादपूर्वकरणप्रथमसमयसंभव्युत्कृष्टस्थितिबंधाबाधा-
कालः ।१०। संभविजघन्यस्थितिखंडायामो ऽसंख्यातगुणः ।प/२२। ।११। प्राक्तनकालस्यांतर्मुहूर्त्तमात्रत्वेन चरमस्थिति-
खंडायामस्य च पल्यसंख्यातभागमात्रत्वेन तस्मादसंख्या तगुणितत्वसंभवात् तस्मादपूर्वकरणप्रथम-
समयसंभविजघन्यस्थितिखंडायामः संख्येयगुणः ।प/१। ।१२। अस्मात्पल्यं संख्येयगुणं ।प। ।१३। अस्मादपूर्व-
करणप्रथमसमयसंभव्युत्कृष्टस्थितिखंडायामः सं ख्यातगुणः ।सा ७/८। ।१४। तस्मादेकांतवृद्धिचरमसम-
यसंभविजघन्यस्थितिबंधः संख्येयगुणः ।सा अंको २ ४४४। ।१५। तस्मादपूर्वकरणप्रथमसमयसंभव्युत्कृष्टस्थि-
तिबंधः संख्येयगुणः ।सा अंको २ ४।४। ।१६॥ अ- स्मादेकांतवृद्धिचरमसमयसंभविजन्यस्थितिसत्वं
संख्येयगुणं ।सा अंको २ ४। ।१७। एतस्मादपूर्वकरणप्रथमसमयसंभवदुत्कृष्टस्थितिसत्वं संख्येयगु-
णं ।सा अंको २। ।१८। एवमल्पबहुत्वपदानि व्याख्याय देशसंयमस्य जघन्योत्कृष्टलब्ध्यवसरं तदल्पबहुत्वं-
च प्रतिपादयितुमिदमाह ॥ छ। अवरवरदेसलद्धी सेकाले मिच्छसंजमुववरो। अवरादु अणंतगुणा उक्कस्सा देस
लद्धीउ ।१८०। योजीवः देशसंयमघातिकर्मोदयवशाद्देशसंयमात्प्रतिपतन् तत्कालचरमसमये मिथ्यात्वाभिमु- ३६

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

खोवर्त्तते। तस्य तत्काल चरम समय वर्त्तिनो मनुष्यस्य सर्व जघन्या देश संयम लब्धिर्भवति। यः पुनरनंत गुण विशु
द्धि वृद्ध्या देश संयम परं प्रकर्षं प्राप्य तदनंतर समये सकल संयमं प्राप्स्यति तस्य मनुष्यस्योत्कृष्ट देश संयम ल-
ब्धिर्भवति। एवमुक्त जघन्य देश संयमाविभाग प्रतिच्छेदेभ्यः उत्कृष्ट देश संयमाविभाग प्रतिच्छेदा अनंतानंत गुणाः
तद्गुणकारः अनंतानंत गुणित सर्वजीव राशि प्रमाणः॥ २६। खं॥ छ॥ अथ जघन्य देश संयमाविभाग प्रतिच्छेद प्र-
माण प्रदर्शनार्थमिदमाह॥ छ॥ अवरे देसट्ठाणे होंति अणंताणि फड्डयाणि तदो छट्ठाण गया सव्वे लोयाण मसंख
छट्ठाणा। २८१। सर्व जघन्ये प्रागुक्ते देश संयम स्थाने अनंतानंतानि स्पर्द्धकान्य विभाग प्रतिच्छेदाः सर्वोत्कृष्ट देश-
संयमाविभाग प्रतिच्छेदेभ्योऽनंत गुणहीना संति। ते च जघन्य देश संयमाविभाग प्रतिच्छेदाः अनंतानंत गुणि-
त सर्व जीव राशि प्रमाणा इति सिद्धांत प्रतिपादिताः द्रष्टव्याः। तस्मात्सर्व जघन्य देश संयम स्थानात्सर्वाणि स-
र्वोपकृष्ट पर्यंत देश संयम लब्धि स्थानानि षट् स्थान पतित विशुद्धि वृद्ध्या वर्द्धमानानि असंख्यात लोक गुणि-
तानि भवंति। एकवार षट् स्थान पतितानि देश संयम लब्धि स्थानानि यद्ये तावंति॥ १११११ २२२२२ ७७७७७ तदा असंख्या-
तलोक मात्र≡७ वारेषु कियंति इति त्रैराशिकेन सिद्धानि प्रतिपर्वाऽसंख्यात लोक- मात्राणि सर्वे-
षु पर्वसु मिलित्वाप्य संख्यात लोक मात्राण्येव षट् स्थान पतितानि देश संयम लब्धि स्थानानीत्यर्थः अथ देश
संयम प्रकार स्वरूपं पर्वांतर प्रमाणं प्ररूपयितुमिदमाह॥ छ। तत्थय पडिवाद गया पडिवज्ज गयात्ति अणु-
भय गयात्ति उवरुवरि लद्धिट्ठाणा लोयाण मसंखछट्ठाणा॥ २८२। तत्र देशसंयम लब्धि स्थानेषु मध्ये कानिचि ×तेषु
चित्प्रतिपाते गतानि कतिचित्प्रतिपद्यमान गतानि कियंतिचिदनुभय गतानीति त्रि प्रकाराणि सर्वाण्यपि देश-
संयम लब्धि स्थानानि भवंति प्रतिपात स्थानानामुपर्य संख्यात लोक मात्राणि षट् स्थान पतितानि देश संयम ल-
ब्धि स्थानानि अंतरयित्वा प्रतिपद्यमान स्थानानि भवंति तेषामुपर्य संख्यात लोक मात्राणि षट् स्थान पतितानि

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri



देशसंयमलब्धिस्थानानि अंतरयित्वा अनुभयस्थानानि भवंति तत्र प्रतिपातस्थानान्यऽसंख्यातलोकमात्राण्य-
पि सर्वतः स्तोकानि ≡ ७ तेभ्योऽसंख्येयलोकगुणानि प्रतिपद्यमानस्थानानि ≡ ७ ≡ ७ तेभ्योऽसंख्यातलोकगु-
णान्यनुभयस्थानानि ॥ ≡ ७ ≡ ७ ≡ ७ इति विशेषो ज्ञातव्यः ॥ छ ॥ अथ मनुष्यतिर्यग्जीवदेशसंयमलब्धिस्थाना-
नां प्रतिपातादिभेदभिन्नानां जघन्योत्कृष्टस्थानाचसरं प्ररूपयितुमिदमाह ॥ छ ॥ णरतिरियतिरियणरे अव-
रं अवरं वरं ति सुवि लोयाणमसंखेज्जा छट्ठाणा होंति तम्मज्झे ॥ १८३ देशसंयमस्य सर्वजघन्यं प्रतिपातस्था-
नं मनुष्ये संभवति । ततः परमसंख्यातलोकमात्राणि षट्स्थानपतितानि मनुष्यसम्बंधीन्येव देशसंयमल-
ब्धिस्थानान्युल्लंघ्य तिर्यग्जीवसम्बंधि जघन्यप्रतिपातस्थानं भवति ततः परं नरतिर्यग्जीवसाधारणान्यसंख्या-
तलोकमात्राणि देशसंयमलब्धिस्थानान्यतिक्रम्य तिर्यग्जीवस्योत्कृष्टप्रतिपातस्थानं जायते । ततः परमसंख्या-
तलोकमात्राणि देशसंयमलब्धिस्थानानि नीत्वा मनुष्यस्योत्कृष्टं प्रतिपातस्थानमुत्पद्यते । ततः परं संख्यात-
लोकमात्राणि देशसंयमलब्धिस्थानानि । तत्परिणामयोग्यस्वामिनामभावादंतरयित्वा मनुष्यस्य जघन्यं प्रति-
पद्यमानस्थानं भवति । ततः परं मनुष्यसम्बंधीन्येवासंख्यातलोकमात्राणि देशसंयमलब्धिस्थानानि नीत्वा तिर्य-
ग्जीवस्य जघन्यं प्रतिपद्यमानस्थानं भवति । ततः परमसंख्यातलोकमात्राणि । नरतिर्यग्जीवसाधारणानि देश-
संयमलब्धिस्थानानि गमयित्वा तिर्यग्जीवस्योत्कृष्टं प्रतिपद्यस्थानं जायते । ततः परमसंख्यातलोकमात्राणि म-
नुष्यसम्बंधीन्येव देशसंयमलब्धिस्थानान्युल्लंघ्य मनुष्यस्योत्कृष्टं प्रतिपद्यमानस्थानं भवति । ततः परमसंख्या-
तलोकमात्राणि षट्स्थानपतितानि । देशसंयमलब्धिस्थानानि । पूर्ववदंतरयित्वा मनुष्यस्य जघन्यमनुभय-
स्थानं जायते ततः परमसंख्यातलोकमात्राणि मनुष्यसम्बंधीन्येव देशसंयमलब्धिस्थानानि नीत्वा तिर्यग्जीव-
स्य जघन्यमनुभयस्थानमुत्पद्यते ततः परं नरतिर्यग्जीवसाधारणान्यसंख्येयलोकमात्राणि देशसंयमल



Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

ब्धिस्थानानि नीत्वा तिर्यग्जीवस्योत्कृष्टमनुभयस्थानमुत्पद्यते। ततः परं नरसम्बंधीन्येवासंख्यातलोकमात्राणि
षट्स्थानपतितानि देशसंयमलब्धिस्थानान्यतिक्रम्य मनुष्यस्योत्कृष्टमनुभयस्थानमुत्पद्यते यथासंख्येन
नरतिरश्चोस्तिर्यग्नरयोश्च जघन्यं जघन्यमुत्कृष्टमुत्कृष्टं च त्रिविधान्यपि प्रतिपातप्रतिपद्यमानानुभयस्थानेषु-
संभवंति। तेषां नरजघन्यतिर्यग्जघन्यादीनां मध्येंतराले षट्स्थानपतितान्यसंख्यातलोकमात्राणि देशसंयमल
ब्धिस्थानानि भवंतीति गाथासूत्रव्याख्यानं निरवद्यं ॥छ॥ अथ प्रतिपातादीनां लक्षणं तत्स्वामिभेदं च प्रदर्शयितु-
मिदमाह ॥छ॥ पडिवाददुगवरवरं मिच्छे अयदे अणुभयगजहण्णं। मिच्छचरविदियसमये तत्तिरियवरं तु सट्ठा-
णे ॥२८४। प्रतिपातो बहिरंतरंगकारणवशेन संयमात्प्रच्यवः। स च संक्लिष्टस्य तत्कालचरमसमये विशुद्धिहा
न्यासर्वजघन्यदेशसंयमशक्तिकस्य मनुष्यस्य तदनंतरसमये मिथ्यात्वं प्रतिपत्स्यमानस्य भवति। तत्र सम्य
क्त्वदेशसंयमयोर्विनाशसंभवात्। तथा तिर्यग्जीवस्य जघन्यं प्रतिपातस्थानं सम्यक्त्वदेशसंयमाभ्यां प्रच्युत्य
मिथ्यात्वं गमिष्यतो देशसंयमकालचरमसमये संभवति एतच्च मनुष्यजघन्यप्रतिपातस्थानादनंतगुण-
विशुद्धिकं ज्ञेयं। असंख्यातलोकवारषट्स्थानपतितविशुद्धिवृद्ध्या वर्द्धमानत्वात्। तथा तिर्यग्जीवस्य स्वयो-
ग्यसंक्लेशवशेन देशसंयमात्प्रच्यवमानस्य तत्कालचरमसमये उत्कृष्टं प्रतिपातस्थानमसंयतसम्यग्दृष्टि
गुणस्थानं प्राप्स्यतो भवति। इदमपि तिर्यग्जघन्यप्रतिपातस्थानादनंतगुणविशुद्धिकं। प्राग्वत् ज्ञेयं। तथा मनुष्य
स्य देशसंयमात्प्रच्युत्य स्वयोग्यसंक्लेशवशेनानंतरं वेदकासंयतगुणस्थानं गमिष्यतः उत्कृष्टं प्रतिपातस्थानं
भवति इदमपि तिर्यगुत्कृष्टप्रतिपातनस्थानादनंतगुणविशुद्धिकं प्राग्वद् ज्ञेयं मनुष्यजघन्यप्रतिपातस्थाना
दारभ्य तिर्यग्जीवस्यानुत्कृष्टप्रतिपातस्थानपर्यंतं संभवंति। प्रतिपातस्थानानि मिथ्यात्वाभिमुखस्यैव देशसं
यमकालचरमसमये द्रष्टव्यानि तिर्यगुत्कृष्टप्रतिपातस्थानादारभ्य मनुष्योत्कृष्टप्रतिपातस्थानपर्यंतं संभवं

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

ति प्रतिपातस्थानानि असंयतसम्यक्त्वाभिमुखस्य स्वकालचरमसमये घटंते। इत्यर्थविशेषो ग्राह्यः तिर्यगु
त्कृष्टप्रतिपातस्थानात्मनुष्योत्कृष्टप्रतिपातस्थानं पूर्ववदनंतगुणविशुद्धिकं ज्ञातव्यं तथा मनुष्यस्य पूर्वं मिथ्या
दृष्टिर्भूत्वा पश्चात्सम्यक्त्वेन सह देशसंयमं प्रतिपद्यमानस्य तत्प्रथमसमये संभवज्जघन्य।प्रतिपद्यमानस्था-
नं मनुष्योत्कृष्टप्रतिपातस्थानादनंतगुणविशुद्धिकं अंतरे ऽसंख्यातलोकमात्राणि षट्स्थानान्युल्लंघ्य समुत्पा
दात्। तथा तिर्यग्जीवस्य मिथ्यादृष्टिचरस्य सम्यक्त्वदेशसंयमौ युगपत्प्रतिपद्यमानस्य तत्प्रथमसमये वर्त्तमा
नं जघन्यं प्रतिपद्यमानस्थानं मनुष्यजघन्यप्रतिपद्यमानादनंतगुणविशुद्धिकं प्रतिपत्तव्यं। तथा तिर्यग्जीव-
स्य प्राग् संयतसम्यग्दृष्टिर्भूत्वा पश्चाद्देशसंयमं प्रतिपद्यमानस्य तत्प्रथमसमये संभवदुत्कृष्टं प्रतिपद्यमान
स्थानं तिर्यग्जघन्यप्रतिपद्यमानस्थानात्प्राग्वदनंतगुणविशुद्धिकं बोद्धव्यं तथा मनुष्यस्यासंयतसम्यग्दृष्टि
चरस्य देशसंयमं प्रतिपद्यमानस्य तत्प्रथमसमये घटमानमुत्कृष्टं प्रतिपद्यमानस्थानं। तिर्यगुत्कृष्टप्रतिपद्य-
मानस्थानात्पूर्ववदनंतगुणविशुद्धिकं निश्चेतव्यं मनुष्यजघन्यप्रतिपद्यमानस्थानात्।प्रभृति तिर्यग्गुत्कृष्ट
प्रतिपद्यमानस्थानपर्यंतं संभवंति प्रतिपद्यमानस्थानानि मिथ्यादृष्टिचरस्येति ग्राह्यं। तिर्यगुत्कृष्टप्रतिपद्यमा
नस्थानादारभ्य मनुष्योत्कृष्टप्रतिपद्यमानस्थानपर्यंतं विद्यमानानि स्थानानि असंयतसम्यग्दृष्टिचरस्य भवं
ति ज्ञातव्यं। तथा मनुष्यस्य मिथ्यादृष्टिचरस्य सम्यक्त्वेन सह देशसंयमं प्रतिपद्य द्वितीयसमये वर्त्तमानस्य-
जघन्यमनुभयस्थानं मनुष्यस्योत्कृष्टप्रतिपद्यमानस्थानादनंतगुणविशुद्धिकं अंतरे संख्यातलोकमात्रष-
ट्स्थानपतितविशुद्धिवृद्ध्या वर्द्धमानत्वात् तथा तिर्यग्जीवस्य मिथ्यादृष्टिचरस्य सम्यक्त्वेन सार्द्धं देशसंय-
मं प्रतिपद्य द्वितीयसमये वर्त्तमानस्य जघन्यमनुभयस्थानं मनुष्यजघन्यानुभयस्थानात्पूर्ववदनंतगुणवि
शुद्धिकं। तथा तिर्यग्जीवस्यासंयतसम्यग्दृष्टिचरस्य देशसंयमं प्रतिपद्य एकांतवृद्धिचरमसमये स्वगतियो ३५

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri
Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

न्य सर्वविशुद्धिविशिष्टस्योत्कृष्टमनुभयस्थानं तिर्यग्जघन्यानुभयस्थानात्प्राग्वदनंतगुणं तथा मनुष्यस्यासं-
यतसम्यग्दृष्टिचरस्य देशसंयमं प्रतिपद्य एकांतवृद्धिचरमसमये सर्वविशुद्धिविशिष्टसकलसंयमाभिमु-
खस्योत्कृष्टमनुभयस्थानं तिर्यगुत्कृष्टानुभयस्थानात्प्राग्वदनंतगुणविशुद्धिकं ग्राह्यं। मनुष्यजघन्यानुभयस्था-
नादारभ्य तिर्यगनुत्कृष्टानुभयस्थानपर्यंतं संभवंति। स्थानानि मिथ्यादृष्टिचरस्येति ग्राह्याणि। तिर्यगुत्कृष्टानु-
भयस्थानादारभ्य मनुष्योत्कृष्टानुभयस्थानपर्यंतं दृश्यमानानि स्थानानि असंयतसम्यग्दृष्टिचरस्येति संभा-
वनीयं प्रतिपातद्विकस्य प्रतिपात प्रतिपद्यमानयोः अवरं मिथ्यात्वे पततः मिथ्यादृष्टिचरस्य च संभवति वर-
मुत्कृष्टं देशसंयमलब्धिस्थानमसंयमे पतिष्यतः असंयतचरस्य च भवति। अनुभयजघन्यं मिथ्यादृष्टिचरस्य
देशसंयमग्रहणाद्द्वितीयसमये वर्त्तमानस्य भवति। अनुभयोत्कृष्टं तु असंयतचरस्य एकांतवृद्धिचरमसम-
ये मनुष्यस्य सकलसंयमाभिमुखस्य तिर्यग्जीवस्य च एकांतवृद्धिचरमसमयरूपस्वकीयस्थाने एवास्थित-
स्य संभवतीति सूच्यते एवं गाथासूत्रव्याख्यानं सूक्तं। इति देशसंयमलब्धिविधानाधिकारः समाप्तः॥ छ।

वर्द्धतां जिनशासनं।छ। संजमदेत्यादि मंगलं। अथ सकलचारित्रप्ररूपणामुपक्रममाण इदं सूत्रमाह॥
सयलचरित्तं तिविहं खउवसमि उवसमं खयियं च। सम्मत्तुप्पत्तिं वा उवसम सम्मेण गेण्हदो पढमं॥१८८॥ सक-
लचारित्रं त्रिविधं क्षायोपशमिकमुपशमजं क्षायिकं चेति तत्र प्रथमं क्षायोपशमिकचारित्रमुपशमजसम्य-
क्त्वेन सह गृह्णतो जीवस्य प्रथमोपशमसम्यक्त्वोत्पत्तौ यथा प्रक्रिया प्रागुक्ता तथैवात्रापि निरवशेषं वक्तव्या-
अथ वेदकसम्यक्त्वयोग्यमिथ्यादृष्ट्यादीनां सकलसंयमं गृह्णतां प्रक्रियाविशेषप्रदर्शनार्थमिदमाह॥छ।
वेदगजोग्गो मिच्छो अविरददेसो य दोण्णि करणाणि। देसवदं वा गेण्हदि गुणसेढी णत्थि तक्करणे॥१८९॥ वेदक-
सम्यक्त्वग्रहणयोग्यो मिथ्यादृष्टिर्वा वेदकसम्यग्दृष्टिविरतो वा देशव्रतो वा देशव्रतग्रहणवदधःप्रवृत्तापूर्व-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri



करणद्वय परिणाममेव सकल संयमं गृह्णाति। तत्करणद्वयेपि गुणश्रेणी नास्ति सकलसंयम ग्रहण प्रथमस
मयादारभ्य गुणश्रेणिरस्ति। इतः परं देशसंयम वदेवात्रापि प्रक्रिया भवतीत्यति देशार्थमिदमाह ॥ छ। एत्तो
उवरिं विरदे देसंवाहोदि अप्पबहुगोत्ति। देसोत्ति उत्तगाणेविरदोत्तियहोदिचत्तव्वं ॥२९०॥ इतः परमल्प बहुत्व
पर्यंतं देशसंयते यादृशी प्रक्रिया तादृश्ये वात्रापि सकल संयते भवतीति ग्राह्यं। अयं तु विशेषः यत्र यत्र देशसंय
त इत्युच्यते तत्र तत्र स्थाने विरत इति वक्तव्यं भवति। तद्यथा। अधः प्रवृत्त करणादीनां कालाल्प बहुत्वं सम्य-
क्त्वोत्पत्तिवत्। स्थिति खंड सहस्रेषु गतेष्व पूर्व करणकालः समाप्यते। तदनंतर समये सकल संयतः सन्
असंख्यात समय प्रबद्ध द्रव्यमपकृष्यावस्थित गुण श्रेणीं पूर्ववत्करोति। एवं प्रतिसमयमसंख्यात गुणि
तक्रमेण द्रव्यमपकृष्य एकांतवृद्धि चरम समय पर्यंतमवस्थित गुण श्रेणीं करोति। तत्काले बहुषु स्थिति-
कांडक सहस्रेषु गतेषु तदनंतर समयादारभ्य स्वस्थान सकल संयतो भवति। तत्र स्वस्थान सकल संयत का-
ले स्थित्यनुभाग कांडक घातो नास्ति गुणश्रेणी पुनरवस्थितायामा सकल संयम निबंधना प्रवर्त्तत एव तदा
संक्लेशास्तोकवशेन सकल संयमात्प्रच्युत्या संयत गुणस्थानं गत्वा तत्र कर्म स्थितिमवर्द्धयित्वा शीघ्रांतर्मु-
हूर्तेन पुनः संयमं प्रतिपद्यमानस्याधः प्रवृत्तापूर्वकरण परिणामः स्थित्यनुभाग खंडनं च नास्ति यस्तीव्र
संक्लेशेन सकल संयमात्प्रच्युत्य मिथ्यात्वं गत्वा तत्र दीर्घमंतर्मुहूर्त्तं वाचिरकालं वा स्थित्वा स्थित्यनुभागौ व-
र्द्धयित्वा पुनर्वेदक सम्यक्त्वेन सह सकल संयमं गृह्णाति तस्याधः प्रवृत्ता पूर्वकरणद्वयं स्थित्यनुभाग खंडनं
च विद्यत एव तदा विशुद्धि संक्लेश परावृत्तिवशेन स्वस्थान सकल संयतः असंख्यात भागाधिकं संख्यात भा-
गाधिकं संख्यात गुणमसंख्यात गुणं वा ऽसंख्यात भाग हीनं संख्यात भाग हीनं संख्यात गुण हीनमसंख्यात
गुणहीनं वा द्रव्यमपकृष्यावस्थितायामां गुणश्रेणीं करोत्येव जघन्यानुभाग खंडोत्करणकालः सर्वतः स्तोक ३८

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

मित्यादिषु देशपदस्थाने विरतपदं निक्षिप्याल्पबहुत्वपदान्यष्टादशापि पूर्ववद्व्याख्येयानि। अथ सर्वजघन्यस
कलसंयमविशुद्ध्यविभागप्रतिच्छेदप्रमाणप्रदर्शनपूर्वकं तत्सर्वस्थानसंख्यानं प्ररूपयितुमिदमाह।छ।।
अवरे विरदट्ठाणे होंति। अणंताणि फट्टयाणि तदो। छट्ठाणगया सव्वे लोयाणमसंखछट्ठाणा।।२८१। सकलसं-
यमस्य सर्वजघन्यस्थाने अनंतानंतानि स्पर्द्धकान्यविभागप्रतिच्छेदाः। जीवराश्यनंतगुणप्रमिताः संति। ततः परं
सर्वोत्कृष्टस्थानपर्यंतं षट्स्थानपतितवृद्धीनि सकललब्धिस्थानानि सर्वाण्यपि असंख्यातलोकमात्राणि भवं-
ति।।छ।। सकलसंयमस्य प्रतिपातादिभेदं दर्शयितुमिदमाह।।छ। तत्थय पडिवादगया पडिवज्जगयात्ति अ-
णुभयगयात्ति। उवरुवरि लद्धिट्ठाणा लोयाणमसंख छट्ठाणा।२८२। तत्र प्रतिपातगतानि प्रतिपद्यमानगता-
न्यनुभयगतानीति त्रिविधानि सकलसंयमलब्धिस्थानानि प्रत्येकमसंख्यातलोकमात्राण्युपर्युपरि तिष्ठंति तेषु
प्रतिपातस्थानभेदं प्रदर्शयितुमिदमाह।छ। पडिवादगया मिच्छे अयदे देसे य होंति उवरुवरिं। पत्तेयमसंखमि-
दा लोयाणमसंखछट्ठाणा।२८३। मिथ्यात्वे प्रतिपाताभिमुखं सकलसंयमलब्धिस्थानं चरमसमये तीव्रसंक्ले-
शवशात्सर्वजघन्यं भवति ततः परमसंख्यातलोकमात्राणि षट्स्थानानि गत्वा तद्योग्यसंक्लेशवशेन मिथ्यात्व
प्रतिपाताभिमुखं सकलसंयमलब्धिस्थानमुत्कृष्टं तच्चरमसमये भवति। ततः परमसंख्यातलोकमात्राणि षट्-
स्थानान्यंतरयित्वा असंयमप्रतिपाताभिमुखं जघन्यं सकलसंयमलब्धिस्थानं चरमसमये तद्योग्यसंक्लेशवशे-
न भवति। ततः परमसंख्यातलोकमात्राणि षट्स्थानानि गत्वा असंयमप्रतिपाताभिमुखं सकलसंयमलब्धिस्था-
नमुत्कृष्टं तच्चरमसमये तद्योग्यसंक्लेशवशाद्भवति। ततः परमसंख्यातलोकमात्राणि षट्स्थानान्यतीत्य तद्यो-
ग्यसंक्लेशवशाद्देशसंयमप्रतिपाताभिमुखं जघन्यं सकलसंयमलब्धिस्थानं तच्चरमसमये भवति। ततः परम-
संख्यातलोकमात्राणि षट्स्थानानि गत्वा तद्योग्यसंक्लेशवशेन देशसंयमप्रतिपाताभिमुखमुत्कृष्टं सकलसंय

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri



मलब्धिस्थानं तच्चरमसमये भवति एवं प्रतिपातस्थानानि तद्विषयस्वामिभेदात्रिविधानि। तत्र त्रीणि जघन्यानि-
तीव्रसंक्लेशाविष्टस्य भवंति त्रीण्युत्कृष्टानि तद्योग्य मंदसंक्लेशाविष्टस्य भवंति अथ प्रतिपद्यमानसकलसंयमल-
ब्धिस्थानस्वामिभेदावधारणार्थमिदमाह ॥ छ ॥ तत्तो पडिवज्जगया अज्जमिलेच्छे मेलेछ अज्जेय कमसो अवरं अव
रं वरं वरं होदि देसं वा ॥२८४॥ तस्माद्देशसंयम प्रतिपाताभिमुखोत्कृष्ट प्रतिपातस्थानादसंख्येय लोकमात्राणि ष-
ट्स्थानान्यंतरयित्वा मिथ्यादृष्टिचरस्यार्यखंडज मनुष्यस्य सकलसंयमग्रहणप्रथमसमये वर्त्तमानं जघन्यस-
कलसंयमलब्धिस्थानं भवति। ततः परमसंख्येयलोकमात्राणि षट्स्थानान्यतिक्रम्य म्लेछभूमिज मनुष्यस्यामि
थ्यादृष्टिचरस्य संयमग्रहण प्रथमसमय वर्त्तमानं जघन्यं संयमलब्धिस्थानं भवति। ततः परमसंख्येयलोक-
मात्राणि षट्स्थानानि गत्वा म्लेछभूमिज मनुष्यस्य देशसंयतचरस्य संयमग्रहण प्रथमसमये उत्कृष्टसंय
मस्थानं भवति ततः परमसंख्येय लोकमात्राणि षट्स्थानानि गत्वा आर्यखंडज मनुष्यस्य देशसंयमचरस्य
संयमग्रहण प्रथमसमये वर्त्तमानमुत्कृष्टं सकलसंयमलब्धिस्थानं भवति। एतान्यार्यम्लेछमनुष्यविषया-
णि सकलसंयमग्रहण प्रथमसमये वर्त्तमानानि संयमलब्धिस्थानानि प्रतिपद्यमानस्थानानीत्युच्यंते। अ-
त्रार्यम्लेछमध्यमस्थानानि मिथ्यादृष्टिचरस्य वा असंयतसम्यग्दृष्टिचरस्य वा देशसंयतचरस्य वा तदनु
रूपविशुद्ध्या सकलसंयमं प्रतिपद्यमानस्य संभवंति विधिनिषेधयोर्नियमावचने संभव प्रतिपत्तिरितिन्याय-
सिद्धत्वात् अत्र जघन्यद्वयं यथायोग्य तीव्रसंक्लेशाविशिष्टस्य उत्कृष्टद्वयं तु मंदसंक्लेशाविष्टस्येति ग्राह्यं म्लेछ
भूमिज मनुष्याणां सकलसंयमग्रहणं कथं संभवतीति नाशंकितव्यं दिग्विजयकाले चक्रवर्तिना सह आर्यखं-
डमागतानां म्लेछराजानां चक्रवर्त्यादिभिः सह जातवैवाहिक सम्बंधानां संयमप्रतिपत्तेरविरोधात् अथवा त-
त्कन्यकानां चक्रवर्त्यादिपरिणीतानां गर्भेषूत्पन्नस्य मातृपक्षापेक्षया म्लेछव्यपदेशभाजः संयमसंभवात्। तथा- ४०

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

जातीयकानां दीक्षार्हत्वे प्रतिषेधाभावात् अनुभयस्थानप्रतिपादनार्थमिदमाह ॥छ॥ तत्तो णुभयट्ठाणो सामा
इयछेदजुगलपरिहारे। पडिवद्धा परिणामा असंखलोगप्पमा होंति ॥२९५॥ तस्मादार्यखंडजमनुष्यस्य प्र-
तिपद्यमानोत्कृष्टसंयमलब्धिस्थानादसंख्येयलोकमात्राणि षट्स्थानान्यंतरयित्वा सामायिकछेदोपस्थापन
संयमद्वयसम्बंधि जघन्यमनुभयस्थानं मिथ्यादृष्टिचरमस्य संयमग्रहणद्वितीयसमये भवति। ततः परमसं
ख्येयलोकमात्राणि षट्स्थानानि गत्वा परिहारविशुद्धिसंयमसम्बंधि जघन्यसंयमलब्धिस्थानं परिहारवि-
शुद्धिसंयमात्प्रच्युत्य तच्चरमसमये वर्त्तमानस्य सामायिकछेदोपस्थापनसंयमयोः पतिष्यतो भवति ततः प
रमसंख्येयलोकमात्राणि षट्स्थानानि गत्वा परिहारविशुद्धिसंयमस्योत्कृष्टं संयमलब्धिस्थानं सर्वविशुद्ध-
स्य भवति ततः परमसंख्येयलोकमात्राणि षट्स्थानानि गत्वा सामायिकछेदोपस्थापनसंयमयोरुत्कृष्टमनुभय
स्थानमनिवृत्तिकरणक्षपकस्य चरमसमये भवति एवं मिथ्यात्वप्रतिपाताभिमुखसर्वजघन्यस्थानादारभ्या-
नुभयोत्कृष्टसंयमलब्धिस्थानपर्यंतं यावंति संयमलब्धिस्थानानि तावंति सर्वाण्यपि सामायिकछेदोपस्थापन
संयमद्वयसम्बंधीनीति ज्ञातव्यं तानि चोत्तरोत्तरमनंतगुणविशुद्धीनि तत्र प्रतिपातस्थानान्यसंख्यातलोक-
मात्राणि सर्वतः स्तोकानि [≡७ / ८८] तेभ्यः प्रतिपद्यमानस्थानान्यसंख्येयलोकगुणितानि [≡७ ८ / ८८] तेभ्योनुभयस्था-
नान्यसंख्यातलोकगुणि तानि [≡७ ८ / ८] सर्वाण्यपि संयमलब्धिस्थानानि मिलि त्वा। संख्येयलो-
कमात्राणि [≡७] भागहारभूतासंख्या- तलोकस्य संदृष्टिः ॥ ८ ॥ अथ सूक्ष्मसांपराययथाख्यातचारित्रप्रक
रणार्थमिदमाह ॥छ॥ तत्तो य सुहमसंजमपडिबद्धा संखसमयमेत्ता हु तत्तो दु जहाखादं एयविहं संजमं होइ ॥२९६॥
तस्मादनिवृत्तिकरणक्षपकचरमसमयसंभविसामाइकछेदोपस्थापनद्वयोरुत्कृष्टस्थानादसंख्येयलोकमा-
त्राणि षट्स्थानान्यंतरयित्वा उपशमश्रेण्या अवरोहणो अनिवृत्तिकरणाभिमुखं सूक्ष्मसांपरायसंयमस्य जघन्यं

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri



स्थानं तच्चरमसमये भवति। ततः परम संख्यात समय मात्र स्थानानि गत्वा सूक्ष्मसांपराय संयमस्योत्कृष्टं स्था-
नं भवति। तस्माद संख्येय लोकमात्राणि षट् स्थानान्यं तरयित्वा यथाख्यात चारित्र मेकमिदं सर्व स्थानेभ्योऽनंत
गुणविशुद्धिकं सकलसंयमोत्कृष्ट मुपशांतकषाय क्षीणकषाय सयोग केवल्ययोग केवलिस्वामिकं भवति स-
कलचारित्र मोहनीय प्रकृतीनां प्रकृतिस्थित्यनुभाग प्रदेशरूपाणां सर्वोपशमात्सर्व क्षयाच्च समुद्भूतत्वात्तस्य-
जघन्य मध्यमोत्कृष्ट स्थान विकल्पा न संतीत्येकविधत्वं प्रवचने प्रतिपादितं। अथ सामायिकादि संयमानां प्रति
पातस्थानादि लक्षण स्थान संख्यांतर स्थान संख्या स्वामि विषय विभाग प्रदर्शनार्थं गाथा सप्तकमाह ॥छ॥ पड-
चरिमे गहणादी समये पडिवाद दुगम णुभयं तु। तम्मज्झे उवरिम गुणगहणाहिमुहे य देसं वा ।२८७। प्रतिपात
प्रतिपद्यमान स्थान द्विकं यथा संख्यं पतच्चरम समये संयम ग्रहण प्रथम समये भवति अनुभय स्थानं तयोः प्र-
तिपातस्थान प्रतिपद्यमान स्थानयोर्मध्ये उपरितन गुणस्थानाभिमुखे च भवति। एतत्सर्वं यथा देशसंयमे सविस्तरं
प्रतिपादितं तथात्रापि ग्राह्यं पडिवादादी तिदयं उवरुवरि मसंखलोग गुणिदकमा अंतर छक्कपमाणं असंखलोगा हु
देसं वा ॥२८८। प्रतिपातादि त्रितयं स्वस्व जघन्य स्व स्थानात्स्व स्वोत्कृष्ट स्थान पर्यंत मुपर्युपर्य संख्यात लोक गुणित-
क्रमाण्येंतरेषु षट्स्वपि प्रत्येक मसंख्यात लोकमात्राणि षट् स्थानानि देशसंयमवद्ज्ञातव्यानि मिच्छयदेसे भिण्णे-
पडिवाद द्वाणगे वरं अवरं तप्पाउग्ग किलिट्ठे तिव्व किलिट्ठे कमचरिमे ॥२८९। तत्र प्रतिपात स्थानेषु मिथ्यात्वा संयम
देशसंयमाभिमुख भेद भिन्नेषु जघन्यानि तीव्र संक्लिष्टस्य चरम समये भवंति उत्कृष्टानि तत्तत्प्रायोग्य मंद संक्लिष्ट-
स्य भवंति पडिवज्ज जहण्ण दुगं मिच्छे उक्कस्स जुगल मवि देसे। उवरिं सामइय दुगं तं मज्झे होंति परिहारा तथा प्रति
पद्यमान जघन्य स्थान द्वय मार्य म्लेच्छ स्वामिकं मिथ्यादृष्टि चरस्य भवति। तदुत्कृष्ट स्थान युगल मपि देशसंयत चर-
स्य भवति। प्रतिपद्यमान स्थानानामुपर्यनुभय स्थानानि सामायिक छेदोपस्थापन संयम द्वय सम्बंधीनि भवंति। तत्र ४२

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri



तस्य परिहारविशुद्धिसंयमोत्कृष्टस्थानं स्वस्मिन्नेव सर्वविशुद्धस्याप्रमत्तस्यैकांतवृद्धिचरम-
समये भवति। सामायिकदुग जहणं उवरं आणियट्टिखवगचरिमम्हि। चरमाणियट्टिस्सुवरिं पडंत
संयमद्वयस्य जघन्योत्कृष्टस्थानयोर्द्वयोर्मध्ये परिहारविशुद्धिसंयमस्थानानि भवंति। परिहारस्स जहणं साम-
यियदुगे पडंतचरिमम्हि। तज्जेट्ठं सट्ठाणे सव्वविसुद्धस्स तस्सेव ॥२०१॥ परिहारविशुद्धिसंयमस्य जघन्यस्थानं
संक्लेशवशात्सामायिकछेदोपस्थापनद्वये पतिष्यतः तच्चरमसमये भवति। सामायिकछेदोपस्थापनद्वयस्य
मिथ्यात्वाभिमुखं जघन्यस्थानमोघजघन्यस्थानं सर्वसंयमसामान्यजघन्यस्थानं भवतीत्यर्थः। तयोरुत्कृष्ट-
स्थानमनिवृत्तिकरणक्षपकचरमसमये भवति। सूक्ष्मसांपरायसंयमस्य जघन्यस्थानमुपशमश्रेण्यामव-
रोहणेऽनिवृत्तिकरणस्योपरि पतिष्यतः सूक्ष्मसांपरायोपशमकस्य चरमसमये भवति तस्योत्कृष्टस्थानं-
क्षीणकषायगुणस्थानाभिमुखसूक्ष्मसांपरायक्षपकस्य चरमसमये भवति। खवगसुहुमस्स चरिमे वरं ज-
हाखादमोघजेट्ठं तं। पडिवाददुगा सव्वे सामाइय छेद पडिबद्धा ॥२०३॥ यथाख्यातचारित्रं सर्वसंयमसामान्यो-
त्कृष्टं तस्य जघन्यादिविकल्पाभावात्। प्रतिपात प्रतिपद्यमानस्थानानि सर्वाण्यपि सामाइकछेदोपस्थापनसंय-
मद्वयप्रतिबद्धान्येव नेतरसंयमसंबंधीनि संभवंति। मिथ्यादृष्ट्यसंयतदेशसंयतानां सकलसंयमग्रहणकाले
सामायिकछेदोपस्थापनसंयमयोरेव प्रथमतः प्रतिपत्तिनियमात् संयमसामान्यापेक्षया प्रतिपद्यमानस्थानानि
सामायिकछेदोपस्थापनसंयमग्रहणप्रथमसमयवर्तीनि सामायिकछेदोपस्थापनप्रतिबद्धान्येव। तथा सामायिकछेदोपस्थापनसंयमा-
भ्यां प्रच्यवमानस्यैव मिथ्यात्वासंयमदेशसंयमेषु प्रतिपातः संभवति। न परिहारशुद्ध्यादिसंयमेभ्यः प्रच्यवमा-
नस्य तत्प्रतिपातः परिहारविशुद्धिसूक्ष्मसांपरायसंयमाभ्यां प्रच्यवमानस्य सामायिकद्विकेयथाख्यातचारि-
त्रात्प्रच्यवमानस्य सूक्ष्मसांपरायसंयमे च प्रतिपातस्य सिद्धांते प्रतिपादितत्वात् ननु भवक्षयादुपशमश्रेण्यां-
मृतस्य सूक्ष्मसांपराययथाख्यातचारित्रयोर्द्वेवासंयते प्रतिपातोऽस्ति। अतः कथमसंयमे प्रतिपाताभाव इति चेत्
वयमिमे ब्रूमहे संयमघातिकषायोदयवशोत्पन्नसंक्लेशवशेन गुणस्थानाद्धाक्षयेणाधस्तनगुणस्थानेषु प्रति-

सुहुमस्स सु-
हुमवरं।२०२

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

पातस्यात्र विवक्षितत्वात्। भवक्षयहेतुकः प्रतिपातः पुनरत्राविवक्षितः। तत्प्रतिपातविवक्षायां पुनर्द्वेधा संयमाभि
मुखत्वेन मिथ्यात्वदेशसंयमाभिमुखता बद्धदेवायुष एव सकलसंयमिनः संयमकाले मृतस्य देवगतिमु
क्त्वाऽन्यत्र गतावनुत्पादात् देवगतौ चामिथ्यादृष्टिष्वनुत्पादात् देशसंयमस्य तत्राभावाच्च तदेवं सामायिका
दि पंचप्रकारसकलसंयमलब्धिस्वरूपं च सविस्तरं प्ररूपितं ॥छ॥ भद्रमस्तु जिनशासनाय।छ॥

अथ चारित्रमोहोपशमनं परममंगलपूर्वकं प्रतिजानीते।छ। उवसमिय सकल उपशमित सकलदोषा-
नुपशांतकषायवीतरागांताननुपशमकान्प्रणम्य कषायोपशमनं वक्ष्यामीति। अथ चारित्रमोहोपशमनाभिमु
खस्य स्वरूपमाह ॥छ॥ उवसमचारित्ताहिमुहो वेदगसम्मो अणं विजोयित्ता अंतोमुहुत्तकालं अधापवत्तोऽपम-
त्तोय ॥२०४॥ उपशमचारित्राभिमुखो वेदकसम्यग्दृष्टिर्जीवः प्रथममनंतानुबंधिचतुष्टयं प्रागुक्तविधिना विसंयो
ज्यांतर्मुहूर्त्तकालपर्यंतमधाप्रवृत्ताप्रमत्ताभिधानः स्वस्थानाप्रमत्तः प्रमत्ताप्रमत्तपरावृत्तिसहस्राणि कुर्वन्नवि
श्राम्यति ततः परं दर्शनमोहत्रयं क्षपयित्वा क्षायिकसम्यग्दृष्टिः सन् कश्चिज्जीवश्चारित्रमोहमुपशमयितुं प्रार
भते तस्य दर्शनमोहक्षपणाविधिः प्रागुक्त इति नेह पुनरुच्यते। यः पुनर्द्वितीयोपशमसम्यक्त्वेनोपशमश्रेणिमारोह
ति तस्य दर्शनमोहोपशमविधानप्रतिपादनार्थमिदमाह।छ। तत्तो तियरणविहिणा दंसणमोहं समं खु उवस-
मदि सम्मत्तुप्पत्तिं वा अण्णं च गुणसेढी करणविही ॥२०५॥ ततः स्वस्थानाप्रमत्तोंतर्मुहूर्त्तमात्रं विश्रम्य पुनर्विशुद्धिमा
पूरयन् करणत्रयं विधाय दर्शनमोहं युगपदेवोपशमयति। तत्रापूर्वकरणप्रथमसमयादारभ्य स्थित्यनुभागकां-
डकघातो गुणश्रेणिनिर्जरा च गुणसंक्रमणं विनाऽन्यत्सर्वं सविधानकं प्रथमोपशमसम्यक्त्वोत्पत्तौ यथा प्ररूपि-
तं तथात्रापि द्रष्टव्यं। अनंतानुबंधिविसंयोजनेपि स्थितिखंडनादिविधानं पूर्ववदेव ज्ञातव्यं उक्तार्थमनूद्य तद्वि-
शेषणार्थमिदमाह। दंसणमोहुवसमणं तक्खवणं वा हु होदि णवरिं तु। गुणसंकमो ण विज्जदि वंचे वाधापवत्तं च।६। 

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

चारित्रमोहोपशमाभिमुखस्य दर्शनमोहोपशमनं वा तत्क्षपणं वा भवति नियमाभावात्। अयं तु विशेषः दर्श-
नमोहोपशमनविधाने गुणसंक्रमो नास्ति केवलं विध्यातसंक्रमो वा ऽधाप्रवृत्तसंक्रमो वा संभवति। तत्र तदानीं
तनस्थितिसत्त्वविशेषनिर्ज्ञानार्थमिदमाह ॥छ॥ ठिदिसत्तमपुव्वदुगे संखगुणूणं तु पढमदो चरिमं उवसामणा-
अणियट्टी संखा भागासु तीदासु ॥२६७॥ अपूर्वकरणस्य प्रथमसमयकर्मस्थितिसत्त्वात्कांडकघातमाहात्म्येन-
तच्चरमसमये कर्मस्थितिसत्त्वं संख्यातगुणहीनं भवति। एवमनिवृत्तिकरणेपि स्थितिसत्त्वं ज्ञातव्यं। अथानिवृ
त्तिकरणकालस्य संख्येयबहुभागेषु गतेषु अवशिष्टैकभागे विधीयमानं क्रियांतरं प्रदर्शयितुमिदमाह ॥छ॥ स-
म्मस्स असंखेज्जा समयपवद्धाणुदीरणा होंति तत्तो मुहुत्तअंते दंसणमोहंतरं कुणायि ॥२६८॥ अपूर्वकरणप्र-
थमसमये आरब्धाया गुणश्रेणी साधिका पूर्वा निवृत्तिकरणकालायामा गलितावशेषप्रमाणानिवृत्तिकरणकाल
बहुभागपर्यंतं प्रवर्त्तते। तत्रापकृष्टद्रव्यस्य पल्यासंख्यातभागखंडितस्य बहुभागद्रव्यमुपरितनस्थितौ निक्षि
प्तं तदेकभागस्य पुनरसंख्यातलोकखंडितस्य बहुभागद्रव्यं गुणश्रेण्यायामे निक्षिप्तं। तदेकभागद्रव्यमुद-
यावल्यां निक्षिप्तं एवं निक्षिप्ते उदये समयप्रबद्धस्यासंख्यातैकभागमात्रमेव द्रव्यं पतति। इदानीं पुनरनिवृ-
त्तिकरणकालसंख्यातैकभागमात्रेवशिष्टे सम्यक्त्वप्रकृतिद्रव्यादपकृष्टद्रव्यस्य पल्यासंख्यातभागखंडित
स्य बहुभागमुपरितनस्थितौ निक्षिप्य तदेकभागं पुनरपि पल्यासंख्यातभागेन खंडयित्वा बहुभागं गुणश्रे-
ण्यायामे निक्षिप्य तदेकभागं पुनरुदयावल्यां निक्षिपति। अतः कारणात्सम्यक्त्वप्रकृतिद्रव्यस्यासंख्येयाः स-
मयप्रबद्धाः उदयनिषेके निक्षिप्योदीर्यंते। पल्यस्य भागहारभूतासंख्येयरूपबाहुल्यमाहात्म्यात् यत्रासंख्येय-
समयप्रबद्धोदीरणाकरणं कथ्यते तत्र पल्यासंख्यातभाग एवापकृष्टद्रव्यस्य भागहारो नासंख्यातलोक इति च
नात् अतः परमंतर्मुहूर्त्तकाले गते दर्शनमोहस्यांतरं करोति। अथांतरकरणप्रदर्शनार्थमाह ॥छ॥ अंतोमुहुत्त-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

मेत्तं मोत्तूणाय पढमगिदिं दंसणमोहंतरं कुणायि ॥२१९॥ उदयवत्याः सम्यक्त्व प्रकृतेरंतर्मुहूर्त्तमात्री मनुदय-
योरितरयो र्मिथ्यात्वमिश्र प्रकृत्योश्च आवलिमात्रीं प्रथमस्थितिं मुक्त्वा उपर्यंतर्मुहूर्त्त निषेकाणामंतरमभाव
मंतर्मुहूर्त्त काले नकरोति। सम्यक्त्व। प्रकृतेर्गुणश्रेणिशीर्षं ततः संख्यात गुणितानुपरितनस्थिति निषेकांश्च
गृहीत्वाअंतरं करोति। मिथ्यात्व मिश्रयो र्गलितावशेष गुणश्रेण्यायामं सर्वं ततः। संख्यात गुणितानुपरितनस्थि
तिनिषेकांश्च गृहीत्वाअंतरं करोतीत्यर्थः। उपरितिसृणां प्रकृतीनां द्वितीयस्थिति प्रथम निषेकाः सदृशा एव-
अधः प्रथमस्थित्यग्रनिषेकाः विसदृशा इतिग्राह्यं। अथांतर द्रव्यस्य निक्षेप प्रकार प्रदर्शनार्थं गाथाचतुष्टय
माह ॥छ॥ सम्मत्त पयडि पढमट्ठिदिम्मि संछुहदि दंसणतियाणं। उक्कीरयं तु दव्वं बंधाभावादु मिच्छस्स ॥२२०।
दर्शनमोहत्रयस्यांतरे उत्कीर्णं द्रव्यमुदयवत्याः सम्यक्त्व प्रकृतेः प्रथमस्थितावेवनिक्षिपति द्वितीयस्थितौय
त्र नूतन बंधोस्ति तत्र उत्कृष्य द्वितीयस्थितावपि निक्षिपति। अत्र पुनर प्रमत्त गुणस्थाने दर्शनमोहस्य बंधा-
भावात् द्वितीयस्थितौ न निक्षिपतीत्यर्थः।छ। विदियट्ठिदिस्स दव्वं उक्कट्टियदेदि सम्मपढमम्हि विदियट्ठिदि-
म्हि तस्सय अणुकीरिज्जंतमाणम्हि ॥२२१। गुणश्रेणी निर्जरार्थमुदयावलिबाह्य प्रथमसमयादारभ्य सर्वत्राप
कृष्टद्रव्यं पल्यासंख्यातभागेन खंडयित्वा बहुभागमंतरायामं मुक्त्वा स्वस्वोपरितन द्वितीयस्थितौ निक्षिप्य
शेषैकभागं पल्यासंख्यातैकभागेन खंडयित्वा बहुभागं सम्यक्त्व प्रकृति प्रथमस्थितौ गुणश्रेण्यायामे निक्षिप्य
तदेकभागमुदयावल्यां निक्षिपति। एवमंतरस्य द्वितीयादि फालि द्रव्यं दर्शनमोहत्रय सम्बंधि प्रतिसमय-
मसंख्यात गुणितक्रमेण गृहीत्वा सम्यक्त्व प्रकृति प्रथमस्थितावेव निक्षिपति। अंतरे उपरिचापकृष्ट द्रव्यमपि
प्रतिसमयमसंख्यात गुणितक्रमेण गृहीत्वा सम्यक्त्व प्रकृति। प्रथमस्थितौ अंतरस्योपरि स्वस्वद्वितीयस्थि-
तौ चाग्रेतिष्ठापनावलिं मुक्त्वा निक्षिपति ॥छ॥ सम्मत्त पयडि पढमट्ठिदीसु सरिसाण मिच्छमिस्साणं ठिदि- ४३

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri
Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

दव्वं। सम्मस्सय सरिसणिसेयम्हि संकमदि मिथ्यात्वमिश्रयोरुदयावलि बाह्यांतरायामे सम्यक्त्व प्रकृति प्रथमस्थिति सदृशस्थितयोये निषेकास्तानुत्कीर्य स्वसमान स्थितिषु सम्यक्त्व प्रकृति प्रथमस्थिति निषेकेष्वेव निक्षिपति। न तेषां निक्षेपविभागोस्ति तदुपरि स्थितांतरायाम निषेकाः फालिगताः सर्वेपि पूर्वोक्त विधानेनैव सम्यक्त्व प्रकृति प्रथमस्थितौ गुणश्रेण्यामुदयावल्यां च विभज्य निक्षिपतीत्यर्थः ॥ छ ॥ जावंतरस्स दुचरिमफालिं पावइ इमो कमो ताव। चरिमतिदंसण दव्वं छुहेदि सम्मस्स पडमम्हि ॥ २९३। एवं फालि द्रव्यस्यापकृष्टद्रव्यस्य च यावदंतर द्विचरम फालिं। प्राप्नोति तावदयमेव निक्षेपक्रमः। पुनर्दर्शनमोहत्रयस्य चरमफालिद्रव्यं तत्रापकृष्ट द्रव्यं च सर्वं सम्यक्त्व प्रकृति प्रथमस्थितावेव निक्षिपति न पूर्ववदंतरापकृष्ट बहुभागस्य द्वितीयस्थितौ निक्षेपः कर्त्तव्य इति भावः। अथ दर्शनमोह गुणश्रेण्यपचमान कथनार्थमिदमाह ॥ छ ॥ विदियट्ठिदिस्स दव्वं पढमट्ठिदिमेदि जाव आवलिया। पडिआवलिया चिट्ठदि सम्मत्तादि मट्ठिदीताव ॥ २९४। यावत्सम्यक्त्व प्रकृति प्रथमस्थितिः आवलि प्रत्यावलि मात्रावशेषा भवति। तावद्द्वितीयस्थिति द्रव्यमपकर्षणावशेन प्रथमस्थितिमागच्छति। तावत्पर्यंतं दर्शनमोहस्य गुणश्रेणी प्रवर्त्तते। सम्यक्त्व प्रकृति प्रथमस्थितौ द्व्यावलिमात्रावशिष्टायां तस्य गुणश्रेणी नास्तीत्यर्थः। ज्ञानावरणादि शेषकर्मणां चारित्र परिणाम निबंधना गुणश्रेणी प्रवर्त्तत इति ग्राह्यं प्रथमस्थितेः समयाधिकावल्यवशेष पर्यंतं सम्यक्त्व प्रकृतेरुदीरणावर्त्तते। ततः सम्यक्त्व प्रकृति प्रथमस्थितेश्चरमसमये ऽनिवृत्तिकरणकालः समाप्तो भवति। तदनंतरमंतर प्रथमसमये द्वितीयोपशमसम्यग्दृष्टिर्भवति जीवः। अथ दर्शनमोह द्रव्यस्य संक्रम प्रतिपादनार्थमाह ॥ छ। सम्मादिट्ठिदिझीणे मिच्छदव्वादु सम्मसंमिस्से। गुणसंकमेणणियमा विज्झादो संकमो होदि सम्यक्त्व प्रकृति प्रथमस्थितौ निरवशेषं गलितायां संजातद्वितीयोपशम सम्यक्त्वस्य जीवस्य मिथ्यात्व द्रव्यात् गुणसंक्रमेण विनांगुलासंख्यात भागमात्र विध्यात संक्रमेणाभ-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri



तैकभागमात्रं द्रव्यं गृहीत्वा सम्यक्त्व सम्यग्मिथ्यात्व प्रकृत्योः प्रतिसमयं विशेषहीनक्रमेणानिक्षिपति ॥छ॥ अथ-
द्वितीयोपशमसम्यग्दृष्टेरेकांतवृद्धिकालप्रमाणं दर्शयितुमिदमाह ॥छ। सम्मत्तुप्पत्तीये गुणसंकमपूरण-
स्सकालादो। संखेज्जगुणंकालं विसोहि वट्टीहि वट्टदिहु ॥२२६। प्रथमोपशमसम्यक्त्वोत्पत्तौ गुणसंक्रमपूरण
कालो यावत् अंतर्मुहूर्त्तमात्रः पूर्वं प्ररूपितः। तत्संख्येयगुणं कालमयं द्वितीयोपशमसम्यग्दृष्टिः। प्रतिसमयमनं-
तगुणितक्रमेण विशुद्ध्या वर्द्धते। अयं च विशुद्धेकांतवृद्धिकालोंतर्मुहूर्त्तमात्र एव। एकांतवृद्धिकालात्परं-
तस्यावस्था विशेषं प्ररूपयितुमिदमाह ॥छ। तेण परं हायदि वा वट्टदि तदवट्ठिदो विसुद्धीहि। उवसंतदंसण
तियो होदि पमत्तापमत्तेसु ॥२२७। तस्मादेकांतवृद्धिकालात्परं द्वितीयोपशमसम्यग्दृष्टिः संक्लेशपरिणाम
वशात् विशुद्ध्या हीयते वा संक्लेशहान्या विशुद्ध्या वर्द्धते। वा अयं च व्यवस्थया कियंतमपि कालं हानिवृद्धिं वि-
नावस्थितो वा भवति। एवमुपशमित दर्शनमोहत्रयो जीवः संक्लेश विशुद्धि परावृत्तिवशेन बहुवारं प्रमत्ताप्रम-
त्तगुणस्थानयोः परावर्त्तते। अथ द्वितीयोपशमसम्यग्दृष्टेरुपशमश्रेण्यारोहणावसरं प्रदर्शयितुमिदमाह।
॥छ॥ एवं पमत्तमियरं परावत्तिसहस्सयं तु कादूण इगिवीसमोहणीयं उवसमदि ण अण्णपयडीहु ॥२२८।
एवं पूर्वोक्तप्रकारेणायं। द्वितीयोपशमसम्यग्दृष्टिर्वा क्षायिकसम्यग्दृष्टिर्वा प्रमत्ताप्रमत्तपरावृत्तिसहस्रा-
णि कृत्वा द्वादश कषाय नव नोकषाय भेदाभिन्नमेकविंशति। प्रकृतिकं चारित्रमोहनीयमेवोपशमयितुमुपक्र-
मते नान्यकर्मप्रकृतीस्तासामुपशमकरणाभावात्। एवं कृतपरिकरस्या प्रमत्तसंयतस्योपशमश्रेण्यारोह-
णे क्रियाविशेषविषयानधिकारानुद्देष्टुमिदमाह ॥छ॥ तिकरण बंधोसरणं कमकरणं देसघादिकरणं च
अंतरकरणं उवसमकरणं उवसामणे होंति ॥२२९। चारित्रमोहोपशमने कर्त्तव्ये अधःप्रवृत्तकरणमपूर्वक-
रणमनिवृत्तिकरणं स्थितिबंधापसरणं क्रमकरणं देशघातिकरणमंतरकरणमुपशमकरणं चेत्य-



Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

ष्टाधिकारा भवंति। तेष्वधःप्रवृत्तकरणं सातिशयाप्रमत्तसंयतः कुरुते तत्करणस्य लक्षणं तत्र क्रियमाणकार्या-
णि च यथा प्रथमोपशमसम्यक्त्वाभिमुखसातिशयमिथ्यादृष्टेर्भणितानि तथैवात्रापि भणितव्यानि अयं तु वि-
शेषः संयमयोग्यप्रकृतिबंधोदयौ अनंतानुबंधिचतुष्कनरकतिर्यगायुर्वर्जितसर्वप्रकृतिसत्वं चात्रावसरे वक्त-
व्यं। अथापूर्वकरणे कार्यविशेषप्रतिपादनार्थमिदं गाथाद्वयमाह॥ छ। विदियकरणादिसमये उवसंतति-
दंसणे जहण्णं पल्लस्ससंखभागं उक्कस्सं सायरपुधत्तं। अपूर्वकरणस्य प्रथमसमये वर्त्तमानस्य द्विती-
योपशमसम्यग्दृष्टेर्जघन्यं स्थितिकांडकं पल्यसंख्यातभागमात्रमुत्कृष्टं सागरोपमपृथक्त्वप्रमाणं। छ। ठि-
दिखंडयं तु खयिये वरावरं पल्लसंखभागो दु ठिदिबंधोसरणं पुण वरावरं तत्तियं होदि॥ २२१॥ तस्मिन्नेवा-
पूर्वकरणप्रथमसमये वर्त्तमानस्य चारित्रमोहोपशमकस्य क्षायिकसम्यग्दृष्टेर्जघन्यमुत्कृष्टं च स्थितिकांडकं
पल्यसंख्यातभागमात्रमेव तथापि जघन्यादुत्कृष्टं संख्यातगुणितं दर्शनमोहक्षपणकाले विशुद्धिविशेषेणाक-
र्मस्थितेर्बहुशः खंडितत्वात् स्थित्यनुसारेण च कांडकाल्पबहुत्वस्य न्याय्यत्वात् स्थितिबंधापसरणं पुनरुप-
शमसम्यग्दृष्टेः क्षायिकसम्यग्दृष्टेश्च पल्यसंख्यातभागमात्रमेव। तत्रापि जघन्यादुत्कृष्टं संख्यातगुणितम-
पि पल्यसंख्यातभागमात्रमेव। अथानुभागकांडकादिनिर्देशार्थमिदमाह॥ छ। असुहाणं रसखंडमणंताभा-
गाणं खंडमियराणं अंतोकोडाकोडिं सत्तं बंधं च तट्ठाणे॥ २२२॥ अशुभानां प्रकृतीनामनुभागस्यानंतबहुभागमा-
त्रमनुभागकांडकमपूर्वकरणप्रथमसमये प्रारभ्यते। न पुनः शुभानां प्रकृतीनां विशुद्ध्या शुभप्रकृत्यनुभागस्य
खंडनायोगात्। तत्र प्रथमादिनिषेकाणामनुभागविभागः किंचित्प्रदर्श्यते। तद्यथा। आयुर्वर्जितसप्तकर्मणाम-
घ्येविवक्षितैककर्मणः सत्वद्रव्यमिदं | स ७१२- / ७ | अस्मिन्नानागुणहानिगतसर्वनिषेकेषु विभज्य दीयमाने सा-
धियदि वड्ढगुणहानिभाजिदे पढमा इत्या यातं प्रथमनिषेकद्रव्यमिदं | स ७१२- / ७।१२ | अस्मिन्ननुभागविषया

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri



नंत नानागुणहानिगतवर्गणासु विभज्य दीयमाने साहियादि वट्ट गुणहानि भाजिदे पढमा इत्यनंतात्मकसा-
धिकद्व्यर्द्धगुणहान्या भक्ते आयातं प्रथमवर्गणाद्रव्यमिदं स ७१२- ७।१२।२।ख ३ २ इतो द्वितीयादिवर्गणासु द्रव्यं विशेष-
हीनक्रमेण दीयते। एवं द्वितीयादिगुणहानिष्वर्द्धार्द्धक्रमे ण प्रथमादिवर्गणाद्रव्यमवतिष्ठते त
त्र चरमगुणहानिचरमस्पर्द्धकचरमवर्गणाद्रव्यमानीयते। तद्यथा। प्रथमगुणहानिप्रथमवर्गणाद्रव्ये-
अन्योन्याभ्यस्तराशिस्पर्द्धेन भक्ते चरमगुणहानि प्रथमवर्गणाद्रव्यमागच्छति रूपोन नानागुणहानिमात्रद्विका
नां भागहारत्वेनान्योन्याभ्यस्तराशिस्पर्द्धोत्पत्तेः स ७१२- ७१२ ख ३ अ २।२ अस्मिन् रूपोन गुणहानिमात्रचयेष्वपनीतेषु चर
मगुणहानिचरमवर्गणाद्रव्यमायाति ॥ – स ७१२-गु ७१२ ख ३ अ गु २ २।२ एवं द्वितीयादिनिषेकद्रव्येष्वप्य-
नुभागविभागेन तिर्यग्रचनायां प्रथमगुणहानि प्रथमव- र्गणा प्रभृतिचरमगुणहानिचर
मवर्गणापर्यंतं वर्गणाद्रव्यमानेतव्यं कर्मस्थिति चरमगुणहानिचरम निषेकद्रव्यमिदं स ७१२१-गु ७।१२ पू गु २ अ-
स्मिन्ननुभागसंबंध्यनंतनानागुणहानिवर्गणासु विभज्य दीयमाने साहियादि वट्ट गुणहा नि
भाजिदे पढमा इत्यनुभागस्यानंतात्मकद्व्यर्द्धगुणहान्या भक्ते अनुभागस्य प्रथमगुणहानि प्रथमं वर्गणा
द्रव्यमागच्छति ॥ छ। छ। स ७१२- ७१३ ख ३ प २ व २ एवं द्वितीयादिगुणहानिष्वनुभागसम्बंधिनीषु तिर्यग्रचितासु वर्गणा
द्रव्यमर्द्धार्द्धक्रमेण गच्छ ति अनुभागस्य प्रथमगुणहानि प्रथमवर्गणाद्रव्ये अनंतात्मकान्योन्या
भ्यस्तराशिस्पर्द्धेन भक्ते अनुभागस्य चरमगुणहानि प्रथमवर्गणाद्रव्यमागच्छति पूर्ववत्। स ७१२- ७१३ प ख ३ अ व २।२२ अस्मि
न् रूपोनगुणहानिमात्रचयेष्वपनीतेषु अनुभागस्य चरमगुणहानिचरमवर्गणाद्रव्यं। भव
ति स ७१२- ७१३ प ख ३ अ व २ २ इत्थं सर्वनिषेकसत्वानुभागावस्थितिर्ज्ञातव्या। अत्र तात्कालिकानुभागसत्वं ॥ ख। ना अनंते-
न खंडयित्वा तद्बहुभागमात्रमनुभागकांडकं ख ना ख ख पुनस्तदेकभागमनंतेन खंडयित्वा ६५

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

एकभागमात्रमतिष्ठाप्य स ना ख ख बहुभागमात्रानुभागसत्वे स ना ख ख ख पूर्वखंडितानुभागकर्मपरमाणुद्रव्यं नि
क्षिपति। अवशिष्टानुभाग रूपेण तद्द्रव्यं परिणामतीत्यर्थः। अपूर्वकरण प्रथमसमये आयुर्व-
र्जितकर्मणां स्थितिसत्वं [redacted] स्थितिबंधश्च अंतःकोटीकोटिसागरोपम प्रमितस्तच्च-
स्थितिबंधात् सा अंको ४ ४ स्थितिसत्वं संख्यातगुणं सा अंको २- अयमेव विशेषः अथापूर्वकरण प्रथमस
मये गुणश्रेणिनि र्जरानिरूपणार्थमिदमाह ॥छ॥ उदयावलिस्स वाहिं गलिदवसेसा अपुव्व अणियट्टी
सुहुमक्खादो अहिया गुणसेढी होदि तद्धाणे ॥२२३। उदयावलिबाह्य प्रथमसमयादारभ्य अपूर्वानिवृत्तिकर-
ण सूक्ष्मसांपराय गुणस्थानकालेभ्य उपशांतकषायकाल संख्यातैक भागमात्रेणाभ्यधिकायामा गुणश्रेणयः
पूर्वकरण प्रथमसमये गलितावशेष समाना प्रारब्धा सा च। आयुर्वर्जितसप्त कर्मणामुदयावलि बाह्यद्रव्य
मपकृष्य प्रागुक्तविधानेन निक्षेपस्वरूपा नपुंसकवेदादिप्रकृतीनां गुणसंक्रमोप्यत्रैव प्रारब्धः। बंधवत्प्रकृती-
नां गुणसंक्रमो नास्ति। एवं द्वितीयादिसमयेष्वपि स्थितिकांडकादिविधानं पूर्वोक्तक्रमेणैव ज्ञातव्यं अथापू-
र्वकरणे बंधोदय व्युच्छित्ति विभाग प्रदर्शनार्थमिदमाह ॥छ॥ पढमे छट्ठे चरिमे बंधे दुग तीस चदुर वोछिण्णा-
छण्णोकसायउदउ अपुव्वचरिमम्हि वोछिण्णा ॥२२४। अपूर्वकरणकालस्य सप्तभागेषु प्रथमभागे द्वयोर्नि-
द्राप्रचलयोर्बंधो व्युच्छिन्नः षष्ठभागे तीर्थकरत्वादीनां त्रिंशत्प्रकृतीनां बंधो व्युच्छिन्नः सप्तमभागचरमसमये-
हास्यादिचतुःप्रकृतीनां बंधो व्युच्छिन्नः हास्यादिषण्णोकषायाणामुदयः अपूर्वकरणचरमसमये व्युच्छिन्नः।छ।
अथानिवृत्तिकरणे क्रियमाणव्यापारांतर प्ररूपणार्थमिदमाह ॥छ। अणियट्टिस्स य पढमे अण्णट्ठिदिखंडप
हुदिमाढवइ उवसामणाणिधत्तीणिकाचणा तत्थ वोछिण्णा ॥२२५। अथानिवृत्तिकरण प्रथमसमये अन्यान्येव-
स्थितिखंड स्थितिबंधापसरणानुभागखंडान्यपूर्वकरणचरमसमयसंभवविलक्षणानि प्रारभते चारित्रमो-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri



होपशामकस्तत्रैव सर्वकर्मणामुपशामननिधत्तिनिकाचनकरणानि विनष्टानि अपुव्व करणेति दसकरणाऽ-
तिव्युच्छित्ति दसकरणा इतिव्युच्छित्तिनियमकथनाद निवृत्तिकरण प्रथमसमयादारभ्य सर्वकर्मणामुदये संक्रमो-
दययोरुत्कर्षणापकर्षणसंक्रमोदयेषु च निक्षेप्तुं शक्यानि जातानीत्यर्थः। अथ तस्मिन्नेवानिवृत्तिकरण प्रथमस-
मये कर्मणां स्थितिसत्वबंधप्रमाणनिर्देशार्थमिदमाह ॥ छ। अंतोकोडाकोडी अंतोकोडीय सत्त बंधं च सत्तण्हं
पयडीणं अणियट्टीकरण पढमम्हि ॥ २२६। अनिवृत्तिकरण प्रथमसमये आयुर्वर्जितसप्तकर्मणां स्थितिस-
त्वमंतःकोटाकोटिप्रमितं [सा अंको २] स्थितिबंधश्चांतःकोटिप्रमितः [सा अंको ४] अपूर्वकरणकालकृतस्थिति
खंडस्थितिबंधापसरण संख्यात ४ सहस्रमाहात्म्यात्। अथ तस्मिन्नेवानिवृत्तिकरणकाले स्थितिबंधापस-
रणक्रमेण स्थितिबंधक्रमं प्रदर्शयितुं गाथात्रयमाह ॥ छ। ठिदिबंधसहस्सगदे संखेज्जा बादरे गदा भागा तत्थ
असण्णिस्स ठिदीसरिसंठिदीबंधणं होदि ॥ २२७। अनिवृत्तिकरण प्रथमसमयादारभ्यांतर्मुहूर्त्तमंतर्मुहूर्त्तं प्रति
पल्यसंख्यातभागमात्रस्थितिबंधापसरणक्रमेण संख्यातसहस्रस्थितिबंधेषु गतेषु तत्करणकालस्य संख्यात-
बहुभागाय दागछंति तदा असंज्ञिस्थितिबंधसदृशस्थितिबंधो भवति। सहस्रसागरोपमप्रतिभागेन नामगोत्रयो-
र्द्विसप्तभागप्रमितः। ज्ञानदर्शनावरणांतरायसातवेदनीयानां स्थितिबंधः सागरोपमसहस्रत्रिसप्तभागप्र-
मितः चारित्रमोहस्य स्थितिबंधः सागरोपमसहस्रचतुःसप्तमभागप्रमितो भवतीत्यर्थः। एवं वैशंतिकत्रैंशत्क-
चात्वारिंशत्ककर्मणां प्रतिभागक्रम उत्तरत्रापि ज्ञातव्यः ॥ छ। ठिदिबंधपुधत्तगदे पत्तेयं चदुर तिय वियेइंदी ठिदि
बंधसमं होदि हु ठिदिबंधमणुक्कमेणेव ॥ २२८। ततः परमसंख्यातसहस्रस्थितिबंधेषु गतेषु चतुरिंद्रियस्थिति
बंधसदृशस्थितिबंधो भवति। नामगोत्रादिकर्मणां सागरोपमशतस्य द्विसप्तमत्रिसप्तमचतुस्सप्तमभागप्रमि-
तस्थितिबंधो भवतीत्यर्थः। ततः परं संख्यातसहस्रस्थितिबंधेषु गतेषु त्रींद्रियस्थितिबंधसदृशस्थितिबंधो- ४६

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

भवति। प्रागुक्त वैंशतिकादीनां कर्मणां पंचाशत्सागरोपमद्विसप्तमत्रिसप्तमचतुस्सप्तम भाग प्रमित इत्यर्थः।
इतः परं संख्यात सहस्र स्थिति बंधेषु गतेषु द्वींद्रिय स्थिति बंध सदृशा स्थिति बंधो भवति। पूर्वोक्त त्रिस्थान कर्म
णां पंचविंशति सागरोपम द्वि सप्तम त्रिसप्तम चतुस्सप्तम भाग प्रमितः स्थिति बंधो भवतीत्यभिप्रायः ततः प-
रं संख्यात सहस्र स्थिति बंधेषु गतेषु एकेंद्रिय स्थिति बंध सदृशः स्थिति बंधो भवति। वीसिय तीसिय चालीसि
य संकेतितानां कर्मणामेक सागरोपम द्वि सप्तम त्रिसप्तम चतुस्सप्तम भाग प्रमितः स्थिति बंधो भवतीति निर्ण
यः पृथक्त्व शब्दस्य बहुत्व वाचित्वेन प्रत्येकं संख्यात सहस्र स्थिति बंधेषु गतेष्विति व्याख्यायते ॥ छ। एइंदियद्वि
दीदो संखसहस्सेग देदु ठिदि बंधे पल्लेक्कादिवड्ढ दुगं ठिदि बंधो वीसिय तियाणं ॥ २२९। ततः परं संख्यात सहस्र
स्थिति बंधेषु गतेषु नामगोत्रयोः पल्य मात्रः त्रिघाति वेदनीयानां सार्द्ध पल्य मात्रः चारित्रमोहस्य पल्यद्वय प्रमितः
स्थिति बंधो भवति। असंज्ञ्यादिषु सर्वत्र सप्तति कोटी कोटि सागरोपम स्थिति बंधस्य मिथ्यात्वस्य यदि सहस्र सा
गरोपम स्थिति बध्नाति जीवस्तदा विंशति सागरोपम कोटी कोटि स्थिति बंधयो र्नाम गोत्रयोः कियंती स्थितिं ब-
ध्नातीति त्रैराशिकेन फल गुणितेच्छां प्रमाणेन भक्त्वा अपवर्तिते सहस्र सागरोपम द्वि सप्तम भाग प्रमितो नाम
गोत्रयोः स्थिति बंधो लभ्यते। एवं त्रिंशत्कोटी कोटि सागरोपम स्थिति बंधानां त्रिघाति सात वेदनीयानां सहस्र-
सागरोपम त्रिसप्तम भाग प्रमितश्चत्वारिंशत्कोटी कोटि सागरोपम स्थिति बंधस्य चारित्रमोहस्य सहस्र साग
रोपम चतुस्सप्तम भाग प्रमितश्च स्थिति बंधः असंज्ञि जीवे आनेतव्यः। अतः उत्तरत्रापि चतुरिंद्रियादिषु अने
नैव त्रैराशिक विधानेन तत्र तत्र स्थिति बंध प्रमाणमानेतव्यं ॥ छ॥ अथ पल्य मात्र पल्य संख्यात भाग मात्र संख्यात-
वर्षसहस्र मात्र स्थिति बंधानां त्रयाणामुत्पत्तेः प्राक् स्थिति बंधापसरण प्रमाण निर्देशार्थमिदमाह ॥ छ॥ पल्लस्स
संखभागं संखगुणूणं असंखगुणहीणं बंधोसरणो पल्लं पल्लासंखंति संखवस्संति ॥ २३०। अन्तःकोटीकोटिमा

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri



त्रस्थितिबंधात्प्रभृति पल्योत्पत्ति पर्यन्तं पल्य संख्यातैकभाग मात्रं स्थिति बंधापसरणं भवति पल्य मात्रस्थिति
बंधात्प्रभृति पल्य संख्यात भाग मात्र स्थिति बंधोत्पत्तेः प्राक् पल्य संख्यात बहु भाग मात्रं स्थिति बंधापसरणं
भवति पल्यस्थितेरनंतरं दूरापकृष्टिस्थिति पर्यंतं संख्यात गुणहीनां पल्य संख्यातैक भाग मात्रं स्थितिं ब-
ध्नातीत्यर्थः। दूरापकृष्टिस्थितेः प्रभृति संख्यात वर्ष सहस्रमात्रस्थिति बंधोत्पत्ति पर्यंतं पल्यासंख्यात बहु-
भाग मात्रं स्थिति बंधापसरणं भवति। दूरापकृष्टेरनंतरं संख्यात वर्ष सहस्रमात्रस्थिति बंधपर्यंतं असंख्या
तगुणहीनां पल्यासंख्यातैक भाग मात्रीं स्थितिं बध्नातीत्यर्थः संख्यगुणणामसंख्य गुणहीणमित्यत्र गुणशब्दस्य
बहुभाग वाचित्वात्। अथ क्रमकरण कालेस्थिति बंधानां प्रमाण मदनार्थमिद माह ॥ छ। एवं पल्लुंजादावीसी
यातीसियाय मोहाय। पल्लासंखंच कमे बंधेणय वीसिय तियाउ ॥ २३४। एव मुक्त प्रकारेण वीसिय तीसिय मो
हनीयानां पल्य जातस्थिति बंधात्परं क्रमेण संख्यात सहस्र स्थिति बंधापसरणैः क्रमकरणकालावसानेप
ल्या संख्यातैक भाग मात्रः स्थिति बंधो भवति। तद्यथा वीसिय तीसिय मोहानां पल्य द्व्यर्द्ध पल्य पल्य द्वय मात्रस्थि
ति बंधेभ्यः परं संख्यात सहस्रेषु नामगोत्रयोः पल्य संख्यात बहु भाग मात्रेषु तीसिय मोहयोः पल्य संख्यातैक-
भाग मात्रेषु च स्थिति बंधापसरणेषु गतेषु वीसियादीनां यथा संख्यं पल्य संख्यातैक भाग मात्र पल्य मात्र त्रिभा
गाधिक पल्य मात्राः स्थिति बंधाः एकस्मिन् काले जायंते। ततः परं संख्यात सहस्रेषु वीसिय तीसिययोः पल्य संख्या-
त बहु भाग मात्रेषु मोहस्य पल्य संख्यातैक भाग मात्रेषु च स्थिति बंधापसरणेषु गतेषु वीसियादीनां यथास-
ख्यं पल्य संख्यातैक भाग मात्र पल्य मात्रस्थिति बंधा जायंते वीसिय स्थिति बंधात् तीसिय स्थिति बंधः संख्येय-
गुण इति विशेषो ज्ञेयः ततः परं संख्यात सहस्रेषु त्रयाणामपि पल्य संख्यात बहु भाग मात्रेषु स्थिति बंधापस
रणेषु गतेषु नाम गोत्रयो र्दूरापकृष्टि संज्ञः चरमः पल्य संख्यातैक भाग मात्रः तीसिय मोहयोः यथायोग्य पल्य- ५७

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

संख्यातैकभागमात्रो च स्थितिबंधा जायंते तीसिय स्थितिबंधात् चालिसिय स्थितिबंधः संख्यातगुणा इत्ययं-
विशेषो द्रष्टव्यः ततः परं संख्यात सहस्रेषु वीसियस्य पल्याऽसंख्यात बहुभागमात्रेषु तीसिय मोहयोः पल्यसं-
ख्यात बहुभागमात्रेषु च स्थितिबंधापसरणेषु गतेषु नामगोत्रयोः पल्यासंख्यातैकभागमात्रः तीसियस्य दूरा-
पकृष्टि संज्ञः चरमः पल्यसंख्यातैकभागमात्रः मोहस्य च यथायोग्य पल्यसंख्यातैकभागमात्रः स्थितिबंधा जायं
ते तीसिय बंधात् चालीसिय बंधः संख्यातगुणा इत्ययं विशेषो ज्ञातव्यः। ततः परं संख्यात सहस्रेषु वीसिय तीसि
ययोः पल्यासंख्यात बहुभागमात्रेषु मोहस्य पल्यसंख्यात बहुभागमात्रेषु च स्थितिबंधापसरणेषु गतेषु वी
सिय तीसिययोः पल्यासंख्यातैकभागमात्रो मोहस्य दूरापकृष्टि संज्ञः चरमः पल्यसंख्यातैकभागमात्रश्च-
स्थितिबंधा युगपज्जायंते। वीसिय बंधात् तीसिय बंधोऽसंख्यातगुणा इति विशेषः। ततः परं संख्यात सहस्रेषु
त्रयाणामपि पल्यासंख्यात बहुभागमात्रेषु स्थितिबंधापसरणेषु गतेषु वीसियादीनां त्रयाणामपि पल्यासंख्या
तैकभागमात्राः स्थितिबंधास्संभवंति वीसिय बंधात्तीसिय बंधो संख्येयगुणाः। ततः मोहस्थितिबंधोऽसंख्यात
गुणा इत्ययं विशेषो ज्ञेयः। अथातः परं वीसियादीनां क्रमव्यत्यास प्रदर्शनार्थमिदमाह॥ छ॥ मोह पल्लासंखट्ठि-
दिबंध सहस्सगेसु तीदेसु मोहो तीसिय हेट्ठा असंखगुणहीणयं होइ॥ २३२॥ वीसियादीनां त्रयाणामपि पल्या-
संख्यातैकभागमात्रा स्थितिबंधात्परं संख्यात सहस्रेषु पल्यासंख्यात बहुभागमात्रेषु स्थितिबंधापसरणेषु गते
षु वीसिय मोह तीसियानां स्वस्व प्राक्तनानंतर स्थितिबंधेभ्यः असंख्येय गुणहीनाः पल्यसंख्यातैकभागमात्राः
स्थितिबंधा जायंते। तत्र सर्वतः स्तोकं वीसिय स्थितिबंधस्ततोऽसंख्येय गुणो मोहस्थितिबंधस्तस्माद संख्येय
गुणास्तीसिय स्थितिबंधः। इदानींतन विशुद्धि विशेषकृत स्थितिबंधापसरणमाहात्म्यात् पूर्वक्रमं परित्यज्य-
तीसिय स्थितिबंधस्याधो मोहस्थितिबंधोऽसंख्येय गुणहीनो जात इति क्रमव्यत्ययोत्र ज्ञातव्यः अथ क्रमांतरज्ञा

Gaṇesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri



पनार्थमिदमाह ॥ छ। तेत्तियमेत्ते बंधे समतीदे वीसियाण हेट्ठावि एक्कसराहो मोहो। असंख गुणहीणयं होदि। २३
ततः परं संख्यात सहस्रेषु पल्यासंख्यात बहुभागमात्रेषु स्थितिबंधापसरणेषु गतेषु मोह वीसिय तीसियानां स्थि
तिबंधाः पल्यासंख्यातेकभागमात्रा जायंते तत्र सर्वतः स्तोकं मोहस्थितिबंधः ततो संख्येय गुणो वीसियस्थिति
बंधस्ततोऽसंख्येयगुणस्तीसियस्थितिबंधः। अद्यतन विशुद्धिविशेष जनितस्थितिबंधापसरणमाहात्म्या-
द्वीसियस्थिति बंधस्याधोऽसंख्येय गुणहीनो मोहस्थिति बंधो जायत इति पूर्वक्रमादयमन्य एवक्रमो जातऽ
ति ज्ञेयं पुनरपि क्रमांतर ज्ञापनार्थमिदमाह ॥ छ। तेत्तियमेत्ते बंधे समतीदे वेयणीय हेट्ठादु तीसिय घादिति
याउ असंख गुणहीणया होंति। संख्यात सहस्रेषु पल्यासंख्यात बहुभागमात्रेषु स्थिति बंधापसरणेषु गतेषु-
मोह वीसिय तीसिय वेदनीयानां पल्यासंख्यातेकभागमात्राः स्थितिबंधा जायंते तत्र सर्वतः स्तोकं मोहस्थितिबं-
धस्ततोऽसंख्येय गुणो वीसियस्थिति बंधस्ततो संख्येय गुणो घातित्रयस्थिति बंधस्ततोऽसंख्येय गुणो वेदनी
यस्थिति बंधः अत्रापि विशुद्धिमाहात्म्यात् सातवेदनीयस्थिति बंधस्याधोऽसंख्येय गुणहीनो घातित्रयस्थिति
बंधो ज्ञातव्य इति क्रमांतरं ज्ञेयं पुनरपि क्रमभेद प्रदर्शनार्थमिदमाह ॥ छ ॥ तेत्तियमेत्ते बंधे समतीदे वीसियाण
हेट्ठादु तीसिय घादितियाउ असंख गुणहीणया होंति ॥ २४॥ ततः परं संख्यात सहस्रेषु पल्यासंख्यात बहु-
भागमात्रेषु स्थिति बंधापसरणेषु गतेषु मोह तीसिय वीसिय वेदनीयानां स्थितिबंधाः पल्यासंख्यातेकभाग-
मात्रा जायंते तत्र सर्वतः स्तोकं मोहस्थितिबंधस्ततोऽसंख्येय गुणस्तीसियास्थितिबंधस्ततोऽसंख्येय गुणो
वीसियस्थितिबंधस्ततः स्वार्द्धेनाधिको वेदनीयस्थिति बंधः वीसियास्थितीनामीदृशो स्थिति बंधे [प ५ / ७ ५] तीसि
यास्थितीनां कीदृश इति त्रैराशिक सिद्धोयं [प ३ / ७५।२] वेदनीयस्थितिबंधः अत्रापि विशुद्धि विशेषनि बंधन
स्थिति बंधापसरणवशाद्वेदनीयस्थिति बंधस्याधः संख्यातभाग हीनो वीसियस्थिति बंधो जातः त- ५८

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

स्याधोसंख्येयगुणहीनो घातित्रयस्थितिबंधो जातस्तस्याप्यधोऽसंख्येयगुणहीनो मोहस्थितिबंधोजात
इतीदृशः क्रमभेदो ज्ञातव्यः। अथ इदमेव क्रमकरणमुपसंहरन्निदमाह ॥ सू। तक्काले वेदणीयं णामागोदा
दु साहियं होइ। इदि मोहतीस वीसिय वेयणीयाणं कमो जादो ॥२३६। तस्मिन्मोह तीसिय वीसिय वेदनीया-
नां स्थिति बंधक्रमकरणकाले वेदनीयस्थिति बंधो नामगोत्रस्थितिबंधात्साधिको भवति। अतः परमनेनैव
क्रमेणांतर्मुहूर्त्तपर्यंतं संख्यात सहस्रेषु पल्यासंख्यात बहुभागमात्रेषु स्थिति बंधापसरणेषु गतेषु मोहती-
सिय वीसिय वेदनीयानां स्वस्वयोग्य पल्यासंख्यातैकभागमात्राः स्थिति बंधाः क्रमकरणावसाने जायंते। पूर्व-
सूचित संख्यात वर्षसहस्रमात्रस्थिति बंधोऽत्रावसरे न संभवति अंतरकरणात्परमेव तस्य संभवः इति क्रम
करणावसानेन प्रतिपादितः सर्वेषां कर्मणां स्थिति सत्वं संख्यात सहस्रमात्रस्थिति कांडकघात सद्भावेप्यंतः
कोटी कोटी प्रमाणमेवोपशमश्रेण्यां दीर्घस्थितिकांडकघातासंभवात्। एवमनुभाग कांडकघात गुणश्रे
णि निर्जरादि विधानमप्यस्मिन्नवसरे प्रवर्त्तत एवेति ज्ञातव्यं। अथ क्रमकरणावसाने संभवत्क्रियांतर-
प्रदर्शनार्थमाह ॥ सू। तीदे बंधसहस्से पल्लासंखेज्जयं तु ठिदिबंधो तत्थ असंखेज्जाणं उदीरणा समयब-
द्धाणं ॥२३७। मोह तीसिय वीसिय वेदनीयानां स्थिति बंधक्रम प्रारंभात्परं संख्यातसहस्रेषु स्थिति बंधाप
सरणेष्वतीतेषु यदा क्रमकरणावसाने मोहादीनां पल्यासंख्यातैकभागमात्राः स्थिति बंधाजाताः तदा सं-
ख्येय समय प्रबद्धानामुदीरणा भवति। इतः पूर्वमपकृष्ट द्रव्यस्य पल्यासंख्यात भाग खंडितस्य बहुभाग-
द्रव्यमुपरितन स्थितौ निक्षिप्य तदेकभागं पुनरसंख्यात लोकेन खंडयित्वा तद्बहुभाग द्रव्यं गुणश्रेण्यायाम
मे निक्षिप्य तदेक भागमुदयावल्यां निक्षिपतीति समय प्रबद्धासंख्यातैकभागमेवोदीरणाद्रव्यं [redacted]
[redacted] इदानीं पुनरसंख्यात लोकभागहारं त्यक्त्वा पल्यासंख्यातभागेन खंडितैक भागमुदयावल्यां निक्षिपतीत्य-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri



संख्येयसमयप्रबद्धमात्रमुदीरणाद्रव्यमित्यर्थः। अथ देशघातिकरणनिरूपणार्थं गाथाद्वयमाह॥ छ। ठिदि
बंधसहस्सगदे मणदाणा तत्तियेवि ओहिदुगं। लाभं व पुणो वि सुदं अचक्खुभोगं पुणो चक्खु॥२३८॥ पुणर-
विमदि परिभोगं पुणरवि विरियं कमेण अणुभागे बंधेण देसघादी पल्लासंखं तु ठिदिबंधो॥२३९॥ असंख्या
तसमयप्रबद्धोदीरणाप्रारंभात्परं संख्यातसहस्रेषु स्थितिबंधापसरणेषु गतेषु मनःपर्ययज्ञानावरणीयदा
नांतराययोः। सर्वघातिस्थानानुभागबंधं परित्यज्य देशघातिस्पर्द्धकरूपद्विस्थानानुभागं बध्नाति। ततः परं संख्या
तसहस्रेषु स्थितिबंधापसरणेषु गतेष्ववधिज्ञानावरणावधिदर्शनावरणलाभांतरायाणां देशघातिस्पर्द्ध
कद्विस्थानानुभागं बध्नाति। ततः परं संख्यातसहस्रेषु स्थितिबंधापसरणेषु गतेषु श्रुतज्ञानावरणाचक्षुर्द-
र्शनावरणभोगांतरायाणां देशघातिस्पर्द्धकद्विस्थानानुभागं बध्नाति ततः परं संख्यातसहस्रेषु स्थितिबं-
धापसरणेषु गतेषु चक्षुर्दर्शनावरणस्य देशघातिस्पर्द्धकद्विस्थानानुभागं बध्नाति। ततः परं संख्यातसहस्रे
षु स्थितिबंधापसरणेषु गतेषु मतिज्ञानावरणोपभोगांतराययोर्देशघातिस्पर्द्धकद्विस्थानानुभागं बध्नाति
ततः परं संख्यातसहस्रेषु स्थितिबंधापसरणेषु गतेषु वीर्यांतरायस्य देशघातिस्पर्द्धकद्विस्थानानुभागंब-
ध्नाति। अस्माद्देशघातिकरणप्रारंभात्प्रागवस्थायां संसारावस्थायां च सर्वघातिस्पर्द्धकानुभागमेव बध्नातीत्य
र्थः। चतुःसंज्वलनपुंवेदानां देशघातिस्पर्द्धकानुभागबंधः कुतो न कथित नाशंकितव्यं। संयमासंयमग्रहणा
त्प्रभृति तेषां देशघातिस्पर्द्धकद्विस्थानानुभागबंधस्यैव प्रतिसमयमनंतगुणहान्या वर्त्तमानत्वात् सक
र्मानुभागः पुनः सर्वघातिस्पर्द्धकाद्विस्थानरूप एव प्रवर्त्तते। तस्य देशघातिकरणाभावात्। एवं देशघातिकरण
पर्यवसानेपि मोहतीसियवीसियवेदनीयानां स्थितिबंधः स्वस्वयोग्यपल्यासंख्यातभागमात्रो भवति॥ छ। अ-
यांतरकरणनिरूपणार्थं गाथाचतुष्टयमाह॥ तो देसघादिकरणादुवरिं तु गदेसु तत्तियपदेसु इगिवीसमो



Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

हणीयाणांतर करणं करेदीदि ॥२४०॥ ततो देशघातिकरणस्योपरि संख्यात सहस्रेषु स्थितिबंधापसरणे-
षु गतेष्वनंतानुबंधि वर्जित द्वादशकषायाणां नवनोकषायाणां च चारित्रमोह प्रकृतीनां मिलित्वैकविंशतेरं-
तरकरणं करोत्यनिवृत्तिकरणगुणस्थानवर्त्युपशामकः ॥ छ ॥ संजलणाणं एक्कं वेदाणेक्कं उदेदि तं दोण्हं
सेसाणं पढमठिदिं ठवेदि अंतोमुहुत्तमावलियं ॥ २४१ ॥ संज्वलनक्रोधमानमायालोभानां मध्ये एकतमः कषा-
यः स्त्रीपुंनपुंसकवेदानां चैकतमो वेद उदेति । एकतमकषायवेदोदयेन श्रेणीमारोहति संयत इत्यर्थः ततस्त-
योरुदयमानयोः कषायवेदयोः प्रथमस्थितिमंतर्मुहूर्त्तमात्रीं शेषाणामुदयरहितानां कषायवेदानां प्रथमस्थि-
तिमावलिमात्रीं स्थापयत्यंतरकरणप्रारंभकः । तावन्मात्रनिषेकान्मुक्त्वा तदुपरितननिषेकाणामंतरं करोती-
त्यर्थः ॥ छ ॥ उवरिं समं उक्कीरइ हेट्ठा विसमं तु मज्झिमपमाणं । तद्दुगपढमठिदीदो संखेज्जगुणं हवे णियमा ॥
॥२४२॥ अंतरायामस्याग्रनिषेका उदयानुदय प्रकृतीनां सर्वासामपि सदृशा एवोत्कीर्यंते । अंतरोपरितनद्वि-
तीयस्थिति प्रथमनिषेकाणां सदृशत्वात् । अंतरायामाधस्तनचरमनिषेका उदयरहितप्रकृतीनामन्योन्यंस-
दृशा एव उदयवत्प्रकृत्योश्च परस्परं सदृशा एव उदयमानानुदयप्रकृत्योस्तु विसदृशाः । अंतर्मुहूर्त्तावलिमा-
त्र प्रथमस्थिति वैषम्यवशात् । एवंविधांतरायामप्रमाणं च ताभ्यां द्वाभ्यामंतर्मुहूर्त्तावलिमात्रीभ्यां । प्रथमस्थिति-
भ्यां संख्यातगुणितमेव भवति । उदयमानप्रकृत्योर्गुणश्रेणिशीर्षनिषेकान् ततः संख्येयगुणोपरितनस्थिति-
निषेकांश्चांतर्मुहूर्त्तमात्रान् गृहीत्वांतरं करोतीत्यर्थः ॥ छ ॥ अंतरपढमे अण्णो ठिदिबंधो ठिदिरसाण खंडोय-
एयट्ठिदि खंडुक्कीरणकाले अंतरसमत्ती ॥ २४३ ॥ अंतरकरणप्रथमसमये अन्य एव स्थितिबंधः । प्राक्तन-
स्थितिबंधादसंख्यातगुणहीनः स्थितिखंडं चान्यदेव प्राक्तनस्थितिखंडाद्विशेषहीनं अन्यदेवानुभागखंडं-
च प्राक्तनानुभागखंडादनंतगुणहीनं प्रारभ्यंते । एवंविधैकस्थितिखंडोत्करणकालसमे नांतर्मुहूर्त्तेनांतरस-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri



मासिर्भवति तत्समाप्तौ च प्रकृत समस्थितिबंधः। स्थिति खंडोत्करणां संख्यात सहस्रानुभाग खंडोत्करणानि
च युगपत्समाप्यंते इत्यर्थः। अथांतरोत्कीर्ण द्रव्य निक्षेप निरूपणार्थं गाथात्रयमाह ॥ छ ॥ अंतरहेदुक्कीरिदद-
व्वं तं अंतरम्हि णयदेदि बंधंताणां तरजं बंधाणां विदियगे देदि ॥ २५७ ॥ अंतर निमित्त मंतरायामे उत्कीर्ण द्रव्य
मंतरायामस्थितिषु नैव निक्षिपति पुनः केवल बध्यमान प्रकृतीनां स्त्रीनपुंसकवेदयोरन्यतरोदयेन संज्वलन-
कषायाणामन्यतमोदयेन च श्रेणिमारूढस्य पुंवेद शेषत्रि संज्वलनानामंतरायामे उत्कीर्ण द्रव्यं तात्कालिके स्व-
बंधे आबाधां मुक्त्वा द्वितीयस्थिति प्रथम निषेकादारभ्य चरम पर्यंतं यथायोग्य मुत्कर्षण वशेन निक्षिपति उ-
दयमाने तर कषाययोः प्रथमस्थितौ चापकर्षण वशेन निक्षिपतीत्ययं विशेषः सिद्धांतानुसारेण ज्ञातव्यः। उद-
यिल्लाणां तरजं सगपढमे देदि बंध विदियेच उभयाणां तरदव्वं पढमे विदियेच संछुहदि ॥ २५८ ॥ केवल मुद-
यमानयोः स्त्रीनपुंसकवेदयोरंतरायामे उत्कीर्ण द्रव्यं स्वस्व प्रथमस्थिता वपकृष्य निक्षिपति। बध्यमानेतरक-
षायाणां द्वितीयस्थितौ चोत्कृष्य निक्षिपति। तत उदयमान कषायस्य प्रथमस्थितौ चापकृष्य संक्रमयतीत्ययं वि-
शेषोपि राद्धांतोक्तः संप्रधार्य पुनर्बंधोदयवतोः पुंवेदान्यतम कषाययोरंतरायामे उत्कीर्ण द्रव्यमपकृष्योदयमा-
न प्रकृति प्रथमस्थितौ निक्षिपति बध्यमान प्रकृति द्वितीयास्थितौ चोत्कृष्य निक्षिपति। अत्रापि पर प्रकृति प्रथ-
म द्वितीययोः स्थित्योरपकर्षणोत्कर्षण वशेन संक्रमयतीत्ययमपि विशेषः कृतांत सिद्धो बोद्धव्यः। अणुभयगा-
णां तरजं बंधंताणं च विदियगे देदि एवं अंतरकरणं सिज्जादि अंतो मुहुत्तेण ॥ २५९ ॥ बंधोदय रहितानां मध्य-
माष्टकषाय हास्यादि षण्णोकषायाणामंतरायामे उत्कीर्ण द्रव्यं तात्कालिकोदयमान प्रकृति प्रथमस्थितौ चापकृष्य
संक्रमयति बध्यमान प्रकृति द्वितीयास्थितौ चोत्कृष्य संक्रमयति सर्वत्र बंध रहितानामंतर द्रव्यं स्वद्वितीयस्थितौ
न निक्षिपति। उदय रहितानामंतर द्रव्यं स्व प्रथमस्थितौ न निक्षिपतीति विशेषो निर्णेतव्यः। एवमंतर्मुहूर्तका-



Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

लेनांतरकरणं सिद्ध्यति। अत्रांतरकरणप्रारंभसमयादारभ्य प्रथमस्थित्यंतरायामावस्थित प्रमाणोद्र
ष्टयौ उदयावल्याः एकस्मिन् समये गलिते गुणश्रेणी समयस्यैकस्योदयावल्यां प्रवेशात्। तदैव चाद्वितीय
स्थिति निषेकस्यैकस्यांतरायामे प्रवेशात्। एवं द्वितीयास्थितिरेव हीयते प्रथमास्थित्यंतरायामौ तदवस्था
वेवेति निश्चेतव्यं अथांतरकरण निष्पत्यनंतर समये संभवत्क्रिया विशेष प्रदर्शनार्थं गाथा द्वयमाह॥छ॥
सत्तकरणाणियंतरकद पढमे होंति मोहणीयस्स। इगिट्ठाणिय बंधुदउठिदिबंधे संखवस्सं च॥२५०॥ अणु
पुव्वी संकमणं लोहस्स असंकमं च संढस्स। पढमोपसाम करणं छावलितिदे सुदीरणादा॥२५१॥ अंतरकृ-
तस्य निष्ठितांतरकरणस्य प्रथमे अनंतर समये सप्त करणानि युगपदेव प्रारभ्यंते। तत्र पूर्वमंतर समा-
प्तिपर्यंतं चारित्रमोहस्य द्विस्थानानुभाग बंधः प्रवृत्तः। इदानीं लता समानैकस्थानानुभाग बंधस्तस्य प्रवर्त्त
ते इत्येकं करणं॥१॥ तथा मोहनीयस्य द्विस्थानानुभागोदयः पूर्वमंतरकरण चरमसमय पर्यंतमायातः इ
दानीं पुनस्तस्य लता समानैकस्थानानुभागोदय एव प्रवर्त्तत इत्यपरं करणं॥२॥ तथा पूर्वमंतर करणकाल
समाप्तिपर्यंत संख्येय वर्षमात्रो मोहस्य स्थिति बंधः प्रवृत्तः इदानीं पुनरपसरण माहात्म्यात्। संख्येय वर्षमा
त्रस्तस्य स्थिति बंधः प्रारब्ध इत्यन्यत्करणं॥३॥ तथा पूर्वमंतर करणकालपरिसमाप्तिपर्यंतं चारित्रमोहस्य
नपुंसकवेदादि प्रकृतीनां यत्र तत्रापि द्रव्य संक्रमः प्रवृत्तः इदानीं पुनर्वक्ष्यमाणा या प्रतिनियतानुपूर्व्या तद्द्रव्यं
संक्रामति। तद्यथा। स्त्री नपुंसकवेद प्रकृत्योर्द्रव्यं नियमेन पुंवेदे एव संक्रामति पुंवेद हास्यादि षण्णोकषाया-
प्रत्याख्यान क्रोधद्वय द्रव्यं नियमेन संज्वलनक्रोधे एव संक्रामति संज्वलनक्रोधा प्रत्याख्यान प्रत्याख्यान मान-
द्वय द्रव्यं नियमेन संज्वलन माने एव संक्रामति संज्वलनमाना प्रत्याख्यान प्रत्याख्यान मायाद्वय द्रव्यं नियमे
न संज्वलन मायाद्रव्ये एव संक्रामति। संज्वलन माया प्रत्याख्यान प्रत्याख्यान लोभ द्रव्यं संज्वलन लोभे एव निय

द्वय २

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

क्षपणासार मतः संक्रामतीत्यानुपूर्वीसंक्रमोनामैकं करणं ।४। तथापूर्वमंतरकरणसमाप्तिपर्यंतं संज्वलनलोभ [redacted]
५२ स्यशेषसंज्वलनपुंवेदेषु यथासंभवं संक्रमः प्रवृत्तः। इदानीं पुनः संज्वलनलोभस्य कुत्रापिसंक्रमो नास्त्येवेत्य
परं करणं ॥५॥ तथा इदानीं प्रथमं नपुंसकवेदस्यैवोपशमनक्रिया प्रारभ्यते। तदुपशमनानंतरमेवेतरप्रकृ
तीनामुपशमनविधानात् इत्येतदेकं करणं ॥६। तथापूर्वमंतरकरणसमाप्तिपर्यंतं प्रतिसमयबध्यमान-
समयप्रबद्धो ऽचलावल्यतिक्रमे उदीरयितुं शक्यः प्रवृत्तः। इदानीं पुनर्बध्यमानानां मोहस्य वा ज्ञानावरणा
प्रथम दिकर्मणां वा समयप्रबद्धो बंधसमयादारभ्य षट्स्वावलीषु गतास्वेवोदीरयितुं शक्यो नैकसमयो नास्त्यपीत्य
न्यत्करणं ॥७॥ अधुनातननूतनबंधस्य तथाविधस्वभावसंभवात्। अथ चारित्रमोहोपशमनप्रक्रमप्रद-
र्शनार्थमिदमाह। अंतरपढमादु कमे एक्केक्कं सत्तवदुसु तियपयडिं समभुवसामदि णवकं समऊणावलि
दुगं वज्जं ॥२५२॥ अंतरकरणसमाप्त्यनंतरसमयादारभ्य क्रमेणांतर्मुहूर्ते नांतर्मुहूर्तेन कालेन एकामेकां-
सप्तचतुर्ष्वंतर्मुहूर्तेषु त्रयींत्रयीं प्रकृतिं समयोनद्व्यावलिमात्रनवकबंधसमयप्रबद्धान्वर्जयित्वाऽयमनि-
वृत्तिकरणविशुद्धसंयत उपशमयति। कषायत्रयं चापरेणांतर्मुहूर्तेन युगपदुपशमयतीति विशेषो ग्राह्यः
तापवोपशम्यमानाः प्रकृतिरुद्दिशति ॥छ॥ एयणउंसयवेदं इत्थीवेदं तहेव एयं च सत्तेव णोकसाया कोहादि
तयं तु पयडीउ ॥२५३॥ एकोनपुंसकवेदस्तथैवैकस्त्रीवेदः सप्तनोकषायाः हास्यादयः षट् पुंवेदश्चेति क्रोधत्रयं
मानत्रयं मायात्रयं लोभत्रयं चेत्युपशम्यमानाः प्रकृतयः क्रमेण ज्ञातव्याः अथ प्रथमोद्दिष्टस्य नपुंसकवेदस्यो
पशमनविधानं। प्रदर्शयितुमिदमाह ॥छ। अंतरकद पढमादो पडिसमयमसंखगुणविहाणकमेणुवसामे
दि हु संढं उवसंतं जाणण च अण्णं ॥२५४॥ अंतरनिष्पन्नसमयात्प्रभृति प्रतिसमयमसंख्यातगुणितक्रमे-
ण नपुंसकवेदद्रव्यं गुणसंक्रमभागहारासंख्यातभागेन खंडयित्वा एकं खंडमुपशमयति। यावन्नपुंसकवे- ५२

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

दोपशमनसमाप्तिर्भवति। तावदंतर्मुहूर्त्तकालपर्यंतं कामप्यन्यां प्रकृतिं नोपशमयति कर्मणः प्रकृतिस्थित्यनुभागप्रदेशानामुदीरणाप्रतेरप्युदयायोग्यतया सदवस्थाकरणमुपशमनं सर्वत्र ज्ञेयं। तत्र नपुंसकवेदस्य प्रथमसमये उपशामन फालिद्रव्यमिदं स ७१२२।४२ ७।२०।४८।गु द्वितीयसमये ततो संख्येयगुणमुपशामन फालिद्रव्यमिदं स ७१२२।४२ ७।२०।४८।गु ७ तृतीयसमये ततो संख्येयगुणमुपशामन फालिद्रव्यमिदं। स ७१२२।४२ ७।२०।४८।गु ७।७ एवमंतर्मुहूर्त्तमात्रोपशामनकालचरमसमयपर्यंतमसंख्यातगुणितक्रमेण नपुंसकवेदमुपशमयतीत्यर्थः। अथोदीरणादिद्रव्याल्पबहुत्वप्रदर्शनार्थमिदमाह॥ छ। संढादिमउवसमगेदूसस उदीरणायउदउय संढादो संकमिदं उवसमियमसंखगुणियकमा॥२५५। नपुंसकवेदोपशामकस्य प्रथमसमये विवक्षितस्योदयप्राप्तस्य पुंवेदस्योदीरणाद्रव्यमिदं स ७१२२।२ ७।२०।४८।उपप ७७७ तत्कालापकृष्टस्य पल्यासंख्यातभागेन भक्तस्य बहुभागमुपरितनस्थितौ दत्वा तदेकभागं पुनः पल्यासंख्यातभागेन खंडयित्वा बहुभागं गुणश्रेण्यां निक्षिप्य तदेकभागस्यैवोदये निक्षेपणात्। तस्मादुदीरणाद्रव्यात्तदात्वे पुंवेदस्यैवोदयमानं द्रव्यमसंख्यातगुणं स ७१२२।२।२ ७।२०।४८।उपप४ ७७ गुणश्रेण्यां प्राग्निक्षिप्तपल्यासंख्यातबहुभागमात्रत्वात्। तस्मादुदयद्रव्यान्नपुंसकवेदस्य संक्रमणद्रव्यमसंख्यातगुणं। स ७१२२।४२ ७।२०।४८।गु तद्भागहाराद् संख्यातगुणहीनेन गुणसंक्रमणभागहारेण खंडितैकभागमात्रत्वात्। तदात्वे नपुंसकवेदस्योपशामन फालिद्रव्यमसंख्यातगुणं स ७१२२।४२ ७।२०।४८।गु ७ तद्भागहाराद संख्यातगुणहीनेन भागहारेण खंडितैकभागमात्रत्वात्। एवं द्वितीयादिसमयेषु चरमसमयपर्यंतेषूदीरणाद्रव्यचतुष्टयाल्पबहुत्वं नेतव्यं। अस्मिन्नवसरे स्थितिखंडादिसंभवासंभवप्रदर्शनार्थं गाथाद्वयमाह। अंतरकरणादुवरिं ठिदिरसखंडाण मोहणीयस्स। ठिदिबंधोसरणं पुण संखेज्जगुणेण हीणकमं॥२५६। अंतरकरणास्या

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri



नपुंसकवेदोपशमन प्रथमसमयादारभ्य मोहनीयस्य स्थितिखंडनं अनुभाग खंडनं च नास्ति उपशाम्यमान कर्मस्थितेः कांडकघातो नास्तीति परमगुरूपदेशात्। तर्ह्यनुपशाम्यमानमोह प्रकृतीनां स्थितिकांडकघातो भवेदिति नाशंकितव्यं। उपशमन काले मोह प्रकृतीनां सर्वासामपि स्थितिः सदृशी चेति च परमागमसंप्रदायस्य परमगुरुपर्वक्रमायातस्य सद्भावात्। स्थित्यनुसारित्वादनुभागस्यापि खंडनं विना तादवस्थ्यं सिद्धमेव। मोहनीयस्यास्थितिबंधापसरणं पुनः संख्यातगुणहीनक्रमेण वर्त्तते। अंतरकरण समाप्त्यनंतरं संख्यात सहस्र वर्षमात्र स्थितिबंध संभवात्। तदनुसारेण स्थिति बंधापसरणस्य तत्संख्यात बहुभागमात्रस्य स्थितिबंधं प्रति संख्यात गुणहीनत्वोपपत्तेः ॥ छ ॥ जत्तोपाये होदि हु ठिदिबंधो संखवस्समेत्तं तु तत्तो संखगुणूणं बंधोसरणं तु पयडीणं ॥ २५७ ॥ यतः कारणात्संख्यात सहस्र वर्षमात्र स्थितिबंधः प्रायेण भवति ततः कारणात्संख्यातगुणोनं स्थितिबंधापसरणं बध्यमान प्रकृतीनां भवतीति सूत्रोक्तत्वात् ॥ ~~

| | | | |
|---|---|---|---|
| स्थितिबंधः<br>अपसरण<br>प्रमाणं | व १०००० १<br>व १०००० २४<br>५ | व १०००० २<br>५<br>व १०००० २४<br>५५ | व १०००० १<br>५५<br>व १०००० २४<br>५५५ |

मोहनीयवर्जानां ज्ञानावरणादि शेषकर्मणां स्थितिबंधः। अंतरकरण चरमसमय स्थितिबंधाद संख्यात गुणहीनः पल्यासंख्यात बहुभाग मात्रस्याऽपसरणात्। तत्र तीसियानां स्थितिबंधः पल्यासंख्यातैक भागमात्रोपि सर्वतः स्तोकः [प / ७] अस्माद संख्येय गुणो वीसियानां स्थितिबंधः [प / ७] अस्मात् अस्यार्द्धेनाधिको वेदनीयस्य स्थितिबंधः ~~ [प ३ / ७ २] अयोपरि भविष्यत् स्थितिबंधापसरण प्रमाणावधारणार्थमाह ॥ छ ॥ वस्साणं बत्तीसादुवरिं अंतो मुहुत्तपरिमाणं ठिदिबंधाणोसरणं अवरट्ठिदि बंधणं जाव ॥ २५८ ॥ द्वात्रिंशद्वर्षमात्र स्थितिबंधस्योपरि अंतर्मुहूर्त्त परिमाणं स्थितिबंधापसरणं सर्वजघन्य स्थिति बंध पर्यंतं भवतीति ज्ञातव्यं। अथ- ५२

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

स्थितिबंधापसरणविषयनिर्देशार्थमिदमाह ॥ छ ॥ ठिदिबंधाणोसरणं एयं समयप्पबद्धमहिकिच्चा उत्तं-
णाणाणादो पुणणा च उत्तं अणुववत्तीदो ॥ २५५ ॥ विवक्षितापसरणेनापसृत्य विवक्षितस्थितिबंध प्रथमस-
मये बध्यमानमेकंसमयप्रबद्धमधिकृत्य विवक्षितं स्थितिबंधापसरणमुक्तं । न पुनरंतर्मुहूर्त्तकाले द्विती-
यादिसमयेषु बध्यमानसमयप्रबद्धानां प्रत्येकं स्थितिबंधापसरणमंतर्मुहूर्त्तकालपर्यंतं समस्थितिबंधा-
भ्युपगमेन नानासमयप्रबद्धानधिकृत्य स्थितिबंधापसरणानुपपत्तेः अनेनांतर्मुहूर्त्तकालपर्यंतमेकेनैवास्थि-
तिबंधापसरणेन प्राक्तनस्थितिबंधादपसृत्य समास्थितीनेव समयप्रबद्धान् । बध्नातीत्ययमर्थो ज्ञाप्यते अथ
नपुंसकवेदोपशमनानंतरकालभाविक्रियांतरप्रदर्शनार्थमिदमाह ॥ छ ॥ एवं संखेज्जसु ठिदिबंधसहस्स
गेसु तीदेसु संढुवसमिदे तत्तो इत्थिं च तहेव उवसमदि ॥ २५६ ॥ एवं पूर्वोक्तप्रकारेण संख्यातसहस्रेषु स्थि-
तिबंधेषु गतेषु अंतर्मुहूर्त्तकालेन नपुंसकवेदे उपशमिते ततः परं स्त्रीवेदमपि नपुंसकवेदोपशमनप्रका-
रेणैवांतर्मुहूर्त्तकालेनोपशमयति । अत्र स्त्रीवेदद्रव्यं संस्थाप्य ततः संक्रमफालिद्रव्यमुपशमनफालिद्रव्यं
च गृहीत्वा उदयमानप्रकृतेरुदीरणाद्रव्यमुदयद्रव्यं च संस्थाप्य पूर्ववदल्पबहुत्वं वक्तव्यं प्रतिसमयमसंख्या-
तगुणितक्रमश्च ज्ञातव्य इत्यर्थः मोहवर्जितानां ज्ञानावरणादिकर्मणां स्थित्यनुभागखंडनं नपुंसकवेदोपश-
मनकालचरमसमयस्थित्यनुभागखंडनादन्यदेव स्त्रीवेदोपशमनकालप्रथमसमये प्रारभ्यते स्थितिबं-
धस्त्वायुर्वर्जितसर्वकर्मणां प्राक्तनस्थितिबंधादन्य एव प्रारभ्यते । अथ स्त्रीवेदोपशमनकाले कार्यविशेष-
प्रतिपादनार्थमिदमाह ॥ छ ॥ थीयद्धासंखेज्जादिभागेपगदेतिघादिठिदिबंधो संखस्सुदंरसबंधो विकेवला-
णगवाठंतु ॥ २५८ ॥ स्त्रीवेदोपशमनकालस्य संख्यातैकभागे गते सति मोहनीयस्य स्थितिबंधः सर्वतः स्तोकः
संख्यातसहस्रवर्षमात्रः ततः संख्येयगुणः संख्यातसहस्रवर्षमात्रो घातित्रयस्थितिबंधः । ततो संख्येयगुणः

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri



पल्यासंख्यातैकभागमात्रानामगोत्रास्थितिबंधस्ततः साधिकः सातवेदनीयस्थितिबंधः। तदेव केवलज्ञान-
दर्शनावरणद्वयरहितस्य घातित्रयस्य लतासमानैकस्थानानुभागबंधश्च भवति एवं संख्यातसहस्रेषु-
स्थितिबंधेषु गतेषु अंतरमुहूर्त्तकालेन स्त्रीवेदोऽप्युपशमितो भवति स्त्रीवेदोपशमनानंतर कालभाविक्रिया
विशेषप्ररूपणार्थमिदमाह ॥ छ ॥ त्थी उवसमिदाणंतर समयादो सत्तणोकसायाणं। उवसमगो तस्सद्धासं
खेज्जादिमे गदे तत्तो ॥ २६२। स्त्रीवेदोपशमनानंतर समयादारभ्य पुंवेद षण्णोकषाय। प्रकृतीरुपशमयति
तदुपशामनकालस्यांतर्मुहूर्त्तस्य संख्यातैकभागे ततः परं संभविकार्यविशेष प्रतिपादनार्थमिदमाह ॥ छ।
णामदुगवेयणीयट्ठिदिबंधो संखवस्सयं होदि एवं सत्तकसाया उवसंता सेसभागंते ॥ २६३। सप्तनोकषायो
पशामनकाल संख्यातबहुभागावशेषावसरे सर्वतः स्तोकं संख्यातसहस्रवर्षमात्रो मोहास्थितिबंधः। ततः-
संख्येयगुणः संख्यातसहस्रवर्षमात्रो घातित्रयास्थितिबंधः। ततः संख्यातगुणः संख्यातसहस्रवर्षमात्रो वीसि-
यास्थितिबंधः ततः साधिकः संख्यातसहस्रवर्षमात्रो वेदनीयास्थितिबंधश्च भवति। एवं नपुंसकवेदोपशाम-
नप्रकारेणैव सप्तनोकषायाः संख्यातसहस्रास्थितिबंधेषु गतेषु अवशेषबहुभागचरमसमये उपशमिता-
भवंति ॥ छ। अत्रसंभवद्विशेषप्रदर्शनार्थमिदमाह ॥ छ। णवरिय पुंवेदस्सय णवकं समऊणदोण्णि आव
लियं मुच्चा सेसं सव्वं उवसंतं होदि तच्चरिमे ॥ २६४। पुंवेदनवकबंधस्य समयोनद्व्यावलिमात्रसमयप्रब-
द्धान्वर्जयित्वा शेषं पुंवेदद्रव्यं सर्वमपि तदुपशामनकालचरमसमये उपशमितं भवतीत्ययं विशेषो द्रष्टव्यः
पुंवेदसत्वद्रव्योपशामनकालचरमसमये समयोनद्व्यावलिमात्रनवकबंधसमयप्रबद्धानामुपशामनवर्जित-
मवस्थानं कथमिति चेदुच्यते। तद्यथा। पुंवेदोपशामनकालाभ्यंतरे आवलिद्वयेऽवशिष्टे द्विचरमावलि प्रथम
समये बद्धस्य समयप्रबद्धस्य बंधप्रथमसमयादारभ्य बंधावलिचरमसमयपर्यंतमुपशामनं नास्ति। सर्व ५३

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

त्र नवकबंधस्याऽवलाचलि व्यतिक्रमे सत्येवोपशमनापकर्षणादि क्रियासंभवो न बंधावल्यामिति परमागम
सम्प्रदायाद्बंधावल्यां व्यतिक्रांतायां तदनंतरचरमोपशमनावल्यां। प्रथमसमयादारभ्य समयं प्रत्येकैकफा-
ल्युपशमनविधानेन उपशमनावलि चरमसमये चरमफालिद्रव्यं सर्वसंक्रमेणोपशामितं द्विचरमावलि-
द्वितीयसमये बद्धसमयप्रबद्धस्योपशमनकालचरमावलि प्रथमसमयपर्यंतमुपशमनं नास्ति ततः परं
समयं। प्रत्येकैकफालिद्रव्योपशमनविधानेन उपशमनावलि चरमसमये चरमफालिद्रव्यं वर्जयित्वा शेषं-
सर्वमुपशामितं। पुनर्द्विचरमावलि तृतीयसमये बद्धसमय। प्रबद्धस्योपशमनचरमावलि द्वितीयसमयपर्यं-
तमुपशमनं नास्ति। ततः परं समयं प्रत्येकैकफाल्युपशमनविधानेन चरमफालिद्वि चरमफालिद्वयं वर्जयि-
त्वाशेषं सर्वमुपशामितं। एवमनेन क्रमेण गत्वा द्विचरमावलि चरमसमये बद्धसमयप्रबद्धस्योपशमनचर-
मावलि द्विचरमसमयपर्यंतमुपशमनं नास्ति। ततः परं चरमसमये एकफालिद्रव्यमुपशामितं। अवशिष्टसर्व-
द्रव्यमनुपशामितमास्ते। तत उपशमनकालचरमावल्यां बद्धसमयप्रबद्धानामावलिमात्राणामुपशमनचरमा-
वलि चरमसमये किंचिदपि द्रव्यं नोपशामितं तेषामद्यापि बंधावलिव्यतिक्रमाभावात्। पुनरुपरितनोच्छिष्टावल्यां
पुंवेदस्य बंध एव नास्ति उदयोऽपि नास्ति। एवं पुंवेदोपशमनकालचरमसमये द्विचरमावलि द्वितीयादिसम-
य बद्धसमयप्रबद्धाः समयोनावलिमात्राश्चरमावलि बद्धसमयप्रबद्धाः सम्पूर्णावलिमात्रावस्ते सर्वेऽपि मिलि-
त्वा समयोनद्व्यावलिमात्राः समयप्रबद्धाः अनुपशामिता अवतिष्ठंते द्विचरमावलि। प्रथमसमयबद्धसमयप्र-
बद्धस्य पुंवेदोपशमनकालचरमावलि चरमसमये सर्वात्मनोपशामितत्वाद्द्वितीयादिसमयबद्धसमयप्रबद्धानां
किंचिन्न्यूनत्वेऽपि एकदेशाविकृतमनन्यवद्भवतीति न्यायेन सर्वेऽपि पुंवेदनवकबंधसमयप्रबद्धाः समयोनद्व्याव-
लिमात्राः पुंवेदोपशमनकालचरमसमये उपशमनवर्जिताः संतीति श्रीमन्माधवचंद्रत्रैविद्यदेवानां तात्पर्य-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

व्याख्यानं। अथ पुंवेदोपशमनकालचरमसमये स्थितिबंधप्रमाणप्ररूपणार्थमिदमा-
ह।छ।तच्चरिमे पुंबंधो सोलसवस्साणि संजलणगाणं। तद्दुगुणं सेसाणं संखेज्जसहस्स
वस्साणि- २६५। तस्य पुंवेदोपशमनकालस्य सवेदानिवृत्तिकरणस्य चरमसमये षोडश-
वर्षमात्रः पुंवेदस्य स्थितिबंधः संज्वलनचतुष्टयस्य स्थितिबंधो द्वात्रिंशद्वर्षप्रमितः घाति-
त्रयस्य सं- ख्यातसहस्रवर्षमात्रः स्थितिबंधः। ततः संख्येयगुणो नामगोत्रयोः संख्यातस-
हस्रवर्षमा त्रः स्थितिबंधः। ततः साधिको वेदनीयस्य संख्यातसहस्रवर्षमात्रः स्थितिबंधः
अथ पुंवेद स्य प्रथमस्थितौ आवलिद्वयावशेषायां संभवत्क्रियांतरप्रतिपादनार्थमिदमा
ह।छ।पुरि सस्सय पढमठिदी आवलिदोसु वरिदासु आगालपडिआगालाछिण्णपडि-
आवलिया दुदीरणादा॥२६७। पुंवेदस्य प्रथमस्थितिः क्रमेण गलित्वा यदा द्व्यावलिमात्राव-

उच्छिष्टावलि ० १
५ ० १ २ २
० १ २ ३
० १ २ ३ ४
० १ २ ३ ४ ४
० १ २ ३ ४ ४ ५

उप- ० १ २ २ ३ ४ ४ ५ ५ ५
शम- १ २ ३ ४ ४ ५ ५ ५
नाव- २ ३ ४ ४ ५ ५
लि ३ ५ ५ ५ ५ ५

बंधा- ५ ५ ५ ५ ५
वलि- ५ ५ ५
५- ५ ५
५

शेषाभवति। तदा आगालप्रत्यागालौ व्युच्छिन्नौ आवलिद्वयावशेष। प्रथमसमयात्प्रभृति गुणश्रेणिनिर्जरापि व्यु-
च्छिन्ना। किंतु तदेवोदयावलिबाह्योपरितनावलिद्रव्यस्योदयावल्यामुदीरणापि पूर्वोक्तलक्षणा प्रारब्धा। अंतर-
करणसमाप्त्यनंतरसमयादारभ्य संक्रमविशेषप्ररूपणार्थमिदमाह॥छ।अंतरकदादु छण्णोकसायदव्वं-
णपुरिसगे देदिदे दिहु संजलणस्सय कोधे अणुपुव्विसंकमणादो॥२६८। अंतरकृतादंतरकरणसमाप्तिस-
मयात्परं हास्यादिषण्णोकषायद्रव्यं पुंवेदेन संक्रामत्येव अपि तु संज्वलनक्रोधे एव संक्रामति पूर्वोद्दिष्टानुपूर्वी-
संक्रमानतिक्रमात्। अथ पुंवेदेन नवकबंधद्रव्यस्योपशमनविधानप्ररूपणार्थमिदमाह।छ। पुरिसस्सउत्तण-
वकं असंखगुणियक्कमेण उवसमदि संकमदि हु हीणकमेणाधापवत्तेणाहारेण॥२६९। पुंवेदस्य प्रागुक्तनवक-
बंधद्रव्यं समयोनद्व्यावलिमात्रसमयप्रबद्धप्रमितं | स ७ । ४ । १२
७ १२ | पुंवेदनाऽनिवृत्तिचरमसमये अनुपशमितं- ५४

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सदवतिष्ठते। पुनरपगतवेद प्रथमसमये पुंवेदोपशामनकालद्विचरमावलि द्वितीयसमय बद्धसमय प्रबद्ध
स्य सर्वात्मनोपशामितत्वात् द्विसमयोनद्व्यावलिमात्रसमयप्रबद्धरूपं पुंवेदनवकबंधसत्त्वमनुपशामितमास्ते
तस्मिन्नपगतवेदप्रथमसमये व्यतिक्रांतबंधावलिकसमयप्रबद्धस्य यावदुपशामितं द्रव्यं [स ७ / ७।२गु] तदनंतरद्वि-
तीयसमये ततोसंख्येयगुणं द्रव्यमुपशामयति [स ७ / ७।२गु / ७] एवं चरमफालिपर्यंतमसंख्यातगु णितक्रमेणो
पशामनद्रव्यं ज्ञातव्यं एवमितरेषामपि समय प्रबद्धानां स्वस्वबंधावलिव्यतिक्रांतसमयादारभ्य प्रति
समयमसंख्यातगुणितक्रमेणोपशामनफालिद्रव्यं नेतव्यं एवमपगतवेदप्रथमसमयादारभ्य समयोनद्व्या
वलिमात्रकाले सर्वं पुंवेदनवकबंधद्रव्यमुपशमितं भवतीति ज्ञातव्यं। एकोनवकबंधसमयप्रबद्ध एकावलि-
मात्रकाले उपशामितो भवति। अत एवावलिसमयमात्राण्येकसमयप्रबद्धफालिद्रव्याणि कृतानि तान्यंकसं
दृष्ट्या एतावंति।४। तथा पुंवेदनवकबंधस्यैकसमयप्रबद्धद्रव्यं [स ७ / ७।२] अपगतवेदप्रथमसमये अधाप्रवृत्त
भागहारेण खंडयित्वा तदेकभागद्रव्यं संज्वलनक्रोधद्रव्ये संक्रम यति [स ७ / ७।२।अ] अवशिष्टबहुभागद्र-
व्यं पुनरधाप्रवृत्तभागहारेण खंडयित्वा तदेकभागद्रव्यं द्वितीयसमये संक्रम यति [स ७ अ / ७।२।अअ] अ-
वशिष्टं तद्बहुभागं पुनरप्यधाप्रवृत्तभागहारेण खंडयित्वा तदेकभागं तृतीयसमये संक्रम- य-
ति [स ७ अअ / ७।२।अअअ] एवमनेन क्रमेण समयोनद्व्यावलिचरमसमयपर्यंतं विशेषविहीनं द्रव्यं संक्रमयति। तथा
पु नः पुंवेदनवकबंधस्यापरं समयप्रबद्धद्रव्यं प्रतिसमयमसंख्यातभागहीनक्रमेण संक्रम
यति पुनरन्यत्समयप्रबद्धद्रव्यं प्रतिसमयं संख्यातभागहीनक्रमेण, पुनरन्यत्समयप्रबद्धद्रव्यं संख्यातगु
णहीनक्रमेण संक्रमयति। पुनरपरं समयप्रबद्धद्रव्यं प्रतिसमयमसंख्यातगुणहीनक्रमेण संक्रमयति त-
था पुनरन्यत्समयप्रबद्धद्रव्यं प्रतिसमयमसंख्यातभागवृद्धिक्रमेण पुनरन्यत्समयप्रबद्धद्रव्यं संख्यात-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri



भागवृद्धिक्रमेण पुनरन्यत्समयप्रबद्धद्रव्यं संख्यातगुणवृद्धिक्रमेण पुनरेकसमयबद्धद्रव्यमसंख्यातगुणवृद्धिक्रमेण संक्रमयति। चतुःस्थानपतितहानिवृद्धिपरिणतयोगसंचितसमयप्रबद्धानां द्रव्यहीनाधिकभावमाश्रित्य तत्संक्रमणद्रव्यस्यापि चतुःस्थानहानिवृद्धिक्रमस्य प्रवचनयुक्त्या प्रवृत्तिप्रदर्शनात् अथापगतवेदस्य प्रथमसमये स्थितिबंधप्रमाणप्रदर्शनार्थमिदमाह। पढमावेदे संजलणाणं अंतोमुहुत्तपरिहीणं। वस्साणं वत्तीसं संखसहस्सियरगाणठिदिबंधो ॥ छ॥ २६९। प्रथमसमयवर्त्तिन्यपगतवेदे संज्वलनक्रोधादिचतुष्टयस्य स्थितिबंधोंतर्मुहूर्त्तहीनो द्वात्रिंशद्वर्षप्रमितः। सवेदचरमसमयवर्त्तिनः प्राक्तनस्थितिबंधात्सम्पूर्णद्वात्रिंशद्वर्षमात्रादंतर्मुहूर्त्तस्थितिबंधापसरणावशेनापगतवेदप्रथमसमये एवंविधस्थितिबंधस्य युक्तत्वात्। शेषकर्मणां तीसियवीसियवेदनीयानां प्राक्तनस्थितिबंधात्संख्यातसहस्रवर्षमात्र एव पूर्वोक्ताल्पबहुत्वविधानेन ज्ञातव्यः। अथापगतवेदस्य संभवत्क्रियांतरप्रदर्शनार्थं गाथाद्वयमाह ॥ छ। पढमावेदो तिविहं कोहं उवसमदि पुव्वपढमठिदी। समयाहियआवलियं जाव य तक्कालठिदिबंधो। ॥२७०। प्रथमसमयवर्त्यपगतवेदानिवृत्तिकरणविशुद्धिसंयतः तत्काल प्रथमसमयादारभ्य पुंवेदनवकबंधेन सह अप्रत्याख्यान प्रत्याख्यान संज्वलनक्रोधत्रयमुपशामयति। तत्र संज्वलनक्रोधस्योदयमानस्य पूर्वमंतरकरणप्रारंभे स्थापितांतर्मुहूर्त्तमात्री प्रथमस्थितिः पुंवेदप्रथमस्थितेर्विशेषाधिका सैवेदानीमपिगलिता च शेषप्रमाण समयाधिकावलिमात्रावशेषा यावत्तावत्प्रवर्त्तते। उच्छिष्टावल्याः प्रथमस्थितिव्यपदेशासंभवात्। उपरिमानादीनां यथाभिनवा प्रथमस्थितिः करिष्यते तथा संज्वलनक्रोधस्य नूतनप्रथमस्थितिकरणानुपपत्तेश्च संज्वलनक्रोधस्य प्रथमस्थितौ यदा आवलिप्रत्यावलिद्वयमवशिष्यते। तदा आगालप्रत्यागालौ व्युच्छिन्नौ। तदैव संज्वलनक्रोधस्य गुणश्रेणिनिर्जरापि व्युच्छिन्ना केवलं प्रागुक्तक्रमेण प्रत्यावलिद्रव्यस्यो



Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

दीरणा भवति। तस्य क्रोधत्रयस्योपशामनकालचरमसमये संज्वलनक्रोध प्रथमस्थितौ समयाधिकावलिमा
त्रावशेषे कर्मणां स्थितिबंधईदृशो भवतीति वक्ष्यते ॥ छ॥ संजलणाचउक्काणां मासचउक्कं तु सेस पयडीणां वस्साणं
संखेज्जसहस्साणि हवंति तीयमेण ॥ २७१ संज्वलनक्रोधादि चतुष्टयस्यापगतवेद प्रथमसमयादारभ्यांतर्मु-
हूर्त्तमात्रस्थितिबंधापसरणेषु संख्यातसहस्रेषु गतेषु क्रोधत्रयोपशामनकालचरमसमये स्थितिबंधश्चतुर्मा-
समात्रः शेषकर्मणां तीसियवीसिय वेदनीयानां प्राक्तनस्थितिबंधात्संख्यातगुणहीनोपि संख्यातसहस्रवर्ष
मात्र एव पूर्वोक्तात्पबहुत्वक्रमेण प्रवर्त्तते अथ क्रोधद्रव्यस्य संक्रमविशेष प्रदर्शनार्थमिदमाह ॥ छ। कोहदुगं
संजलणकोहे संछुहदि जाव पढमठिदी आवलितियं तु उवरिं संछुहदि हु माणसंजलणे ॥२७२। अपगतवेद-
प्रथमसमयादारभ्य संज्वलनक्रोध प्रथमस्थितिरावलित्रयावशेषा यावद्भवति तावद प्रत्याख्यान प्रत्याख्यान-
क्रोधद्वय द्रव्यं गुणसंक्रमेण गृहीत्वा संज्वलनक्रोधे संक्रमयति। तत्र प्रथमा संक्रमावलिः द्वितीया उपशामनावलिः तृ
तीया उच्छिष्टावलिरिति व्यपदिश्यते। ततः परं तद्द्रव्यं संक्रमणावलिचरमसमय पर्यंतं संज्वलनमाने संक्रमयति
अथ उपशामनावलिचरमसमये संभवत्क्रियाविशेष प्ररूपणार्थमिदमाह ॥ छ। कोहस्स य पढमठिदी आवलिसे
सेति कोहमुवसंतं णयणवकं तत्थंतिम बंधुदया होंति कोहस्स ॥ २७३। संज्वलनक्रोधस्य प्रथमस्थितौ उच्छिष्टाव-
लिमात्रावशेषायामुपशामनावलिचरमसमये क्रोधत्रयद्रव्यं समयोनद्व्यावलिमात्रसमयप्रबद्धनवकबंधमु-
क्त्वा पूर्वोक्तविधानेन चरमफालिरूपेण निरवशेषं स्वस्थाने एवोपशमयति तास्मिन्नेवोपशामनावलिचरमसम
ये संज्वलनक्रोधस्य बंधोदयौ युगपदेव व्युच्छिन्नौ तस्मिन्नेव समये संज्वलनक्रोधस्योच्छिष्टावलि प्रथमनिषेकः-
संज्वलनमानेयि उक्तसंक्रमेण संक्रम्योदयमागमिष्यति। अतःकारणात्संज्वलनक्रोध प्रथमस्थितौ समयोनो-
च्छिष्टावलिरवशिष्टेति ग्राह्यं एवं क्रोधत्रयमुपशामितं। अथ मानत्रयोपशमनविधान प्रदर्शनार्थं गाथापंचकमाह ॥ छ॥

..x ग्रं १

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri



सेकाले माणस्सय पढमट्ठिदि कारवेदगो होदि पढमट्ठिदिम्मि दव्वं असंखगुणियक्कमेदेदि ।२७५। क्रोधत्रयोपश-
मनानंतरसमये अयमनिवृत्तिकरणासंयतः संज्वलनमानस्यांतर्मुहूर्त्तमात्रप्रथमस्थितेः कारको वेदकश्च भ-
वति तद्यथा संज्वलनमानस्य द्वितीयस्थितौ स्थितसत्वद्रव्यादस्मात् [स ७१२ ७।८] अपकर्षणभागहारखंडितैक-
भागं गृहीत्वा पुनः पल्यासंख्यातभागेन खंडयित्वा तदेकभागमुदयाव लि प्रथमसमयादारभ्य इदानीं
क्रियमाण प्रथमस्थितिचरमसमयपर्यंतं प्रक्षेपयोगेत्यादिना प्रतिनिषेकमसंख्यातगुणितक्रमेण निक्षिपति।
पुनः पल्यासंख्यातबहुभागं द्वितीयस्थितौ दिवड्ढगुणहाणिभाजिदे पढमा इत्यनेन विशेषहीनक्रमेण उपर्यति-
स्थापनावलिं मुक्त्वा निक्षिपति। पुनर्द्वितीयादिसमयेष्वपि प्रथमसमयापकृष्टद्रव्यादसंख्येयगुणितक्रमेण द्र-
व्यमपकृष्य प्रागुक्तप्रकारेण प्रथमद्वितीयस्थित्योर्निक्षिपति। प्रतिसमयं प्रथमस्थितिनिषेकमेकैकमुदयमान-
मनुभवति च ॥छ॥ पढमट्ठिदिसीसादो बिदियादिम्हिय असंखगुणहीणं। तत्तो विसेसहीणं जाव अदित्थावण-
मपत्तं ॥२७५॥ प्रथमस्थितिचरमसमयनिक्षिप्तद्रव्यात् द्वितीयस्थिति। प्रथमनिषेके निक्षिप्तद्रव्यमसंख्यातगु-
णहीनं प्रथमस्थितिशीर्षद्रव्यस्य पल्यभागहारभूतासंख्यातरूपबाहुल्यविशेषादसंख्यातसमयप्रबद्धमात्र-
त्वात्। द्वितीयस्थितिप्रथमनिषेकनिक्षिप्तद्रव्यस्य चद्व्यर्द्धगुणहान्यपकर्षणभागहारभक्तत्वेनैकसमयप्रब-
द्धासंख्येयभागमात्रत्वात्। ततो द्वितीयस्थितेः प्रथमनिषेकद्रव्यादुपरितननिषेकेषु विशेषहीनक्रमेणाति-
स्थापनावलेरधो निक्षिप्तद्रव्यं विशेषतोऽसंख्येयगुणहीनमेव संज्वलनमानस्य प्रथमस्थितिकरणवेदन-
प्रथमसमयादारभ्य मानत्रयस्य द्वितीयस्थितिद्रव्यं प्रतिसमयमसंख्यातगुणितक्रमेणोपशमयति त-
दैव संज्वलनक्रोधस्य समयोनोच्छिष्टावलिमात्रनिषेकद्रव्यमपि संज्वलनमानस्योदयावल्यां समस्थिति-
निषेकेषु प्रतिसमयमेकैकनिषेकक्रमेण संक्रम्य उदयमागमिष्यति संज्वलनक्रोधोच्छिष्टावलिनिषेकाः मा ५६

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

नोदयावलि निषेकेषु संक्रम्य अनंतरानंतरसमयेषूदयमागच्छंतीति तात्पर्यं अयमेवार्थ उक्तसंक्रमणेति
भण्यते ॥ छ। माणस्सय पढमठिदी सेसे समयाहिया तु आवलियं तिय संजलण बंधोदु मासमेसाण कोह-
आलावो ॥२७६। संज्वलनमानस्य प्रथमस्थितौ समयाधिकावल्यामवशिष्टायां उपशमनादिविधानैः सं-
ख्यातसहस्रस्थितिबंधापसरणेषु गतेषु मानोपशमनकालचरमसमये संज्वलनमानमायालोभानां-
स्थितिबंधो मासद्वय प्रमितो भवति। शेषकर्मणां स्थितिबंधः संख्यातगुणहीनोपि क्रोधालापवतीसियादीनां
पूर्वोक्ताल्पबहुत्वयुक्तः संख्यातसहस्रवर्षमात्र एव ॥ छ। माणदुगं संजलणमाणसंछुहदि जाव पढमठिदी आ
वलितियं तु उवरिं माया संजलणगे छुहदि ॥२७७। संज्वलनमानप्रथमस्थितौ यावदावलित्रयमवशिष्यते ता
वत् प्रत्याख्यानप्रत्याख्यानमानद्वयद्रव्यं संज्वलनमाने एव पूर्वोक्तविधानेन संक्रामति। ततः परं संक्रमणावलि
चरमसमयपर्यंतं तद्द्वयद्रव्यं संज्वलनमायाद्रव्ये एव संक्रामति। संज्वलनमानद्रव्यं तु नियमेन संज्वलनमा-
यायामेव संक्रामति ॥ छ॥ माणस्सय पढमठिदी आवलिसेसे ति माणमुवसंतं। णायणवकं तत्थंतिमबंधुदयाहों-
ति माणस्स ॥२७८। एवं मानत्रयद्रव्यं संज्वलनमानप्रथमस्थितावलिमात्रावशेषायामुपशमनावलिचरमस-
मये समयोनद्व्यावलिमात्रसंज्वलनमाननवकबंधसमयप्रबद्धान् मुक्त्वा सर्वमुपशमितं भवति। तस्मिन्नेवोप
शमनावलिचरमसमये संज्वलनमानस्य बंधोदयौ युगपद्व्युच्छिन्नौ पूर्ववन्मानसंज्वलनस्योच्छिष्टावलि प्रथम
निषेको मायायां थिउक्कसंक्रमेण संक्रम्योदेष्यतीति विशेषो ज्ञातव्यः। अथ मायात्रयोपशमनविधानार्थं गाथाच-
तुष्टयमाह। छ। से काले मायाये पढमट्ठिदिकारवेदगो होदि। माणस्सय आलाउ दव्वस्स विभंजणं तत्थ ॥२७।
मानत्रयोपशमनानंतरसमये मायासंज्वलनस्य प्रथमस्थितेः कारको वेदकश्च भवति। तत्र संज्वलनमायाद्र-
व्यस्यापकर्षण निक्षेपविभागो मानद्रव्यवदालप्यतां विशेषाभावात्। तदेव संज्वलनमानोच्छिष्टावलिनिषेकाः

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri



यित्युक्त संक्रमेण संज्वलन मायोदयावलि निषेकेषु समस्थितिकेषु संक्रम्योदेष्यंति। संज्वलन मानस्य समयो-
नद्व्यावलि मात्रा नवक बंधसमय प्रबद्धाश्च तदैव समयो नद्व्यावलि मात्रकाले नोपशाम्यंति ॥छ॥ मायाये पढ
मठिदी सेसे समयाहियं तु आवलियं। मायालोहगबंधो मासं सेसाण कोह आलाउ ॥२८०॥ माया संज्वलनस्य
प्रथमस्थितौ समयाधिकावल्या मवशिष्टायां संज्वलन माया लोभयोः स्थिति बंधो मासमात्रः। शेष कर्मणां क्रो
धवदालापः कर्त्तव्यः पूर्वोक्ताल्प बहुत्वेन संख्यात वर्षसहस्र मात्र स्थिति बंध इत्यर्थः। मायदुगं संजलणगमा-
याये छुहदि जाव पढमट्ठिदी आवलितियं तु उवरिं संछुहलोह संजलणे ॥२८१॥ माया संज्वलन प्रथमस्थि-
तौ आवलित्रयं यावदवशिष्यते तावद प्रत्याख्यान प्रत्याख्यान माया द्वय द्रव्यं माया संज्वलने एव संक्रामति-
ततःपरं संक्रमणावल्यां संज्वलन लोभे संक्रामति ॥छ॥ मायाये पढमठिदी आवलि सेसेति माय मुवसंतं णाय
णवकं तत्थंतिम बंधुदया होंति मायाए ॥२८२॥ संज्वलन मायां प्रथमस्थितौ आवलि मात्रावशिष्टायामुपशम-
नावलि • चरम समये माया त्रयं समयो नद्व्यावलि मात्र नवक बंध समय प्रबद्धान्मुक्त्वा अन्यत्सर्वं सर्वात्मनो
पशमितं भवति तस्मिन्नेव समये उच्छिष्टावलि प्रथम निषेकः संज्वलन लोभोदयावलि प्रथम निषेके यिउक्क सं
क्रमेण संक्रामति। तस्मिन्नेव समये माया संज्वलनस्य बंधोदयौ व्युच्छिन्नौ अथ लोभ त्रयोपशमन विधान प्ररूप
णार्थं गाथाद्वय माह ॥छ॥ से काले लोहस्सय पढमठिदी कारवेदगो होदि तं पुण बादर लोहो माणं वा होदि णि
क्खेउ ॥२८३॥ माया त्रयोपशमनानंतर समये लोभ त्रयोपशमनं प्रारभमाणः संज्वलन लोभस्य प्रथमस्थितेः-
कारको वेदकश्च भवति स पुनरनिवृत्तिकरणो बादर लोभोदय मनुभवन् बादर सांपराय इत्युच्यते। अत्र संज्व
लन लोभ द्रव्यादपकृष्य प्रथमस्थितौ निक्षेपः संज्वलन मान प्रथमस्थिति निक्षेपवत्कर्त्तव्यः। तस्मिन्नेव समये-
माया संज्वलनस्य समयो नद्व्यावलि मात्र नवकबंध समय प्रबद्धान् पूर्वोक्त विधानेनोपशामयति समयो नोच्छिष्टा- ५७

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

वलिमात्रनिषेकांश्च प्रागवस्थितोत्कसंक्रमेण संज्वलन लोभे संक्रमयति ॥ छ ॥ पढमट्ठिदि अद्धंते लोहस्सय होदि
दिणपुधत्तंतु वस्ससहस्सपुधत्तं सेसाणं होदि ठिदि बंधो ॥ २८७ ॥ मायात्रयोपशमनानंतर समयादारभ्य सं-
ज्वलन बादर लोभ वेदककालो निवृत्तिकरणचरमसमय पर्यंतो भवति । ततः परं सूक्ष्मसांपराय चरमसमय-
पर्यंतः संज्वलन सूक्ष्मलोभ वेदक कालो भवति । उभयोपि मिलित्वा लोभवेदकाद्धेति उच्यते सचलोभवेदकका-
लोंतर्मुहूर्तमात्रः तस्य संदृष्टिः [२१] इदं संख्यातेन खंडयित्वा तद्बहुभागं [२१/१] त्रिषु स्थानेषु विभज्य स्थापयेत् ।
[२२२/२१३ । २२२/२१३ । २२२/२१३] पुनस्तदेकभागं संख्यातेन खंडयित्वा बहुभागं प्रथमस्थाने दद्यात् । [२२२/२१२] पुनरवशिष्टैक-
भागं अपरेण संख्यातेन खंडयित्वा तद्बहुभागं द्वितीयस्थाने दद्यात् । [२११/२२१] तदेकभा-
गं तृतीयस्थाने दद्यात् स्थानत्रय संदृष्टिः ।

| | | |
|---|---|---|
| २२१/२१३ | २२१/२१३ | २२१/२१३ |
| २२१/२२ | २२२/२२२ | २२/२२२ |

अत्र प्रथमभागः संज्वलन बादर लोभवेद-
काद्धा प्रथमार्द्धः द्वितीयो भागः सूक्ष्मकृष्टिकरणकालः तृतीयो भागः सूक्ष्मकृष्टिवेदककालः
स एव सूक्ष्मसांपरायकालः । अथ प्रथमद्वितीय भागयोर्मेलने लोभवेदकाद्धा द्वित्रिभाग-
मात्रं साधिकं प्रथमस्थिति प्रमाणं भवति [२२२/३] । तद्यथा । प्रथमद्वितीय भागयोः तावद्बहुभागं मिलितमिदं [२२१२/२१३]
अत्रैतावद्दृणं [२२।२।२/२१३] प्रक्षिप्यापवर्तिते एवं [२२।२/३] द्वितीय भागविशेषधने [२२२/२२१] एतावदृणं [२२।२/२२२]
प्रक्षिप्यापवर्त्य [२२/२२] प्रथम भागविशेषधने प्रक्षिप्यापवर्तिते एवं अस्मिन् त्रिभिः समच्छेदी-
कृते द्वितीयऋणेन साधिकं प्रथमऋणं [२२।२।२/२१३] विशोध्यावशिष्टं धनं पूर्वानीत प्रथमद्वितीयभागद्वय ब-
हुभागद्रव्ये लोभवेदकाद्धा द्वित्रिभागमात्रे प्रक्षिपेत् [२१।२/३] इयमावल्यभ्यधिका संज्वलनबादर लोभ
प्रथमस्थितिर्भवति एतस्याः प्रथमार्द्धो लोभवेदककालस्य साधिक त्रिभाग मात्रो भवति तथाहि प्रथम-
भाग बहुभागे द्रव्ये [२२१/२१३] एतावदृणं [२२।२/२१३] प्रक्षिप्यापवर्तिते लोभवेदकाद्धा त्रिभागो भवति । [२१/३] पुनः प्रथम-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri



भागविशेषधने २११/२२ एतावद्वणां २११/२२ प्रक्षिप्यापवर्त्तिते २१/२ अस्मिन् त्रिभिः समछेदीकृते द्वितीयऋणेन
साधिकं प्रथम- ऋणां २११/२१३ विशोध्यावशिष्टं – २१२-/२१३ प्रागानीतलोभवेदकाद्धात्रिभागे प्र-
क्षिपेत् २११/३ एवं कृते लोभ वेदकाद्धा साधिक त्रिभागमात्रः बादर संज्वलन लोभ प्रथमस्थितिप्र
थमार्द्धो भवति। तच्चरमसमये संज्वलन लोभस्य स्थितिबंधो दिन पृथक्त्वं शेषकर्मणां स्थिति बंधः पूर्वो
क्ताल्प बहुत्वेन वर्ष सहस्र पृथक्त्वमात्रः। अथ संज्वलन लोभानुभाग सत्वस्य कृष्टिकरणा प्ररूपणार्थमिदमा-
ह ॥ छ ॥ बिदियद्धे लोभावर फड्डय हेट्ठा करेदि रसकिट्टिं। इगि फड्डय वग्गणगद संखाणमणंत भागमिदं ।२८।
संज्वलनलोभ प्रथमस्थितेः प्रथमार्द्धं पूर्वोक्त विधानेन गालयित्वा तद्द्वितीयार्द्धे प्रथमसमये संज्वलन लोभानु
भाग सत्वस्य जघन्य स्पर्द्धकादि वर्गणाविभाग प्रतिछेदाः प्रतिपरमाणुजीवराशेरनंतगुणाः संति १६ ख एते
षांवर्ग इति संज्ञा । व । एवंविध सर्व जघन्य शक्तियुक्तानां सदृशधनानां कार्मणपरमाणूनां प्रथम पुंजः आदि व-
र्गणा भवति। तद्यथा लोभ संज्वलन सर्व सत्व द्रव्यमिदं । स ७१२-/७८ । अस्मिन्ननुभाग सम्बंधि साधिक द्व्यर्द्ध गुण-
हान्या भक्ते आदि वर्गणा भवति । स ७१२-/७८ । ख ख ३/२ । तस्यां द्विगुणगुणहान्या भक्तायां विशेषो भवति । स ७१२-/७८ । ख ख ३/२ ख ख २ ।
अयं लघुसंदृष्टिनिमित्तं । व वि । इति स्थाप्यते। अस्मिन्ननुभाग संबंधि द्विगुणगुणहा-
न्या गुणिते आदि वर्गणा जायते । व वि । ख ख २ । अत्र लघुसंदृष्ट्यर्थं गुणहानेरष्टांकं संस्थाप्य । ८ । द्वाभ्यां गुणयि-
त्वा ८।२। तेन षोडशांकेन विशेषे गुणिते आदि वर्गणा न्यास एवंविधो भवति। । व वि १६ । इदं लघुसंदृष्टिनिमित्तं –
। व । इति स्थापयित्वा पुनरनुभाग संबंधि साधिक द्व्यर्द्ध गुणहान्या गुणिते संज्वलन लोभ सर्व सत्वमागच्छति । व १२ ।
अस्माद्द्वितीयार्द्धे प्रथमसमये द्रव्यमपकृष्य संज्वलन लोभ जघन्य स्पर्द्धक लता समानादि वर्गणाविभाग प्रतिछे
देभ्यः अधस्तादनंतगुणहीनाविभाग प्रतिछेद तया एक स्पर्द्धक वर्गणा शलाकानंतैक भाग प्रमिताः । ४/ख । अनुभा ५८

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

ग सूक्ष्मकृष्टीः करोति उपशमश्रेण्यां बादरकृष्टिविधानासंभवात्। अंतर्मुहूर्त्तकालनिर्वर्त्यमानानुभागकांडक-
घातं विनाऽदानीं प्रतिसमयं सर्वजघन्यप्रात्तनंतैकभाग [व / ख] प्रमितत्वेन कृष्टिघातं कर्त्तुं प्रारभत इत्यर्थः। अथ-
मये संज्वलनचतुष्टयस्य स्थितिबंधोऽष्टमासमात्रः घातित्रयस्य संख्यातसहस्रवर्षमात्रः ततः संख्येयगुणो ना-
मगोत्रयोः ततो द्व्यर्द्धगुणितो वेदनीयस्य अथावतारकानिवृत्तिकरणस्य पुंवेदोदयकाले संभवत्क्रियावि-
शेषान् गाथाचतुष्टयेनाह ॥ छ ॥ उदरगपुरिसपढमे सत्तकसाया पणट्ठ उवसमणा । उणवीसकसायाणं छक्क-
म्माणं समाणगुणसेढी ॥ २२४ ॥ संज्वलनक्रोधवेदककाले पुंवेदोदय प्रथमसमये युगपदेव पुंवेदः । हास्यादि-
षण्णोकषायाश्च प्रणष्टोपशमनकरणाः संजाताः । तदैव द्वादशकषायाणां सप्तनोकषायाणां च ज्ञानावरणादि-
षट्कर्मणां गुणश्रेण्यायाम समानेन आयामेन गुणश्रेणीं करोति । तत्रोदयवतोः पुंवेद संज्वलनक्रोधयोः द्रव्यमप

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri



कृष्य उदयादि गुणश्रेण्यायामे अंतरायामे द्वितीयस्थितौ च संज्वलनक्रोधोक्त प्रकारेण द्रव्यनिक्षेपं करोति
उदयरहितानां शेषकषायनोकषायाणां द्रव्यमपकृष्य उदयावलिवाह्यगुणश्रेण्यायामे अंतरायामे द्वितीय-
स्थितौ च पूर्वोक्त प्रकारेण निक्षिपति। तदैव सप्तनोकषायाणामानुपूर्व्या संक्रमोपि पूर्ववत् ज्ञातव्यः। तदैव पुं
वेदस्य बंधोपि प्रारब्धः। पुंसंजलणिदराणं वस्सा वत्तीसयं तु चउसट्ठी संखेज्जसहस्साणिय तक्काले होदि।
ट्ठिदिबंधो ॥३२५। अवतारकस्य पुंवेदोदय प्रथमसमये पुंवेदस्य द्वात्रिंशद्वर्षमात्रः स्थितिबंधः संज्वलनच
तुष्कस्य चतुःषष्टिवर्षमात्रः घातित्रयस्य संख्यात सहस्र वर्षमात्रः। नामगोत्रयोस्ततः संख्येयगुणः वेदनीय
स्य ततो द्व्यर्द्धगुणः पुरिसेदु अणुवसंते इत्थी उवसंतगोत्ति अद्धाये। संखाभागासु गदेसऽसंखवस्सं अघा-
दिठिदिबंधो ॥३२६। पुंवेदोदय कालेंतर्मुहूर्त्तमात्रे यावत् स्त्रीवेदोपशमनं न विनश्यति। तावत् काल संख्या
तभागेषु गतेषु अघातिकर्मणां स्थिति बंधो संख्यात वर्षमात्रः। णामदियणाम दुगाणं वीसिय पडिभागदो हवेबं
धो। तीसिय पडिभागेणाय बंधो पुण वेयणीयस्स ॥३२। तत्र नामगोत्रयोः पल्यासंख्यातैकभागमात्रस्थितिबंधः।
वीसियस्थितिबंधे एतावति तीसियास्थितिबंधः कियानिति त्रैराशिकसिद्धो वेदनीयस्थितिबंधो द्व्यर्द्धगुणित
पल्यासंख्यातभागमात्रः घातित्रयस्य संख्यात सहस्र वर्षमात्रः स्थिति बंधः। ततः संख्ये
यगुणहीनो मोहनीयस्य संख्यात सहस्र वर्षमात्रः स्थितिबंधः। अथ स्त्रीवेदोपशम-

| प्र | फ | इ | लब्ध |
|---|---|---|---|
| २० | प ७ | ३० | प ३ / ७२ |

नविनाश [illegible]रूपणार्थं गाथाद्वयमाह ॥ छा। थी अणुवसमे पढमे वीसकसायाण होदि गुणसेढी। संढुवसमो
त्तिमज्झे संखाभागेसु तीदेसु ॥३२८। ततः संख्यात सहस्र स्थिति बंधेषु अंतर्मुहूर्त्तकाले गतेषु एकस्मिन् सम
ये स्त्रीवेदोपशमो विनष्टः। ततः प्रभृति स्त्रीवेद द्रव्यं संक्रमापकर्षणादि करणायोग्यं संजातमित्यर्थः। तस्मिन्-
स्त्रीवेदोपशमन विनाश प्रथमसमये स्त्रीवेद द्रव्यमपकृष्य तस्योदयरहितत्वाद् उदयावलि वाह्यगुणश्रेण्या ७१

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri



यामे अंतरायामे द्वितीयस्थितौ च पूर्वोक्तविधानेन निक्षिपति। अत्र गुणश्रेण्यायामः शेषकर्मणां गलितावशे-
षगुणश्रेण्यायामसमानः द्वादशकषायसप्तनोकषायाणां द्रव्यमपकृष्य पूर्वोक्तप्रकारेण गलितावशेषगुणश्रे-
ण्यायामे अंतरायामे द्वितीयस्थितौ च निक्षिपति। एवं विंशतिकषायाणां गुणश्रेणीकरणं प्रक्षपितं यावन्नपुंसक
वेदोपशमोस्ति तावत्कालस्य संख्यातबहुभागेषु गतेषु तन्मध्ये। छ। घादितियाणं णियमा असंखवस्सं तु होदि
ठिदिबंधो। तक्काले दुट्ठाणं रसबंधो ताण देसघादीणं॥३२९॥ घातित्रयस्य स्थितिबंधः पल्यासंख्यातभागः सचा-
संख्यातवर्षमात्रः नामगोत्रयोस्ततो ऽसंख्येयगुणः पल्यासंख्यातभागमात्रः वेदनीयस्य द्व्यर्द्धगुणितस्तावन्मात्रः
मोहनीयस्य संख्यातसहस्रवर्षमात्रः स्थितिबंधः। अस्मिन्नेवावसरे तेषां च दुर्ज्ञानावरणीयपंचांतरायाणां देश-
घातिनां लतादारुसमानद्विस्थानानुभागबंधो भवति। अथ नपुंसकवेदोपशमनविनाशं तत्कालसंभविक्रिया-
विशेषं च प्ररूपयितुं गाथाद्वयमाह। संढणुवसमे पढमे मोहिगिवीसाण होदि गुणसेढी। अंतरकदोत्ति मज्झे संखा-
भागासु तीदासु॥३३०॥ ततः संख्यातसहस्रस्थितिबंधेषु गतेषु एकस्मिन् समये नपुंसकवेदोपशमो विनष्टः त-
त्प्रथमसमये नपुंसकवेदद्रव्यमपकृष्य इतरकर्मगलितावशेषगुणश्रेण्यायामसमाने उदयावलिबाह्यगुण-
श्रेण्यायामे अंतरायामे द्वितीयस्थितौ च पूर्वोक्तविधानेन निक्षिपति। अवशिष्टविंशतिमोहप्रकृतीनां द्रव्यमप-
कृष्य गलितावशेषगुणश्रेणीं प्रारब्धं करोति। नपुंसकवेदोपशमनविनाशप्रथमसमयादारभ्य आरोहकानि-
वृत्तिकरणस्यांतरकरणनिष्ठापनचरमसमयपर्यंतं योंतर्मुहूर्त्तकालस्तस्य संख्यातबहुभागेषु गतेषु तदंतर
छ। मोहस्स असंखेज्जा वस्सपमाणा हवेज्ज ठिदिबंधो ताहे तस्स य जादं बंधं उदयं च दुट्ठाणं॥३३१॥ मोहनीय-
स्यासंख्यातवर्षमात्रः स्थितिबंधः ततो संख्येयगुणो घातित्रयस्य स्थितिबंधः। ततो संख्येयगुणो नामगोत्रयोः स्थि-
तिबंधः ततो विशेषाधिको वेदनीयस्य स्थितिबंधः। तस्मिन्नेवावसरे मोहनीयस्य द्विस्थानानुभागबंधोदयौ जा-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri



अथावतरणे लोभासंक्रम प्रतिघातादि स्वरूपणार्थं गाथात्रयमाह ।छ। लोहस्स असंकमणं छावलितीदेसु दीरणा
तंच । णियमेण पडं ताणं मोहस्सणु पुव्वि संकमणं ।३३२। अवतारक सूक्ष्म सांपराय प्रथमसमयादारभ्याधः
सर्वाचस्यासु बध्यमान ज्ञानावरणादि कर्मणां समय प्रबद्ध द्रव्य मारोहके षडावलिकाः व्यतिक्रम्य उदीर्यते इ-
ति नियमः प्रागुक्तस्तं परित्यज्य इदानीं बंधावली व्यतिक्रमे उदीर्यते अवतारका निवृत्तिकरण प्रथमसमयादा
रभ्य लोभस्या संक्रमो ऽधः सर्वत्रारोहक विपर्ययेण प्रतिहन्यते संज्वलन लोभस्य मायादिषु संक्रमणशक्ति परि
णाति र्जातेत्यर्थः तथा मोहस्य नपुंसकादि प्रकृतीनां आनुपूर्वी संकमश्च नष्टः आरोहणे यः आनुपूर्वी संक्रमः-
प्रागुक्तस्तं परित्यज्य इदानीमनानुपूर्व्या बध्यमाने सजातीय प्रकृत्यंतरे यत्र तत्रवा संक्रमो जात इत्यर्थः ।छ। विव
रीयं पडिहम्मदि विरियादीणं च देसघादित्तं तहय असंखेज्जाणं उदीरणा समय बद्धाणं ॥३३३। एवमुक्त-
प्रकारेण स्थिति बंध सहस्रेषु गतेषु वीर्यांतरायस्यानुभाग बंधो देशघाति स्वरूपं परित्यज्य सर्वघाति स्वरूपो जातः
ततः स्थिति बंध पृथक्त्वेषु गतेषु मतिज्ञानावरणीयोपभोगांतराययोरनुभाग बंधो देशघाति रूपं मुक्त्वा सर्व-
घाति रूपो जातः ततः स्थिति बंध पृथक्त्वेषु गतेषु चक्षुर्दर्शनावरणीयस्यानुभाग बंधो देशघाति रूपं मुक्त्वास
र्वघाति रूपो जातः ततः स्थिति बंध पृथक्त्वेषु गतेषु श्रुतज्ञानावरणीया चक्षुर्दर्शनावरणीय भोगांतरायाणाम
नुभाग बंधो देशघाति रूपं मुक्त्वा सर्वघाति रूपो जातः ततः स्थिति बंध पृथक्त्वेषु गतेषु अवधिज्ञानावरणी-
यावधि दर्शनावरणीय लाभांतरायाणामनुभाग बंधो देशघाति रूपं त्यक्त्वा सर्वघाति रूपो जातः ततः स्थिति
बंध पृथक्त्वेषु गतेषु मनःपर्यय ज्ञानावरणीय दानांतराययोरनुभाग बंधो देशघाति रूपं त्यक्त्वा सर्वघाति-
रूपो जातः ततः स्थिति बंध सहस्रेषु गतेषु असंख्यात समय प्रबद्धोदीरणा प्रतिहन्यते ।छ। लोयाणमसं-
खेज्जं समय पबद्धस्स होदि पडिभागो तत्तियमेत्त द्दव्वस्सुदीरणा वट्टदे तत्तो ॥३३४। गुणश्रेणी करणार्थम- ७२

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

पकृष्ट द्रव्यस्यारोहके यः पल्यासंख्यात मात्रो भागहारोपकृष्ट द्रव्यस्य संजातः। ततः कारणादसंख्येय समय
प्रबद्धोदीरणां विनाश्यैकसमय प्रबद्धासंख्येय भाग मात्रो दीरणा संजातेत्यर्थः। अथास्थितिबंधक्रमकरण-
विपर्यय प्ररूपणार्थं गाथासप्तकमाह। छ। तक्काले मोहणीयं तीसियं वीसियं च वेयणीयं मोहं वीसिय तीसिय-
वेयणिय कमं हवे तत्तो ॥३३५। तस्मिन् समय प्रबद्धस्यासंख्यात लोकमात्र भागहार प्रवेश काले सर्वतः स्तो-
कः। मोहनीयस्यास्थिति बंधः पल्यासंख्यात भागमात्रः [प/७७] ततोऽसंख्येयगुणो घाति त्रयस्य [प/६] ततोऽसंख्ये-
य गुणो नामगोत्रयोः [प/७५] ततो विशेषाधिको वेदनीय स्य [प३/७५।२] ततः परं संख्यात सहस्र स्थिति बंधे-
षु गतेषु मोहस्य स्थि तिबंधस्सर्वतः स्तोकः पल्यासंख्यात- भागमात्रः [प/७६] ततो व्युत्क्रमेण नामगो-
त्रयोरसंख्येयगुणः [प/७५] ततो विशेषाधिको घातित्रयस्य [प३/७५।२] ततो विशेषाधि को वेदनीयस्य [प३/७५।२]
मोहं वीसिय तीसिय मोहं अप्पा बहुगं तु अविरुद्धं। ३३६। ततः संख्यात सहस्र स्थिति बं-
धेषु गतेषु सर्वतः स्तोको मोहस्यास्थितिबंधः [प/७५] ततोऽसंख्येय गुणो नाम गोत्रयोः [प/७५] ततो विशेषाधिको घा-
ति त्रय वेदनीययोः [प३।/७५।२] ततः संख्यात स हस्र स्थिति बंधेषु गतेषु सर्वत स्तोको नामगोत्रयोः
स्थिति बंधः पल्या संख्यातैक भाग मात्रः [प/७५] ततो मोहनीयस्य विशेषाधिकः [प/७५] ततो घाति त्रय वे-
दनीययोर्विशेषाधिकः [प/७५] ततः संख्यात सहस्र स्थिति बंधेषु गतेषु सर्वतः स्तो कोनामगोत्रयोः-
स्थितिबंधः [प/७३] ततो वि शेषाधिको घाति त्रय वेदनीययोः [प३/७३।२] ततोऽर्द्धाधिको मोहनीयस्य [प।२/७३] एवं-
सिद्धांतावि रोधेन स्थिति बंधाल्पबहुत्वं ज्ञातव्यं। छ। कम करणाविणट्ठादो उवरिं ठ विदा
विसेस अहिया हु सव्वासिं तं णाट्ठे हेट्ठा सव्वासु अहियकमं ॥३३७। क्रमकरणविनाशस्य व्युत्क्रमण कालस्यो-
परि तत्कालावसान पल्यासंख्यात भागमात्रास्थिति बंधात्प्रभृत्युत्तरकाले सर्वकर्म प्रकृतीनां स्थिति बंधावि-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

शेषाधिकाः स्थापिताः रचितास्त्यर्थः। क्रमकरणविनाशादधस्तात्तत्कालादिमासंख्येय वर्षमात्र स्थिति बंधा-
त्पूर्वसंख्यात वर्षसहस्र स्थिति बंधपर्यंत मायुर्वर्जित सप्तकर्म प्रकृतीनां स्थिति बंधाः विशेषाधिकाः। छ।
जत्तोपायेहोदिहुअसंखवस्सपमाणाठिदि बंधो। तत्तो पाये अगांठिदि बंधमसंखगुणियकमं। ३३। यतः प्रभृ
तिनामगोत्रादि कर्म प्रकृतीनामसंख्यात वर्षमात्रस्थिति बंधः प्रारब्धस्ततः। प्रभृति पूर्व पूर्वस्थिति बंधादु-
त्तरोत्तर स्थिति बंधोऽन्यः असंख्येयगुणो भवति यावत्सर्व पश्चिमः पल्यासंख्यात भाग मात्रः स्थिति बंधो
जायते। छ। एवं पल्लासंखं संखंभागं च होइ बंधेण। एत्तो पाये अगांठिदि बंधो संखगुणियकमं॥ ३३७। एवंसं
ख्यात सहस्रेषु पल्यासंख्यातभाग प्रमितेषु स्थिति बंधेषु गतेषु सर्व पश्चिम पल्यासंख्यात भागमात्र [redacted] स्थि
तिबंधात्परं युगपदेव सप्त कर्मणां पल्य संख्यात भागमात्रः स्थिति बंधो जातः। तत्र वीसिय स्थिति बंधात्तीसिय
स्थिति बंधो द्व्यर्द्धगुणितः। चालीसिय स्थिति बंधो द्विगुण इति विशेषः पूर्ववद्द्रष्टव्यः। आरोहकस्य क्रमेणोपल
स्यमानो दूरापकृष्टि विषय स्थिति बंधः। कथमवरोहकस्यैकवारमेव संभवतीति नाशंकनीयं। प्रतिपाति प-
रिणाम माहात्म्येनात्र तथा भावस्य विरोधाभावात्। इतः प्रभृत्य नंतरानंतर स्थिति बंधोऽन्यः संख्यातगुणि
तः सप्तकर्मणां जायते। छ। मोहस्सय ठिदि बंधे पल्लु जादे तदो दु परिवट्टी। पल्लुस्स संखभागं इगिविगलास
णिबंधसमं॥ ३४०। एवं संख्यात गुणित वृद्धिक्रमेण संख्यात सहस्र स्थिति बंधोत्सरणेषु गतेषु सर्व पश्चि
मास्थिति बंधो नाम गोत्रयोः पल्य संख्यातैक भागमात्रः प / ५ ततस्तीसिय स्थिति बंधो द्व्यर्द्ध गुणितः प ३ / ५।२
ततः मोहनीय स्थिति बंधो द्विगुणः प २ / ५ तदनंतर स्थिति बंधो मोहस्य सम्पूर्ण पल्यमात्रः (प)
अत्र वृद्धि प्रमाणं पल्य संख्यात ब- हुभाग मात्रं प ५-२ / ५ तीसिय स्थिति बंधः पल्य त्रिचतुर्भाग मात्रः ~
प ३ / ४ अत्र वृद्धि प्रमाणं अनंतराधस्तन स्थिति प्रमा- णेन प ३ / ५।२ अनेन साधिक पल्य चतुर्भाग प १ / ४ ~ 

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

न्यूनपल्यमात्रं। प ५।२ / ५।४ वीसियस्थितिबंधः पल्यार्द्धमात्रः प १/२ अत्र वृद्धिप्रमाणं अनंतराधस्तनस्थिति-
बंधमात्रेण प- ल्यसंख्यातभागेन प/५ न्यूनपल्या र्द्धमात्रं प ३/४ पूर्वस्थितिबंधे शोधिते अव-
शेषमात्रं वृद्धिप्रमाणं सर्वत्र ज्ञातव्यं चाली सियस्थितिबंधस्य यदि। पल्यमात्रः स्थितिबंधो लभ्यते। त-
दा तीसियस्थितिबंधस्य कीदृशः स्थितिबंधो भवति प्र ४० | फ ५ | इ ३० ति त्रैराशिकसिद्धः पल्यत्रिचतुर्भागमात्र-
स्तीसियस्थितिबंधः। तथा वीसियस्थितिबंधमिच्छारा शिं कृत्वा त्रैराशिकसिद्धो प्र ४० | फ प | इ २० वीसि-
यस्थितिबंधः पल्यार्द्धमात्र एवं मोहनीयस्य स्थितिबंधो यदा पल्यमात्रो जातस्ततः परम नंतर
नंतर स्थितिबंधोत्सरणेषु पल्यसंख्यातैकभागमात्रं वृद्धिप्रमाणं द्रष्टव्यं। ततः संख्यातसहस्रेषु स्थितिबं-
धोत्सरणेषु पल्यसंख्यातैकभागमात्रं वृद्धिप्रमाणं द्रष्टव्यं। ततः संख्यातसहस्रेषु स्थितिबंधोत्सरणेषु गतेषु-
मोहस्य स्थितिबंधः। एकेंद्रियस्थितिबंधसदृशः सागरोपमचतुःसप्तमभागमात्रः सा ४/७ तीसियस्थितिबंधः
सागरोपमत्रिसप्तमभागमात्रः सा ३/७ वीसियस्थितिबंधः सागरोपमद्विसप्तमभा गमात्रः सा २/७ एवं-
प्रतिकांडकं संख्यातसहस्रस्थि तिबंधोत्सरणेषु गतेषु द्वींद्रियत्रींद्रियचतुरिंद्रियासंज्ञि पंचें-
द्रियस्थितिबंधसदृशा मोहनीयस्यास्थितिबंधाः परमागमोक्तप्रतिभागक्रमेण ज्ञातव्याः ॥ छ। मोहस्स पल्ल-
बंधे तीसदुगे तत्ति पाद मद्धं च दुत्ति चउसत्तभागा वीसतिये एयवियलठिदी। ३४०। यदा मोहस्य पल्यमा-
त्रस्थितिबंधो जातस्तदा तीसियस्थितिबंधः पल्यत्रिचतुर्भागमात्रः वीसियस्थितिबंधः पल्यार्द्धमात्रः पुन-
रेकेंद्रियस्थितिबंधसदृशाः वीसियतीसियमोहानां स्थितिबंधाः सागरोपमस्य द्विसप्तमत्रिसप्तमचतुः-
सप्तमभागमात्राः। पुनः द्वींद्रियादिस्थितिबंधसदृशाः वीसियादिस्थितिबंधाः पंचविंशतिपंचाशत्सहस्र-
गुणिताः असंज्ञिस्थितिबंधपर्यंता अनुगंतव्याः। अथावतारकानिवृत्तिकरणचरम समयस्थितिबंधप्र-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

परार्थमाह ।छ।
खवपुधत्तं बंधोसे
तिबंधात्परं संख्या
निवृत्तिकरणचर
स्व प्रतिभागगुणि

| | | | | |
|---|---|---|---|---|
| मो पु २ | प २ / ५५५५५ | प २ / ५५५ | प २ / ५५५ | प १ |
| ती पु ३/२ | प ३ / ५५५५५२ | प ३ / ५५५२ | प ३ / ५१२ | प ३/४ |
| वी पु | प / ५५५५५ | प / ५५५ | प / ५ | प १ / २ |

तत्तोऽणियट्टिस्सय अंतं पत्तोहु तत्थ उदधीणं ल-
कालेपुव्व करणोहु ॥३५१। ततो संज्ञिपंचेंद्रियस्थि-
त सहस्रेषु स्थितिबंधोत्सरणेषु गतेषु अवतारका-
मसमयं प्राप्तः। तस्मिन् वीसियादि स्थिति बंधः स्व-
तः सागरोपम लक्ष पृथक्त्व मात्रो भवति। मो साल। ७।५ / ८७

तीसियसाल ।७।३ / ८७ वीसियसाल ।७।२ / ८।७ तदनंतर समयेऽप्यमेवतारको पूर्वकरणो जातः। अथापूर्वकरणो-
संभवद्विशेष माह ।छ। उवसामणाणिधत्ती णिकाचणुग्घाडिदाणि-
तत्थेव चउतीसदुगाणं चय बंधो दु अधापवत्तोय ।३५३। तस्मिन्नवतारका पूर्वकरणे प्रथम समयादारभ्य
अप्रशस्तोपशमन करणं निधत्तिकरणं निकाचन करणं युगपदे वोद्घाटितानि भवंति। तत्काल स्य सप्तभागी
कृतस्य प्रथम भागे हास्य रति भय जुगुप्सानां चतुः प्रकृतीनां बंधको जातः। ततस्तत्काल षष्ठ भाग चरम समया
दारभ्य निद्रा प्रचलयोर्बंधो भवति। ततः संख्यात सहस्र स्थिति बंधोत्सरणेषु गतेष्ववतारका पूर्वकरण
चरम समये वीसियादि स्थिति बं- धः स्वस्व प्रतिभाग गुणित सागरोपम कोटि लक्ष पृथक्त्व मात्रो भवति

| |
|---|
| ४ / ३० |
| १ |
| ० |
| ० |
| २ |

मोसाकोल ७।५ / ८७
तीसाकोल ७।३ / ८।७
वीसाकोल ७।२ / ८७

सर्वकर्मणां गुण- श्रेणी गलितावशेषायामा अद्ययावत्प्रवृत्ता तदनंतर समये ततोवती
र्णोऽप्रमत्तगुण- स्थाने विशुद्धेरनंत गुण हानिवशेनाधः प्रवृत्त करण परिणामं प्रा-
प्नोति अथावतारका प्रमत्तस्याधः प्रवृत्त करण परिणाम प्रथम समये संभवद्गुणश्रेणिवि
शेष प्रदर्शनार्थमाह ।छ। पढमोऽधापवत्तो गुणसेढि मवट्ठिदं पुराणादो। संखगुणं तच्चं
तोमुहुत्तमेत्तं करेदीहु ।३५५। अथावतारका पूर्वकरण चरम समये अपकृष्ट द्रव्यादसंख्येय गुण हीनं द्रव्यम- ७५

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

पकृष्य अवतारकसूक्ष्मसांपराय प्रथमसमयारभ्यात् पौराणिकगुणश्रेण्यायामात् संख्यातगुणायाममव-
स्थितगुणश्रेणि निक्षेपमवतारका प्रमत्तः। अधःप्रवृत्तकरण प्रथमसमये करोति विशुद्धिहान्यापकृष्टद्रव्य
हानिः गुणश्रेण्यायामः संख्येयगुणोप्यंतर्मुहूर्त्तमात्र एव नाधिकः
गुणश्रेण्यनुवादार्थमाह। छ। उदर सुहुमादीदो अपुव्वचरिमो-
से सेच गुणसेढी। णिक्खेवो सट्ठाणेहोदि तिट्ठाणं ॥३४४॥ अवतार
पराय प्रथमसमयादारभ्यावतारका पूर्वकरण चरमसमय पर्यं

अथ पुराणा
त्ति गलिद-
क सूक्ष्मसां
तं ज्ञानावर

णादि कर्मणां गुणश्रेण्यायामो गलितावशेषमात्र एव नावस्थितः प्रवृत्तः अयं तु विशेषः मोहनीयस्यावता-
रक सूक्ष्मसांपराय प्रथमसमयात्प्रभृति कियंतमपि कालमवस्थित स्वरूपेण गुणश्रेणिनिक्षेपो भूत्वा त-
तः परं गलितावशेषायामेन ज्ञानावरणादि कर्मगुणश्रेण्यायामसदृशो जात। इति त्रिषु स्थानेषु दृष्ट्वावस्थि
तगुणश्रेण्यायामदर्शनात्। तत्कथं। अवतारकसूक्ष्मसांपरायकाले सर्वत्रावस्थितस्वरूपेण स्पर्द्धकगत-
लोभापकर्षणे एकवार दृष्ट्वा बादरलोभवेदकाद्धा पर्यंतमवस्थित स्वरूपेण पुनर्मायापकर्षणे द्वितीयवार
दृष्ट्वा माया वेदककाल पर्यंतमवस्थितस्वरूपेण ततः परं मानापकर्षणे तृतीयवार दृष्ट्वा मानवेदककाल-
पर्यंतमवस्थितस्वरूपेण एवं त्रिषुस्थलेषु गुणश्रेण्यायामः प्रवृत्तः। ततः परं क्रोधापकर्षणे चतुर्थवार दृष्ट्वा गु
णश्रेण्यायामः अवतारका पूर्वकरण चरमसमये पर्यंतं गलितावशेषमात्र एवागतः। इदानीं पुनरधःप्रवृत्त-
करण प्रथमसमये ज्ञानावरणादि कर्मणां गुणश्रेण्यायामः पुराणगुणश्रेण्यायामात्संख्यातगुणितो वस्थित
स्वरूपोंतर्मुहूर्त्त पर्यंतं प्रवर्त्तत इत्यर्थः। अधःप्रवृत्तकरणाद्धामात्र मंतर्मुहूर्त्तं प्रतिसमयमेकांतेन विशुद्ध्यनंत-
गुणहान्याऽवतीर्यस्वस्थाना प्रमत्तसंयतो भवति। तस्य च संक्लेशविशुद्धिवशेन वृद्धिहान्यवस्थान लक्षणं स्थान

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri



त्रयं गुणश्रेण्यायामस्य संभवति। अथ तत्स्थानत्रयविषयविभागं प्रदर्शयति। छ। सट्ठाणे तावदियं संखगुण-
णं तु उवरि चलमाणे विरदाविरदाहिमुहे संखेज्जगुणं तदो तिविहं ॥ ३५६। प्रमत्ताप्रमत्तगुणस्थानयोः स्वस्था-
नसंयतो भूत्वा वृद्धिहानिभ्यां विनावस्थितगुणश्रेण्यायामं करोति विरताविरतगुणस्थानाभिमुखः सन् सं-
क्लेशवशेन प्राक्तनगुणश्रेण्यायामात् संख्यातगुणं गुणश्रेण्यायामं करोति। पुनः स एव यदि परावृत्योपशमक-
क्षपकश्रेण्यारोहणाभिमुखो भवति तदा विशुद्धिवशेन प्राक्तनगुणश्रेण्यायामात् संख्यातगुणहीनं गुणश्रेण्या-
यामं करोति। एवं गुणश्रेण्यायामस्य वृद्धिहान्यवस्थानलक्षणं स्थानत्रयं व्याख्यातं। अथावतारका प्रमत्तस्याधः
प्रवृत्तकरणे संक्रमसंभवविशेषं प्रदर्शयति ॥ छ। करणे अधापवत्ते अधापवत्तो दु संकमो जादो। विज्झादमबं-
धाणं णट्ठो गुणसंकमो तत्थ ॥ ३५७। अवतारकाधःप्रवृत्तकरणे बंधवतामधाप्रवृत्तसंक्रमो जातः। अबंधानां
विध्यातसंक्रमः तत्र गुणसंक्रमो विनष्ट एव ॥ छ। अथ द्वितीयोपशमसम्यक्त्वकालप्रमाणं गाथाद्वयेनाह। छ।
चडणोदरकालादो पुव्वादो पुव्वगोत्ति संखगुणं कालं अधापवत्तं पालदि सो उवसमं सम्मं ॥ ३५८। द्वितीयोपश-
मसम्यक्त्वेनोपशमकश्रेण्यामारूढस्यापूर्वकरणप्रथमसमयादारभ्य ततोवतीर्णापूर्वकरणचरमसमय-
पर्यंतं यावत्कालस्ततः संख्येयगुणं कालमंतर्मुहूर्त्तप्रमितं। अधःप्रवृत्तकरणेन सह द्वितीयोपशमसम्यक्त्वमनु-
पालयति ॥ छ। तस्सम्मत्तद्धाये असंजमं देससंजमं वापि। गच्छेज्जावलिछक्के सेसे सासणगुणं वापि। ३५। तस्य-
द्वितीयोपशमसम्यक्त्वस्य काले अधःप्रवृत्तकरणकालं नीत्वा पुनर प्रत्याख्यानावरणकषायोदयात् असंय-
मपरिणाममपि गच्छेत्। प्रत्याख्यानावरणकषायोदयाद्देशसंयममपि वा गच्छेत्। अथवा असंयमं प्राप्य तत्रां-
तर्मुहूर्त्तं स्थित्वा पश्चाद्देशसंयमं क्रमेण गच्छेत्। देशसंयमं प्राप्य तत्रांतर्मुहूर्त्तं स्थित्वा पश्चादसंयमं वा क्रमेण ग-
च्छेत्। एवं क्रमेणोभयप्राप्तिः प्रवचने कथितत्वात्। अथवा तदुपशमसम्यक्त्वकालस्यावलिकाषट्केऽवशिष्टे नंता ७५

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

नुबंधिकषायान्यतमोदयात्सासादनगुणस्थानमपिगच्छेत्।छ।अथद्वितीयोपशमसम्यक्त्वात्।सासादनगुण-
प्राप्तस्य संभवद्विशेषमाह।छ।जदि मरदि सासणो सो णिरयतिरिक्खं णरं ण गच्छदि हु णियमादेवंगच्छदि
जयिवसहमुणिंदवयणेणं॥३५०।यदि स उपशमश्रेणितोऽवतीर्णः सासादनः स्वायुःक्षयवशात् म्रियते।त
दा नारकगतिं तिर्यग्गतिं मनुष्यगतिं च नियमेन न गच्छति किंतु देवगतिं गच्छति।एवमुपशमश्रेणितोवतीर्णस्य
सासादनगुणप्राप्तिः।तस्य मरणं गतिविशेषश्च कषायप्राभृताख्यद्वितीयसिद्धांतव्याख्याने यतिवृषभाचा-
र्यस्य वचनप्रामाण्येन भणितं।छ।अथ तत्सासादनस्य गतित्रयागमने कारणमाह।छ।णिरयतिरिक्खण-
राउगसत्तो सक्को ण मोहमुवसमिदुं।तम्हा तिसु विगदीसु य ण तस्स उप्पज्जणं होदि।३५१।नारकतिर्यग्मनुष्या
युःसत्वसहितो जीवश्चारित्रमोहनीयमुपशमयितुं न शक्तः।तत्सत्वेन देशसंयमसकलसंयमयोः प्राप्त्यभावा
त्तस्मात्कारणात्तत्सासादनस्य तिसृष्वपि गतिषूत्पादो नास्ति।इदं सर्वं बद्धपरभवायुष उपशमश्रेणीमारू-
ढावतीर्णस्य भणितं।अबद्धपरभवायुषस्तच्छ्रेणीमारूढावरूढस्य सासादनस्य मरणमेव न संभवति।छ।
अथोपशमश्रेण्यवतीर्णस्य सासादनत्वप्राप्त्यभावमाचार्यांतराभिप्रायेणाभणति।छ।उवसमसेढीदो पु-
ण उदिण्णो सासणं ण पापुणादि।भूदबलिणाहणिम्मलसुत्तस्स हु दोवदेसेण॥३५२।उपशमश्रेणितोव-
तीर्णः सासादनत्वं न प्राप्नोत्येव तत्प्राप्तिकारणानंतानुबंधिकषायोदयस्यासंभवात्।पूर्वमेवानंतानुबंधि
चतुष्टयं द्वादशकषायस्वरूपेण परिणमय्य पश्चादुपशमश्रेणिमारूढस्य तत्सत्वाभावात्।इदं सर्वं भूत
बलिमुनिनाथप्रोक्ते महाकर्मप्रकृतिप्राभृतार्थगोचरे प्रथमसिद्धांते निर्मलस्य पूर्वापरविरोधादिदोष-
रहितस्य सूत्रस्य स्फुटोपदेशेनास्माभिर्निश्चितं।अथोपशमश्रेण्यारूढद्वादशपुरुषप्रक्रियाभेदप्रदर्शना
र्थं द्वादशगाथाः प्ररूपयति।छ।पुंकोधोदयचलियस्सेसा हु परूवणा हु पुंमाणे।मायालोहे चलिदस्सत्थि

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri



विसेसंतु पत्तेयं ॥३५३। पुंवेदसंज्वलनक्रोधोदयसहितस्योपशमश्रेणीमारूढस्य पूर्वोक्ता सर्वापि प्ररूपणा भवति। पुंवेद संज्वलनमानोदयेन पुंवेदसंज्वलनमायोदयेन पुंवेद संज्वलनलोभोदयेन चोपशमश्रेणीमारूढानां प्रत्येकं प्रक्रियाविशेषोस्ति। तद्यथा। दोण्हं तिण्हं चउण्हं कोहादीणं तु पढमठिदिमेत्तं माणस्स य मायाये बादरलोभस्स पढमठिदी ॥३५४। संज्वलनक्रोधमानमायालोभानां मध्ये पुंक्रोधोदयेनारूढस्य द्वयोः क्रोधमानयोः यावन्मात्री प्रथमस्थितिस्तावन्मात्री पुंमानोदयेनारूढस्य मान प्रथमस्थिति र्भवति।छ।

तथा पुंक्रोधोदयारूढस्य क्रोधमानमाया संज्वलनानां त्रयाणां संपिंडिता प्रथमस्थितिर्यावन्मात्री तावन्मात्री पुंमायोदयारूढस्य संज्वलनमाया प्रथमस्थितिर्भवति॥




तथा पुंक्रोधोदयारूढस्य संज्वलनक्रोधमानमायालोभानां समुदिता यावन्मात्री प्रथमस्थितिः। तावन्मात्री पुंलोभोदयेनारूढस्य संज्वलन बादरलोभस्य प्रथमस्थितिर्भवति॥छ॥ चतुर्णामुदये: श्रेण्यारूढानां सर्वेषां सूक्ष्मलोभप्रथमस्थितिः समानैव॥







तथा नपुंसकवेदस्त्रीवेदस्त्रीवेद सप्तनोकषायाणामुपशमनकालाश्चतुर्णां समाना एव। जस्सुदयेण रूढो सेढिं तस्सेव ठवदि पढमठिदिं सेसाणावलिमेत्तं मोत्तूण करेदि अंतरं णियमा ॥३५५। यस्य वेदस्य कषायस्य वा उदयेन श्रेणिमारूढः तस्य प्रथमस्थितिमंत-



Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

मुहूर्त्तमात्रीं स्थापयित्वा शेषवेदकषायाणां उदयरहितानामावलिमात्रीं मुक्त्वा उपर्यंतरं करोति। जस्सुदयेणारूढो सेढिं तक्कालपरिसमत्तीये। पढमट्ठिदिं करेदि हु अणंतरुवरुदयमोहस्स ॥३५६। यस्य कषायस्योदयेन श्रेणीमारूढः तत्कषाय प्रथमस्थितौ समाप्तायां पुनरनंतरोपरितनोदयवत्कषायस्य प्रथमस्थितिं करोति तथाहि। यथा पुंक्रोधोदयेन श्रेणीमारूढः संज्वलन क्रोध प्रथमस्थितावंतर्मुहूर्त्तमात्र्यां समाप्तायां पुनर्मानसंज्वलनस्य प्रथमस्थितिमंतर्मुहूर्त्तमात्रीं करोति। एवमुपर्यपि तथा पुंमानोदयेन श्रेणीमारूढः संज्वलनमानस्थितावंतर्मुहूर्त्तमात्र्यां समाप्तायां पुनः संज्वलन माया प्रथमस्थितिमंतर्मुहूर्त्तमात्रीं करोति। एवमुपर्यपि तथा पुंमायोदयेन श्रेणीमारूढः संज्वलन माया प्रथमस्थितावंतर्मुहूर्त्तमात्र्यां समाप्तायां पुनः संज्वलन लोभस्य प्रथमस्थितिमंतर्मुहूर्त्तमात्रीं करोति। एवमुपर्यपि तथा पुंलोभोदयेन श्रेणीमारूढः संज्वलन लोभ प्रथमस्थितावंतर्मुहूर्त्तमात्र्यां निष्ठितायां पुनः सूक्ष्मलोभस्य प्रथमस्थितिमंतर्मुहूर्त्तमात्रीं करोति। छ। माणोदयेण चडिदो कोहं उवसमदि कोह अद्धाये। मायोदयेण चडिदो कोहं माणं समगद्धाए ।३५७। पुंक्रोधोदयेनारूढस्य यथा संज्वलन क्रोधोदयाद्धा तस्यामेव पुंमानोदयेन श्रेण्यामारूढः उदयरहित क्रोधत्रयमुपशमयति। तथा पुंमायोदयेनारूढः उदयरहितं क्रोधत्रयं मानत्रयं च पुंक्रोधोदयारूढस्य क्रोध प्रथमस्थितौ चोपशमयति। छ। लोभोदयेण चडिदो कोहं माणं च मायमुवसमदि। अप्पप्पणअद्धाए ताणं पढमट्ठिदी णत्थि ॥३५८। पुंलोभोदयेनारूढः उदयरहितं क्रोधत्रयं मानत्रयं मायात्रयं च पुंक्रोधोदयारूढस्य यथासंख्यं क्रोध प्रथमस्थितौ मान प्रथमस्थितौ माया प्रथमस्थितौ चोपशमयति। तेषां क्रोध मान मायानां प्रथमस्थितिर्नास्त्युदयरहितत्वात्। छ। माणोदयचडपडिदो कोहोदयमाणमेत्तमाणद्धउ। माणतियाणं सेसे सेससमं कुणदि गुणसेढिं ॥३५९। पुंमानोदयेन श्रेणीमारुह्य पतितस्य मानोदयकालः क्रोधोदयारूढस्य क्रोधमानोदय[redacted] काल प्रमितः

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri



सः मानोदयारूढपतितस्त्रिविधं मानमपकृष्य ज्ञानावरणादि गुणश्रेण्यायामसमान गलितावशेषायामेन गु
णश्रेणिं करोति। मायोदयारूढपतितस्य मायोदयकालः क्रोधोदयारूढस्य क्रोधमानमायोदयकालप्रमितः।
सः मायोदयारूढपतितस्त्रिविधमायामपकृष्य। ज्ञानावरणादि गुणश्रेण्यायामसमेन गलितावशेषायामेन
गुणश्रेणिं करोति। लोभोदयारूढपतितस्य लोभोदयकालः। क्रोधोदयारूढस्य क्रोधमानमायालोभोदयकाल-
मात्रः सलोभोदयारूढपतितस्त्रिविधलोभमपकृष्य ज्ञानावरणादि गुणश्रेण्यायामसमेन गलितावशेषाया
मेन गुणश्रेणिं करोति माणादिति याणुदये चड पडिये सगसगुदय संपत्तेण वच्छतिकसायाणं गलिदवसेसं
करेदि गुणसेढिं ॥३६६॥ मानमायालोभोदयेनारूढपतितः स्वस्वकषायोदयसंप्राप्तः। यथासंख्यं नवषट्त्रि-
कषायाणां गलितावशेषायामां पूर्वोक्तप्रकारेण गुणश्रेणिं करोति। छ। जस्सुदयेणाय चडिदो तम्हियउकट्टि
यम्हि पडिऊण अंतरमाऊरेदि हु एवं पुरिसोदयेचडिदो ॥३६७॥ यस्यकषायोदयेन श्रेणीमारूह्यपतित-
स्तस्मिन् कषाये पकृष्टे ऽन्तरमापूरयति। एवमुक्तप्रकारेण पुंवेदोदयेन श्रेण्यारूढावरूढो व्याख्यातः। छ। थी
उदयस्सावि एवं अवगदवेदो हु सत्तकम्मं सेसमभुवसामदि संढस्सुदये चडिवस्स वोच्छामि ॥३६८॥ स्त्रीवे
दोदयेन सहितैः क्रोधादि कषायोदयैः श्रेणीमारूढः अपगतवेदोदयः सन्नेव सप्त नोकषायान् युगपदुप
शामयति अवशिष्टं सर्वमुपशामन विधानं पुंवेदारूढवद्द्रष्टव्यं। अथ षंढोदयारूढस्य विशेषं वक्ष्यामि। छ।
संढुदयं तरकरणो संढद्धाणम्हि अणुवसंतेसे। इत्थिस्सय अद्धाये संढं इत्थिं च सममगमुपसमदि ॥३६९॥
नपुंसकवेदोदयेन सहितैः क्रोधादि कषायैः श्रेण्यारूढो नपुंसकवेदस्यांतरं कुर्वाणः प्रथमस्थितिं पुंवेदो
दयारूढस्य नपुंसक स्त्रीवेदोपशामन कालमात्रीं स्थापयित्वा प्रागेव नपुंसकवेदोपशामनं प्रारभ्य पुंवेदारू
ढ नपुंसकोपशामन कालपर्यंतं गच्छति। नाद्यापि नपुंसकवेदोपशामनं समाप्तं ततः स्त्रीवेदोपशामनं प्रारभ्य ७७

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

द्वावपि वेदावुपशमयन् । पुंवेदारूढस्य स्त्रीवेदोपशमनकालमात्रमंतर्मुहूर्त्तं गत्वा ॥ छ । तहि चरिमसवे
दो अवगदवेदो हु सत्तकम्मं सेससमुवसामदि सेसा पुरिसोदयचलिद भंगा हु ॥ ३६३ । तदा चरमसमय
नपुंसक सवेदः स्त्रीवेदोपशमनं निष्ठापयति । ततः परमपगतवेदः सप्त नोकषायान् समुपशमयति । शेषं सर्वं पुंवे
दारूढप्रकारेण ज्ञातव्यं ॥ छ । अथोपशमश्रेण्यामल्पबहुत्वपदकथनप्रतिज्ञामाह । छ । पुंकोधस्सयउद
ये चडपडिदे पुव्वदो अपुव्वोत्तिएदि सेसअद्धाये अप्पाबहुगं तु वोच्छामि ॥ ३६४ । पुंक्रोधोदयारूढावरूढस्या
येचडपडिदे ... पुंक्रोधोदयारूढावरूढस्या
रोहकापूर्वकरण प्रथमसमयात्प्रभृत्यवरोहकापूर्वकरणचरमसमयपर्यंतकाले संभवं त्यल्पत्वाशात प्र
भूता हुति करणे नानुदयवेदनीय देवगति पंच शरीर पंच तद्बंधन पंच तत्संघात षट् संस्थान अंगोपांग-
षट् संहनन पंच वर्ण द्विगंध पंच रसाष्टस्पर्श देवगति प्रायोग्यानुपूर्वी अगुरुलघुकोपघात परघातोच्छ्वास-
प्रशस्ताप्रशस्तविहायोगत्य पर्याप्त प्रत्येक स्थिरास्थिर शुभाशुभ दुर्भग सुस्वर दुस्वरानादेयायशस्कीर्त्ति
निर्माण नाम नीचैर्गोत्र भेदभिन्न द्वासप्तति प्रकृतीर्धनानि निर्दह्य तच्चरमसमये सोदयवेदनीय मनुष्यायु
मनुष्यगति पंचेंद्रीय जाति मनुष्यानुपूर्वी त्रस बादर पर्याप्त सुभगादेय यशस्कीर्त्ति तीर्थकर नामोच्चैर्गोत्र भे-
देन त्रयोदश प्रकृतीस्तीर्थकर रहित द्वादश प्रकृतीर्वा प्रक्षयं नीत्वा तदनंतरमयं परमात्मा समुत्तीर्णानं-
तसंसारसागरः निर्दग्धसकलमलकलंकः पाषाणकिट्टकालिकाधातुवर्जितजात्यकनकवत् लब्धात्मस्व
भावः प्रदीपशिखावत् ऊर्द्ध्वगतिस्वभावेन मार्त्तंडमंडलसमवृत्त मनुष्यलोकसमानविष्कंभ योजनाष्टको-
त्सेधाष्टमपृथ्वीमध्यनिविष्टधवलछत्रसन्निभप्रभासुरेषत्प्राग्भारवसुंधरोपरितनतनुवाताग्रिमलोकां
तमेकसमयेन प्राप्य गतिकारणधर्मास्तिकायाभावात्तत उपरिगमनरहितः चरमशरीरात्किंचिन्न्यूनजी-
वघनपरिमाणतदाकारः अष्टगुणपरिपुष्टः कृतकृत्यः सकलजगन्मंगलीभूतः अमूर्त्तः त्रिलोकचूडामणिः-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri



जाज्वल्यमान सर्वांगीणानंत केवलज्ञान दर्शनविस्फुरणाक्रमसमाक्रांतसर्वद्रव्यक्षेत्रकालभावःनिरति-
शायनिरुपमनिर्व्याबाधवृद्धिहानिवर्जितविषयातीतमितिरहित शाश्वत विशाल स्वात्मोपादान संसिद्ध-
सर्वांगसमुत्पन्न परमानंतस्वरूपानंतसुखसुधासार सागरांतर्मग्नः प्रीतीभूतःसकलात्मगुणसंपूर्णतापर-
मकाष्ठाधिष्ठितोभवति। अत्र सर्वकर्मप्रक्षयोद्भूताविकलात्मस्वरूपोपलब्धिरेव मोक्षस्वरूपं। तेन प्रदीप-
निर्वाणवत्स्कंधसंतानात्यंतोच्छेदादभावमात्रो मोक्षः इति सौगतवचनमसमंजसं। कुतः। सकलपुरुषार्थ-
सिद्धेःपरमकाष्ठालक्षणमोक्षस्याभावमात्रत्वविरोधात्। अभावमात्रश्चेत्। प्रेक्षापूर्वकारिणां तन्निमित्त
प्रयासोऽनर्थकःस्यात्। सचेतनस्य कस्याप्यात्माभावनिमित्तप्रयत्नाकरणात्। अत्रोपयोगीश्लोकः। अपू-
र्वलाभमुद्दिश्य जनःसर्वोपिचेष्टते। नहि मूलविनाशाय प्रेक्षावान् कश्चिदीहते। अनेनैव बुद्धिसुखदुःखेच्छा
द्वेष प्रयत्नधर्माधर्मसंस्काराणां नवानामात्मगुणानामत्यंतोच्छित्तौ गुणविरहितस्यात्मनःस्वात्मन्यवस्थानं
निःश्रेयसमिति योगमतमपि निराकृतं। अत्रापि पुरुषार्थनाशं विना पुरुषार्थसिद्धेरत्यंताभावात्। विशेषल-
क्षणशून्यस्यावस्तुत्वात्। षष्ठविषाणवन्मुक्तात्मनामभावप्रसंगादिदमपिमतमसमीचीनं उपरतकार्यका-
रणसम्बंधस्यात्मनःसुषुप्तपुरुषवदव्यक्तचैतन्यस्वरूपेणावस्थानं निर्वाणमिति सांख्यदर्शनमपि अस-
द्दर्शनमेव। तत्रापि पूर्वोक्ताशेषदोषस्यापरिहार्यत्वात्। अतएव स्वात्मोपलब्धेःसिद्धिरितिसिद्धांतपद्धतिरे-
व विचारचतुरचेतःशिखरिशिखरारूढत्वेन युक्तिसिद्धा भवति। सिद्धस्वरूपनिरूपक सूत्रसार्थः। कृत्स्नक-
र्मक्षयादूर्द्धं निर्वाणमधिगच्छति। तत्स्वभावत्वतो जीवो निर्व्याघात प्रदीपवत्॥ दग्धबीजेयथात्यंतं प्रादुर्भवति
नांकुरः कर्मबीजे तथादग्धे नरोहति भवांकुरः॥२॥ उत्पत्तिश्च विनाशश्च प्रकाशतमसोरिह युगपद्भवतोय-
द्वत्तथा निर्वाणकर्मणोः॥३॥ संसारविषयातीतं सिद्धानामव्ययं सुखं। परमाल्हादरूपं तदनौपम्यमनुत्तरं॥४॥ ७८

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

श्लोकमेकं विजानानः शास्त्रं ग्रंथार्थतोपि वा। ल्हादते मानुषस्तीव्रं किं पुनः सर्वभाववित्॥ लोके तत्सदृशो ह्यर्थः-
कृत्स्नेप्यन्यो न विद्यते। उपमीयेत तद्येन तस्मान्निरुपमं स्मृतं॥६॥ त्रिषु लोकेषु कालेषु पिंडितात्प्राणिनां सुखा
त्। अनंतगुणितं प्राहुः सिद्धक्षणसुखं बुधाः॥७। साक्रमज्ञानदृग्वीर्याः साव्याबाधावगाहनाः। सौक्ष्म्या गुरुलघु
त्वाढ्याः सम्यक्त्वगुणभूषिताः॥८। त्रिलोकीशेखरा नित्याः शीतीभूता निरंजनाः। कृतार्थाः सिद्धसाध्या बहुत्व-
पदानि वक्ष्यामि।९। अथ तान्येवाल्पबहुत्वपदानि व्याख्यातुं सप्तविंशति गाथाः प्ररूपयति।१। अवरादोवर
महियं रसखंडुक्कीरणस्स अद्धाणं। संखगुणं अवरट्ठिदि खंडस्सुक्कीरणोकालो॥३६६। सर्वतः स्तोका जघन्या
नुभागकांडकोत्करणाद्धा।२१। ज्ञानावरणादि कर्मणामारोहक सूक्ष्मसांपराय चरमानुभागकांडकोत्करणा
द्धा मोहनीयस्यांतरकरणे क्रियमाणे तत्र चरमानुभागकांडकोत्करणाद्धा च जघन्या कथ्यते॥१। तत उत्कृष्टानु
भागखंडोत्करणाद्धा विशेषाधिका।२१। साप्यारोहकापूर्वकरण प्रथमसमये सर्वकर्मणां भवति॥२। ततो ज्ञानाव-
रणादिकर्मणां जघन्यस्थितिकांडकोत्करणकालः सूक्ष्मसांपराय चरमसमयसंभवी अनिवृत्तिकरणचरमस
मयसंभवी मोहनीयस्य जघन्यस्थितिबंधकालश्च संख्यातगुणौ २१।४। परस्परं समानौ॥३। पडणजहणट्ठि-
दिबंधद्धा तह अंतरस्स करणद्धा जेट्ठट्ठिदिबंधट्ठिदि उक्कीरद्धाय अहियकमा॥३६७। तस्मादवतारकसूक्ष्मसां
पराय प्रथमसमये ज्ञानावरणादिकर्मणां जघन्यस्थितिबंधकालः अवतारकानिवृत्तिकरण प्रथमसमये मो
हनीयस्य जघन्यस्थितिबंधकालश्च विशेषाधिकौ परस्परं समानौ॥२२४। एतस्मादंतरकरणकालो विशेषा-
धिकः। ननु पूर्वमेकस्थितिकांडकोत्करणकालसमानः अंतरकरणकाल इत्युक्तं इदानीं विशेषाधिक इत्युच्यते
कथं न पूर्वापरविरोधः इति चेन्न मध्यमस्थितिकांडकोत्करणकालेनांतरकरणकालस्य समानत्ववचनात्
तस्मादंतरकरणकालादारोहकापूर्वकरण प्रथमसमयसंभविनौ उत्कृष्टस्थितिबंधकाल उत्कृष्टस्थितिकां

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri



डकोत्करणकालश्च विशेषाधिकौ ॥२१। परस्परं समानौ।१६। सुहुमंतिमगुणसेढीउवसंतकसायगस्स गुण-
सेढी पडिवदसुहुमद्धावियतिण्णिवि संखेज्जगुणिदकमा ॥३६८। ततः आरोहकसूक्ष्मसांपरायचरमसमय
संभवि गलितावशेषो गुणश्रेण्यायामः संख्यातगुणः ।२१।४।४।७। तत उपशांतकषायस्य प्रथमसमये आ-
रब्धगुणश्रेण्यायामः संख्यातगुणः ।२१।४।७।४।८। ततः प्रतिपतत्सूक्ष्मसांपरायकालः संख्यातगुणः ।२१
४।४।४।४।१९।१८। तग्गुणसेढी अहियाचलसुहुमो किट्टिउवसमद्धाय। सुहुमस्सय पढमठिदीतिण्णिविसरिसा
विसेसहिया ॥३६९। तस्मात्प्रतिपतत्सूक्ष्मसांपरायस्य संज्वलनलोभगुणश्रेण्यायामः आवलिमात्रेण विशेषा
धिकः ॥२१।२०। ततः आरोहकसूक्ष्मसांपरायकालः सूक्ष्मकृष्ट्युपशमनकालः सूक्ष्मसांपरायप्रथमस्थित्याया-
मश्च विशेषाधिकाः ।२१। परस्परं समानाः। अत्र विशेषप्रमाणमंतर्मुहूर्त्तमात्रं ॥२१।१८। किट्टीकरणद्धहियापड
बादरलोभवेदगद्धाहु संखगुणा तस्सेव यतिलोहगुणसेढिणिक्खेउ ॥३७०। ततः सूक्ष्मकृष्टिकरणकालो वि-
शेषाधिकः ।२१। अयं चानिवृत्तिकरणकालस्य किंचिन्न्यूनत्रिभागमात्रः [२११/३] ।२२॥ ततः पतद्बादरसांपरायस्य
बादरलोभवेदककालः संख्यातगुणः [२१२/३] ।२३॥ ततः पतदनिवृत्तिकरणस्य लोभत्रयगुणश्रेणीनिक्षे
पः आवलिमात्रेणाधिकः [२१२/३] ॥२४॥ चडबादरलोभस्सय वेदगकालो य तस्स पढमठिदी पडलोहवे
दगद्धा तस्सेव य लोहपढमट्ठिदी ॥३७१। तस्मादारोहकानिवृत्तिकरणस्य बादरलोभप्रथमस्थित्या-
यामो विशेषाधिकः [२१।२।२६/३] ततः पतत्सूक्ष्मबादरलोभवेदककालो विशेषाधिकः [२४] ।२७। ततोऽवतारक-
स्य लोभप्रथमस्थित्यायामः आवलिमात्रेणाधिकः ॥२१॥२८। तम्मायावेदद्धा पडिवडछण्णंपि वि-
त्तगुणसेढी। तम्माणवेदगद्धा तस्सेणवण्णंपि गुणसेढी ॥३७२। ततः पतन्मायावेदककालोंतर्मुहूर्त्तमात्रेणा-
धिकः [२४] २९। ततः प्रतिपतन्मायावेदकस्य षण्णां कषायाणां गुणश्रेण्यायामः आवलिमात्रेणाधिकः ।२१।२०। ७८

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

ततः प्रतिपतन्मान वेदककालोंतर्मुहूर्त्तेनाधिकः ।२१।२१। ततस्तस्यैव नवानां कषायाणां गुणश्रेण्यायामः-
आवलिमात्रेणाधिकः ॥२१।२२। चडमायावेदद्धा पढमट्ठिदि माय उवसमद्धाय। चल माया वेदगद्धा पढम-
ट्ठिदि माया उवसमद्धाय ॥३७३। ततः आरोहक माया वेदक कालोंतर्मुहूर्त्तेनाधिकः ।२१।२३। ततस्तन्माया-
प्रथमस्थित्यायाम उच्छिष्टावलिमात्रेणाधिकः ।२१।२४। ततो मायोपशमन कालः समयोनावलि मात्रेणाधिकः
।२१।२५। ततः आरोहक मानवेदक कालोंतर्मुहूर्त्त मात्रेण विशेषाधिकः ।२१।२६। ततस्तत्प्रथमस्थित्यायामः
आवलि मात्रेणाधिकः ।२१।२७। ततस्तन्मानोपशमन कालः समयोनावलि मात्रेणाधिकः ।२१।२८। छ। कोहो-
वसामणद्धा छपुरिसित्थीणउंसयाणं च खुद्दुभवग्गहणं च य अहिय कमा एक्कवीसपदा ॥३७४। ततः क्रोधो
पशमन कालोंतर्मुहूर्त्तमात्रेणाधिकः ।२१।२९। ततः षण्णो कषायोपशमन कालो विशेषाधिकः ।२१।३०। ततपुं
वेदोपशमन कालः समयोन द्व्यावलि मात्रेणाधिकः ।२१।३१। ततः स्त्रीवेदोपशमन कालोंतर्मुहूर्त्तमात्रेणाधि
कः ।२१।३२। ततो नपुंसक वेदोपशमनकालोंतर्मुहूर्त्तमात्रेणाधिकः ॥२१।३३। ततः क्षुद्र भवग्रहणं विशेषाधि
कं ।२/२५।३४। छ। उवसंतद्धा दुगुणा तत्तो पुरिसस्स कोह पढमठिदी। मोहोवसामणद्धा तिण्णि वि अहिय कमा-
होंति ॥३७५। ततउपशांत कषाय कालो द्विगुणः १२/२५ ॥३५। ततः पुंवेदस्य प्रथमस्थित्यायामो विशेषाधिकः
॥२१।३६। ततः संज्वलनक्रोध प्रथमस्थित्याया मः किंचिन्न्यून त्रिभाग मात्रेणाधिकः ।२१।३७। ततो मो-
हनीयस्योपशमन कालः नपुंसकवेदोपशमन प्रारंभात्प्रभृति मान माया लोभोपशमनकालैः साधिकः ।२१
।३८। पडणस्स असंखाणं समयपबद्धाणुदीरणा कालो। संखगुणो चडणस्सय तक्कालो होदि अहियो य।
।३७६। ततः पततः असंख्यात समय प्रबद्धोदीरणा कालः संख्येयगुणः ।२१।३९। ततो आरोहकस्यासंख्ये
यसमय प्रबद्धोदीरणा कालोंतर्मुहूर्त्तमात्रेण विशेषाधिकः ।२१।४।४०। पडणाणियट्टियद्धा संखगुणा चडणा

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

गाविसेसरणा पुव्वद्धासंखगुणा चडरणागाअहिया ॥३७७। पततः अनिवृत्तिकरण कालस्ततः संख्ये-
यगुणाः।२२।४।४।४१। आरोहकानिवृत्तिकरण कालस्ततोंमु हूर्त मात्रेणविशेषाधिकः।२४७।४।
।४२। ततः पतदपूर्वकरण कालः संख्येयगुणाः।२२१।४३। ततः आरोहकापूर्वकरण कालोंतर्मु-
हूर्त्तेनाधिकः।२२१।४४।छ। पडिचडवरगुणसेढीचडमाण पुव्वपढमगुणसेढी अहियकमा
उवसामग कोहस्सय वेदगद्धाहु ॥३७८। ततः प्रतिपततसू- क्ष्मसांपराय प्रथमसमये प्रारब्धो-




त्कृष्टगुणश्रेण्यायामोंतर्मुहूर्त्तेणाधिकः।२२२।४५। आरोहकापूर्वकरण प्रथमसमयगुणश्रेण्यायामस्त
तोंतर्मुहूर्त्तेनाधिकः।२२२।४६। ततः आरोहकस्यक्रोधवेदककालः संख्येयगुणाः।२१४।४७। अधःप्रवृत्तकरण
प्रथमसमयादारभ्य संज्वलनक्रोधवेदकत्वेनापूर्वकरण प्रथमसमयारब्धगुणश्रेण्यायामात् क्रोधवेदक
कालस्य संख्येयगुणत्व संभवात् ॥छ॥ संजदअधापवत्तगगुणसेढी दंसणोवसंतद्धा चारित्तंतरगठिदीदंस-
णमोहंतरठिदीये॥३७९। ततः प्रतिपततः स्वस्थानाप्रमत्तसंयतस्य प्रथमसमयकृतगुणश्रेण्यायामः सं-
ख्येयगुणाः॥४८। ततोदर्शनमोहस्योपशांतावस्थाकालः संख्येयगुणाः चारित्रमोहोपशमनात् पूर्वं पश्चा-
च्चाप्रमत्ताद्यसंयतकाल पर्यंतं द्वितीयोपशमन सम्यक्त्वानुपालनात् ॥४९। ततश्चारित्रमोहांतरायामः सं
ख्येयगुणाः। ततो दर्शनमोहस्यांतरायामः संख्येयगुणाः।५१। अवराजेट्ठाबाहचडपडमोहस्स अवरठिदि-
बंधो।चडपडतिघादि अवरट्ठिदि बंधंतोमुहुत्तोय ॥३८०। ततआरोहक सूक्ष्मसांपरायचरमसमये ज्ञानाव
रणादिबंधस्य जघन्याबाधासंख्येयगुणा। मोहनीयस्य पुनरारोहकानिवृत्तिचरमसमये जघन्याबाधाग्रा-
ह्या॥५२ ततः अवरोहकापूर्वकरणचरमसमये सर्वकर्मणां स्थितिबंधस्योत्कृष्टबाधा संख्येयगुणा॥२१।
साप्यंतर्मुहूर्त्त प्रमितैव ॥५३। ततः आरोहकानिवृत्तिकरणचरमसमये मोहजघन्यस्थिति बंधः संख्येयगुणाः ८०

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सचारोहकस्थितिबंधादवरोहकस्थितिबंधस्य द्विगुणत्व संभवाद्युक्त एव ॥५५। ततआरोहक सूक्ष्मसांपरा-
यचरमसमये घातित्रयस्य जघन्यस्थितिबंधः संख्येयगुणः ।५६। ततोवरोहक सूक्ष्म सांपराय प्रथमसम
येघातित्रयस्य जघन्यस्थितिबंधः संख्येयगुणः सच पूर्वस्माद्द्विगुण एव ॥५७। ततः उत्कृष्टांतर्मुहूर्तः संख्ये
यगुणः ॥२९९।५८॥ समयोन मुहूर्त उत्कृष्टांतर्मुहूर्त इति प्रतिपादनात् । अनेनांतदीपकपदेन इतः पूर्वप-
दानां सर्वेषामंतर्मुहूर्तमात्रत्वमेव सूच्यते ।छ। चडमाणस्सय णामा गोद जहण्णट्ठिदीण बंधोय तेरसपदासु-
कमसो संखेणाय होंति गुणियकमा ॥३८१। ततः आरोहकस्य नामगोत्रयोर्जघन्यस्थितिबंधः संख्येयगुणः ।
सोपि षोडशमुहूर्तमात्रः ।५९। स्वस्वबंधव्युच्छित्तिचरमसमये ग्राह्यः ।छ। चडतदियअवर बंधं पडणामागोदअ
वरठिदिबंधो पडतदियस्सय अवरं तिण्णिपदा होंति अहियकमा ॥३८२। ततआरोहकस्य वेदनीय जघन्य
स्थितिबंधो विशेषाधिकः सोपिचतुर्विंशतिर्मुहूर्तमात्रः ।६०। ततः पततो नामगोत्रस्थितिबंधो विशेषाधिकः सो-
पिद्वात्रिंशन्मुहूर्तमात्रः ।६१। ततः पततो वेदनीय जघन्यस्थितिबंधो विशेषाधिकः सोप्यष्टचत्वारिंशन्मुहूर्तमा-
त्रः ॥६२।छ। चडमायमाणकोहो मासादी दुगुणअवरट्ठिदिबंधो पडणे ताणं दुगुणं सोलसवस्साणि चलणापु-
रिसस्स ॥३८३। आरोहकस्य संज्वलनमाया जघन्यस्थितिबंधः पूर्वस्मात् संख्यातगुणो मासप्रमितः मा १ ॥-
६३। तस्यैव संज्वलन मानजघन्यस्थितिबंधो द्विगुणः ।मा २॥६४। तस्यैव क्रोध संज्वलन जघन्यस्थितिबंधो द्वि
गुणः मा ४। तेषामेव मायादीनां प्रतिपततो जघन्यस्थितिबंधाः आरोहक जघन्यस्थितिबंधेभ्यो द्विगुणाः मा २।
मा ४ मा ८ ॥ आरोहकस्य पुंवेद जघन्यस्थितिबंधः षोडश वर्षमात्रः ।छ। पडणस्स तस्स दुगुणं संजलणाणं तु-
तत्थ दुट्ठाणे बत्तीसं चउसट्ठी वस्सपमाणेण ठिदि बंधो ॥३८४ प्रतिपततस्तद्बंधो द्विगुणः तत्काले संज्वलन-
चतुष्टयस्यारोहके स्थितिबंधो द्वात्रिंशद्वर्षमात्रः अवरोहके तद्बंधश्चतुःषष्टिवर्षमात्रः ॥ छ। चडपडणमोहपढ

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri



मंचरिमंतु तहातिघाद घादीणां संखेज्ज वस्स बंधो संखेज्जगुणक्कमो छ्वरां ॥३८५। आरोहकस्यांतरकरण
निष्पत्यनंतर समये मोहनीयस्य। प्रथमस्थिति बंधः पूर्वस्मात् संख्यात गुणः। संख्यात सहस्र वर्ष प्रमितः।
अवरोहकस्य तत्रागोधिस्थाने मोहचरम स्थिति बंधः ततः संख्येय गुणः। सोपि संख्यात वर्ष सहस्र प्रमितएव
यथा पूर्वमारोहकस्थिति बंधादवरोहक स्थितिबंधस्यद्विगुणत्वनियमस्तथास्मिन्नवसरे तन्नियमोनास्ति।
किंतु यथासंभव संख्येय गुणाकारो द्रष्टव्यः। आरोहकस्य घातित्रय प्रथमस्थिति बंधः पूर्वस्मात्संख्येय गुणः। ततो
वरोहकस्य प्रथम चरमस्थिति बंधः संख्येय गुणः। ततः आरोहकस्य सप्त नोकषायोपशामन काले अघातित्रय
प्रथमस्थिति बंधः संख्येय गुणः। ततोवरोहकस्य तच्चरमस्थिति बंधः संख्येय गुणः। छ। चडपडणमोहचरि
मं। पढमंतु तहातिघाद घादीणां। असंखेज्ज वस्सबंधो संखेज्ज गुणक्कमो छ्वराहं ॥३८६। ततआरोहके मोहनीय-
स्यासंख्यात वर्ष प्रमितश्चरमस्थिति बंधो संख्येय गुणः। सच पल्यासंख्यात भाग मात्रोंतर करण प्रारंभसमये-
संभवति। ततोवरोहके मोहनीयस्या संख्यातवर्ष सहस्र मात्रः। प्रथमस्थिति बंधो संख्येय गुणः। ततः आरोहके-
घातित्रयस्या संख्यातवर्ष सहस्र मात्रश्चरमस्थिति बंधो संख्येय गुणः। सच स्त्री वेदोपशामन काले संख्यातभागं
गत्वा संभवति ततोवतारके तत्प्रथमस्थिति बंधो संख्येय गुणः। तत आरोहका घातित्रयस्य चरमस्थितिबंधो सं
ख्येय गुणः। सच सप्तनोकषायोपशामन काले संख्यात भागे गते संभवति ततोवतारके तत्प्रथमस्थिति बंधोसं-
ख्येय गुणः। एषोपि पल्यासंख्यात भाग मात्र एव। अवतारकस्य स्थिति बंधाः प्रागुक्ताः सर्वेपि आरोहक स्थितिबंध
कालमंतर्मुहूर्तेना प्राप्य संभवंति। छ। चडणोणामदुगाणां पढमो पलिदोवमस्स संखेज्जो भागोठिदिस्सबंधो
हेठिल्लादो असंख गुणो ॥३८७। ततः आरोहके नाम गोत्रयोः पल्य संख्यातैक भाग मात्रः। प्रथमस्थिति बंधो अध-
स्तनाद घातित्रय स्थिति बंधात् असंख्येय गुणः। पु ५ । छ। तीसिय चउराह पढमो पलिदोवम संखभागठिदिबं ८१

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

धो मोहस्स विदो णि पदा विसेस अहियक्कमा होंति ।३८७। तत आरोहके तीसिय चतुष्कस्य प्रथम स्थिति बंधो-
विशेषाधिकः स च पल्य संख्यात भाग एव | प ३ / ५ २ | तत आरोहके मोहस्य चालीसिय स्थिति बंधो विशेषाधिकः-
| प २ / ५ | विशेष प्रमाणं तत्त्रिभागमात्रं | प ३ / ५।२।३ | ठिदि खंडयं तु चरिमं बंधो सरणाद्विदीय पल्लुद्धं । पल्लुं चडपड
बादर पढमो चरिमोय ठिदि बंधो ।३८८। ततश्चरम स्थिति खंड संख्येय गुणः | प / २२ | स च ज्ञाना-
वरणादि कर्मणां सूक्ष्म सांपराय चरम समये मोहस्य चांतर करण काले संभवति । ततः पल्यो त्पत्ति निमि-
त्त पल्य संख्यात भाग पर्यंताः बंधापसरणे समुत्पन्नाये स्थिति बंधाः पल्य संख्यात भाग प्रमितास्ते सर्वेपि-
संख्यात गुणाः | प ००००० प / २२२२२ | पल्यार्थात् पल्य संख्यात भागात् पल्यं संख्यात गुणं | प | तत आरोहकानिवृत्तक-
रण प्रथम स- मये स्थिति बंधः संख्येय गुणः सोपि सागरोपम लक्ष पृथक्त्व मात्रः । ततोवता-
रकानिवृत्तिकरण चरम समये स्थिति बंधः संख्येय गुणः ।ब। चडपड अपुव्व पढमो चरिमो ठिदि बंध उय-
पडणास्स । तच्चरिमं ठिदि सत्तं संखेज्ज गुणक्कमा अद्द ।३८९। तत आरोहका पूर्वकरण प्रथम समये स्थिति बं-
धः संखेय गुणः | सा अंतः का २ / ७७७ ७ | सोपि सागरोपमांतः कोटीकोटि प्रमितः ततः प्रतिपतद पूर्वकरण चरम समये
स्थिति बंधः संखे- य गुणः | सा अंतः को २ / ७ ७ ७ | अत्र गुणकारः द्विरूप मात्रस्तत्प्रायोग्य संख्यात रूप मा-
त्रो वा ग्राह्यः । ततः प्रतिपतद पूर्वकरण- चरम समये स्थिति सत्वं संख्येय गुणं | सा अंतः को २२१ / ७७ |
तप्पढमट्ठिदि सत्तं पडिवड अणियट्टि चरम ठिदि सत्तं । अहियकमा चड बादर पढमट्ठिदि स त्तयं-
तु संख गुणं ॥३९०। ततः प्रतिपतद पूर्वकरण प्रथम समये स्थिति सत्वं विशेषाधिकं | सा अंतः को २ / ७७ | विशेष-
प्रमाणं समयो ना पूर्वकरण काल मात्रं | २१ | अवतरण प्रथम समय स्थिति सत्वादेता वत्समयानां
चरम समय स्थिति सत्वे हीनत्वात् । ततः प्रतिपतद निवृत्तिकरण प्रथम समय स्थिति सत्व मेक समयाधिकं-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri



सा अंतः को २ ५५ ततआरोहकानिवृत्तिकरण प्रथमसमयस्थितिसत्वं संख्यातगुणं। सा अंतः को २ ५ अस्याद्या-
पवनिवृत्तिकरण परिणामकृतस्थितिसत्वघातासंभवात्। चडमाणअ पुव्वस्सय चरि-
मट्ठिदिसत्तयं विसेसहियं। तस्सेवय पढमट्ठिदिसत्तं संखेज्जसंगुणियं॥३०२। ततआरोहकापूर्वकरण
चरमसमये स्थितिसत्वं विशेषाधिकं। सा अंतः को २ ५ तच्चरमकांडकचरमफालिप्रमाणस्य पल्यसंख्यात
भागस्य संभवात्। ततआरोहकापूर्वकरण प्रथमसमयस्थितिसत्वं संख्यातगुणं। सा अं को २। तच्चांतः
कोटीकोटिसागरोपम प्रमितं। अपूर्वकरणकाले संभवि संख्यातसहस्रमात्रस्थितिकांडकघातचशेन तत्प्रथ
मसमयस्थितिसत्व संख्यातबहुभागेषु घातितेषु यत् तच्चरमसमयस्थितिसत्वं संख्यातेकभागमात्रं तस्मा
तत्प्रथमसमयस्थितिसत्वस्य पूर्वस्थितिकांडकघाताभावात्संख्यातगुणत्व संभवात्। एवं चारित्रमोहोप-
शमनविधानं समासं।

॥ शके १८५० पौषवद्य अष्टमी शुक्रवासरे सं. १९८५॥

॥ प्रतिलिपिकृतं कारंजा नगरे श्री चंद्रप्रभ जिनालये –

॥ पं. जोगराज अग्रवालेन॥ शुभं भूयात्॥

PANNALAL D. JAIN SARASVATI BHAVAN
श्री ऐलक
पन्नालाल दि. जैन सरस्वती भवन
सुखानन्द धर्मशाला, बंबई ४
BOMBAY. 4

PANNALAL D. JAIN SARASVATI BHAVAN
श्री ऐलक
पन्नालाल दि. जैन सरस्वती भवन
सुखानन्द धर्मशाला, बंबई ४
BOMBAY. 4



Ganesh Varni Digambar Jain Institute, Naria, Varanasi